(18)

(M-43)

S.KM ~~8~~ 104/89 (j)

Bhagavata Dasam (Purvardha)

Time – 18th Cent. AD.

Leaves — 145 (One Hundred forty five only)

Language – Sanskrit.

श्रीगणेशायनमः॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं॥ श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्॥ दशमे दशमं लक्ष्यमाश्रि-
ताश्रयविग्रहं॥ क्रीडद्यदुकुलांभोधौ परमानंदमीर्यते॥ दशमे कृष्णसत्कीर्तिवितानायानुवर्ण्यते॥ धर्मग्लानिनिमित्तेन निरो-
धो दुष्टभूभुजां॥ प्रोक्तानादिस्वतंत्रीयो निरोधः स तु वर्ण्यते॥ नवनवतिलगनः॥ एकोनसप्ततिरिति पूर्वोत्तरार्धरूपाः॥ स
रामेव संकीर्त्यते॥ आदौ च तु त्रिचत्वारिंशाध्यायैर्बाललीलाप्रार्थनपाठवनेजारैर्न्नहरेर्जन्मप्रसंगनिरूप्यते॥ गोकुले मथुरायां च द्वार-
कायां तत्क्रमात्॥ कृष्णलीला त्रिधा प्रोक्ता तत्र स्वेनेकधा॥ सप्तत्रिंशताध्यायैर्हृद्धृंदावनादिषु॥ गोकुले वसतो लीला
वर्ण्यते गुरुकत॥ एकेनपञ्चमुनाकारिणपकूरेण ततः कृति॥ एकादशभिरध्यायैर्लीला ... मधुपुर्यां तु षड्
पञ्चलीला तन्निरूपणादि वर्ण्यते॥ एवं नवतिरध्यायाः ... विशदा कथाः॥ तत्र तु प्रथमे कंसत्रस्तमत्स्य देवकीसुजनात्॥ श्रुत्वा

॥ श्रीगणेशाय नमः॥ ॐ नमो भगवते वासुदेवाय॥ राजोवाच॥ कथितो वंशविस्तारो भवता सोम-
सूर्ययोः॥ राज्ञां चोभयवंश्यानां चरितं परमाद्भुतं॥१॥ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम॥
तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः॥२॥ अवतीर्य यदोर्वंशे भगवान्भूतभावनः॥ कृत-
वान्यानि विश्वात्मा तानि नो वद विस्तरात्॥३॥

भीतो ऽवधीत्तत्सुता षड् इति निवर्ण्यते॥ कृष्णावतारचरितश्रवणामृतनिर्वृतः॥ कान्नुवेरेनो ... पृच्छति तस्य
श्च सर्गोविसर्गश्च स्थानं पोषणमूर्तयः॥ मन्वंतरेशानकथा निरोधो मुक्तिराश्रयः॥ अंशेनेतिप्र... दशमोऽस्त्विति ... रामेन
नुक्ता निजालोग ताः॥ पितृगृहाद्व्रजं मे पिता ... इत्यादिना सत्यं पुनर्विस्तरेण वृहत्याह अवतीर्येति॥३॥ कथितो
वंशविस्तारो इति भवता सोमसूर्ययोः वंशविस्तारो कथितः॥ तथा पुनः उभयोः राज्ञां वंश्यानां चरितं परमाद्भुतं॥ इत्य
न्वयः॥१॥ हे मुनिसत्तम॥ नितरां च पुनः॥ धर्मशीलस्य यदोः तत्रांशेनावतीर्णस्य विष्णोः वीर्याणि नः अस्मभ्यं सं
शंस॥२॥ हे मुनिसत्तम विश्वात्मा भूतभावनो भगवान् यदोर्वंशेऽवतीर्य यानि कर्माणि कृतवान् तानि नः
अस्माकं विस्तरात् ... वद॥३॥ श्रीवासराजो ... जीशाहयः ... भक्तः॥

अत्र लोके त्रिविधा जनाः मुक्ता मुमुक्षवो विषयिणश्च तेषां मध्ये श्रवणकस्याप्यलं प्रत्यय इत्याह निवृत्ततर्षैरिति गतरसैर्मुक्तैरित्यर्थः ।
मुमुक्षूणामयमेवौषधमित्याह भवौषधादिति विषयिणां परमो विषयोऽयमेवेत्याह श्रोत्रमनोभिरामादिति अपगतासुभ्यः स्मात्
न स्वात्मानं हन्तीत्यपशुघ्नः तस्मात् पशुघ्नादिति वा ॥४॥ किं च अस्मत्कुलदैवतं च वर्तते इत्याह अनेनैव तेनैव नितरां त्रातान्ये त्याशये ना
हपितामहा इति अमरान् जयन्तीति ये तैर्देवव्रतो भीष्मः तदादिभिरतिरथैः तिमिङ्गिलतुल्यैर्दुरत्ययं वत्सपदमिव अक्लेशेन तरन्तः तेनात्मनैव तर
न्ति तत्त्वसमयः श्रीकृष्णचरणप्लवो येषां ते तथा स्वकीयवीर्याणि वदस्वेति ते तत्र पश्यतो गतेनान्यथा ॥५॥ न केवलं पाण्डवानेवारक्षत् इदं मम शरी

॥ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् । क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना
पशुघ्नात् ॥४॥ पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिङ्गिलैः । दुरत्ययं कौरवसैन्यसागरं कृत्वा
तरन्वत्सपदं स्म यत्प्लवाः ॥५॥ द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं संतानबीजं कुरुपाण्डवानाम् । जुगोप कुक्षिं
गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ॥६॥ वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकाल
रूपैः । प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ॥७॥

रमपि योऽरक्षत्तं च वर्णयेत्याह द्रौण्यस्त्रेति द्रौण्यस्त्रेण विप्लुष्टं दग्धमिदं मम शरीरं कुरूणां
पाण्डवानां च संतानस्य निदानं मम मातुः कुक्षिं प्रविश्य चक्रपाणिर्यो जुगोपेति ॥६॥ अखिलदेहभाजां सर्वप्राणिनाम् अन्त
र्बहिश्च पुरुषरूपेण कालरूपेण च मायया मनुष्यरूपेण वचनं मृत्युं संसारं तं तथा अपि अमृतं मोक्षं विद्युत्प्रतिक्षणं वीर्याणि
वदस्व ब्रूहि अयं भावः पुरुषरूपेण अन्तर्दृष्टीनां मुक्तिं बहिर्दृष्टीनां च कालरूपेण मृत्युं ददाति यतो ज्ञानदृष्ट्यैव
तद्वीर्याणि श्रोतव्यानीति ॥७॥ श्रीरूपनारायणनमः श्रीबाबासाबलाजीसाहपा श्रीरामानुजायनमः रस्मे:

व्रजे वास

ननु त्वं गर्गस्तारणं बहुमर्दविष्णुत्वं ध्रुवं वसुदेवसुतो हि रोहिण्यां नंदनादिभिः ह्युक्तं युदिति रोहिणीसुत नयो रामः प्रोक्तः वसु
देवसुदेवकन्याम षोडशानजीजनत् कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः भद्रं संमर्दनं भद्रं संकर्षणमहीश्वरं
अष्टमस्तु तयोरासीत्स्वयमेव हरिः किलेति पुनर्देवक्या गर्भसंबंधस्तस्यैवोक्तः अकुतोऽघटनादस्याक्षेपः कस्मा
दिति भगवतः कंसभयात्कंसं नवावृतिः सर्वदा मातुर्भ्रातरं कंसं तस्माद्धानहं अत्र वासतात् कस्मादवधीत् १०

॥ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया । देवक्या गर्भसंबंधः कुतो देहांतरं विना ॥ ८ ॥ कस्मा
न्मुकुंदो भगवान्पितुर्गेहाद्व्रजं गतः । क्व वासं ज्ञातिभिः सार्धं कृतवान्सात्वतां पतिः ॥ ९ ॥ व्रजे वसन्
किमकरोन्मधुपुर्यां च केशवः । भ्रातरं चावधीत्कंसं मातुरद्धातदर्हणं ॥ १० ॥ देहं मानुषमाश्रित्य कति
वर्षाणि वृष्णिभिः । यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ॥ ११ ॥ एतदन्यच्च सर्वं मे मुने कृष्ण
विचेष्टितं । वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तरं ॥ १२ ॥ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते
पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं ॥ १३ ॥ सूत उवाच ॥ एवं निशम्य भृगुनंदन साधुवादं वैयासकिः
स भगवानथ विष्णुरातं प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥ १४ ॥
श्रीशुक उवाच ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम । वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः ॥
वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि । वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ १६ ॥

११।१२ न तृप्यत्क्वेत्याह नैषेति क्षुत् अत्र वक्तव्या क्षुत् तृष्णा इत्यर्थः त्यक्तोदकस्यापि मम जीवनं हरिकथामृत
पानं निमित्तं तद्धि परमेश्वरस्यैव जीवनं तस्यापि इत्यर्थः एतन्निशम्य साधुवादः लक्ष्मीचीनप्रश्नः भागवतप्रधानः भागवते
षु श्रेष्ठः १४ । १५ व्यवसिता ... निश्चया ... नयति श्रीवत्सापनमः ...

विष्णुरातं
परीक्षितं

च ४ म ५

उदकस्य उदादेशः

विष्णुरात

साधुवादं ... स्तुति

॥ श्री रामः ॥
॥ २ ॥
११

वरवध्वोः पाणिग्रहणे चतुर्थिकामध्ये परीयते हानं तस्यादिवहमुच्यते

भा॰ १०. सू॰

तत्र भोजेन्द्रवंशे धकागारे भगवतोऽवतारप्रस्तावकथामाह शूरसेन इत्यादि पारद्ध्यायसमाप्तिः मथुरां आवसन् मथुरां प्रकाशवसन् विषयान् देशान् २७।२८ सूर्यया नवोढया प्रयाणे प्रयाणार्थं २९ रश्मीन् प्रग्रहान् जग्राहितान् २० पारिबर्हं उपस्करं ३१।३२।३३ आभाष्य देवकं संबोध्य हंतेति हनिष्यति ३४ कुलपांसनः कुलदूषणः आरब्धः उद्युक्तः कचे केशावंधे ३५ नृशंसं क्रूरं महाभाग इति आयं जानः स्वजन्मनिर्हर्षलग्दे वृदांनं दुर्धियो मे लोडा विभजवदवता रेरशास्य प्रनाकारतां संजवस्त्रीनिसांत्वयन् सुफ

॥ शूरसेनो यदुपतिर्मथुरामावसन्पुरीं माथुरान्शूरसेनांश्च विषयान्बुभुजे पुरा ॥२७॥ राजधानी ततः साभूत्सर्वयादवभूभुजां मथुरा भगवान्यत्र नित्यं संनिहितो हरिः ॥२८॥ तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः देवक्या सूर्यया सार्द्धं प्रयाणे रथमारुहत् ॥२९॥ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः ॥३०॥ चतुःशतं पारिबर्हं गजानां हेममालिनां अश्वानामयुतं साग्रं रथानां च त्रिषट्शतं ॥३१॥ दासीनां सुकुमारीणां द्वे शते समलंकृते दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ॥३२॥ शंखतूर्यमृदंगाश्च नेदुर्दुंदुभयः समं प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलं ॥३३॥ पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध ॥३४॥ इत्युक्तः स खलः पापो भोजानां कुलपांसनः भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत् ॥३५॥ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं वसुदेवो महाभा ॥

देवकस्य पत्न्यां काले यतो दर
शूरसेनाय सर्वस्य धर्मे रस्य पत्नी

शूरसेन रात वस कालात्तुग्रसेनस्य देवजातत्वात्

विषयत्वेनोपयन्ति शिष्यस्य मनःप्रमोदत्वेन संबोधयन् आत्मनेतात्पर्यं बोधयन् तत्रसामपंचविधिर्नेहे द्विविधिः तदुक्तं संबंध लौंनोपनतिरत्नेहोगुणकीर्तनं सामपंचविधं नैरोदबोदबोनपंक्तः तत्रसामाधनीयगुणाः इति कीर्तनं तगिनीमितिसंबंधः उत्तकोपमेति अत्रेदं कथं हन्यादिति स्त्रीवधो निरस्त्राय ये लोमनः उदाहएवं लोनिसंज्ञानवन्महा उपकारः ३५

४ उग्रसेनस्य लघुभ्राता देवकः ४

॥ आ सू० ॥ ३

नद्यनावतत्प्रथमं भगवद्वेनारूढरलेनामहः भूमिरित्यादिभिः नवभिः श्लोकैः॥ दृप्तनृपव्याजा ये दैत्यास्तेषामनीकशतानामयुतैर्भूरिभार
लोकेकानाः १७॥ विकोटंतिके ३पस्थितासती १८ १९ २० कोहवीं पुरुषस्य भगवतो गांवाचं मे मन्नः श्राम्यां एणुनमाचिरंश्वविलविनतंतथैव

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ १७ गौर्भूत्वाश्रुमुखी खिन्ना
क्रंदंती करुणं विभोः उपस्थितांतिके तस्मै व्यसनं स्वमवोचत १८ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह जगा
मसत्रिनयनस्तीरं क्षीरपयोनिधेः १९ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं पुरुषं पुरुषसूक्तेन उपतस्थे समाहि
तः २० गिरं समाधौ गगने समीरितां निशाम्य वेधास्त्रिदशानुवाचह गां पौरुषीं मे शृणुतामराः पुनर्विधीयता
माशु तथैव माचिरं २१ पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां स यावदुर्व्याभरमीश्वरेश्वरः
स्वकालशक्त्या क्षपयंश्चरेद्भुवि २२ वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः जनिष्यते तत्प्रियार्थं संभवंतु सुर
स्त्रियः २३ वासुदेवकलानंतः सहस्रवदनः स्वराट् अग्रतो भविता देवो हरेः प्रियचिकीर्षया २४ विष्णो
र्माया भगवती यया संमोहितं जगत् आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति २५ श्रीमद्भागवत ॥ २
इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ २६ शूरसेनः

ग्राणध यामाः

वृषो धर्मस्तत्फलं सुखं समंतात् कं सुखं तद्दधिष्ठातृजीवरूपेणापि वतिमुक्तेनं

द्वितीयतां चेति २१ विज्ञापनात्पूर्वमेव पुंसा ईश्वरेण धराया ज्वरस्तापः २२ देवकीगर्भसंकर्षणयशोदामोहनादिकार्यार्थे
२३॥२४॥

भा॰ए॰टी॰ ४

देहविषयावेवस्मृतिनाशपरिणामौ दर्शयितुं दृष्टांतांतरमाह स्वप्न इति दृष्टं राजादिदर्शनेन श्रुतं इन्द्रादिश्रवणेन तान्यभिहितस्य
स्वकारणमनसा तद्देवानुचिंतयन् ईदृशं जाग्रत्तद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमपि स्वनिरूपं पश्यति तत्क्षणं तदैव तदेवाहमिति प्रपद्यते तेन तत्र जाग्रद्देहादप्यगतस्मृतिर्भवति पुरुषो यथेति जाग्रत्येव दर्शयितुं दृष्टांतांतरमाह मनोरथेनेति
मनोरथेन स्वस्थाने
चरन्
...
जाग्रत्यपि दृष्टश्रुतान्यामित्यादि सर्वं योज्यं तथा च वर्तते तीति जंतोर्वैक स्वचित्तेनोर्ध्वं स्मरतस्तं न विस्मरति जन्मत्वात्मन्यापुंसः सर्व
भावेन स्मरति विषयस्तीर्थ्यतिप्राकृर्य यात्वप्न मनोरथो स्व प्रमनोरथं चेत्यं प्राक्तनं न स्मरत्यसावित्यादि तद्वत्रापि कर्म
यथा कं चिद्दुर्दीपतिं दृष्ट्वा मिलवते ग्रहमपीदृशं कं यथा स्यामिति नामहाव हृधनिनः ईदृग्विधा एव पुरा सन्नित्यादि मनोरथेनाभिनिविष्टचित्तः स
न जाग्रत्स्वेव तत्रोपगत
स्मृतिर्भवतीत्यर्थः ३

॥ स्वप्ने यथा पश्यति देहमीदृशं ॥ मनोरथेनाभिनिविष्टचेतनः ॥ दृष्टश्रुताभ्यां
॥ मनसानुचिंतयन्प्रपद्यते तत्किमपि ह्यपस्मृतिः ॥ ४० ॥ जंतोर्यतो धावति
॥ दैवचोदितं ॥ मनो विकारात्मकमाप पंचसु ॥ गुणेषु मायारचितेषु देह्य
॥ सौ प्रपद्यमानः सह तेन जायते ॥ ४१ ॥

वशाद्देहांतरं प्राप्य प्राक्तनं त्यजतीति ॥ ४० ॥ ननु विचित्रदेहहेतूनां कर्मणां कृतत्वाद्देहविशेषप्राप्तौ किं कारणमत आह ॥ रचितेषु मायया र
यतो यत इति देहस्य पंचत्वसमये पंचसु गुणेषु शब्दादिषु मायया नादिहरूपेण रचितेषु दैवेन फलोन्मुखेन कर्म
णा चोदितं नानाविकारात्मकं मनो यं यं देहं देवतिर्यगादिरूपं प्रति धावति धावच्चासन्नयमाप्य प्राप्नोति चेत्तेन प्राप्तं त ॥ माप्नोति ॥
त्र तत्र सूक्ष्मसौ देही जायते ननु मनसः कर्तृत्वाद्देवजायतां न त्वात्मनस्तत्राह प्रपद्यमान इति तदेवाहमिति प्रपद्यमानः ॥ ४
म तेन सह जायत इति ॥ ४१ ॥
मनस ना मार मनः

३६ मरणभयेन हन्मीति चेत् । तस्यापि मरणस्यापरिहरणीयत्वाद्देहान्तरस्यावश्यंभावित्वात्तत्रापि च भोगप्रेमास्पद-
त्वादीनामविशेषाद्भयेन पापाचरणमयुक्तमित्यभिप्रेत्याह । मृत्युर्जन्मवतामित्यादिना देहेन सह इति । विधात्रा ललाटे लि-
खितत्वादिति । तथापि कालविलंबनार्थं हन्मीति चेत्तत्राह । अद्य वेति । अवश्यंभाविनि मरणे तु विलंबमात्राय पापाचरणम-
युक्तमिति भावः ३७ किं च अस्मिन्देहे गते यदि देहान्तरं न स्यात्तर्हि एवमपि न स्यात् तत्तु नेत्याह । देहे पंचत्वमाप-

॥ वसुदेव उवाच ॥ श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः ॥ स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ॥ ३६ ॥ मृत्युर्जन्मवतां वीर देहेन सह जायते ॥ अद्य वाब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ३७ ॥ देहे पंचत्वमापन्ने देही कर्मानुगोऽवशः ॥ देहांतरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥ ३८ ॥ व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति ॥ यथा तृणजलौकैवं देही कर्मगतिं गतः ॥ ३९ ॥

न्न इति । आपन्ने प्राप्ते कर्मवशादस्वतन्त्रः एव प्रथमं देहान्तरं प्राप्य पुरातनं पूर्वं वपुस्त्यजति ३८ अत्र दृष्टान्तः । व्रजन्निति
एकेनाग्रतो निहितेन पदा तिष्ठन्नेवमवष्टभ्य देहं बिभ्रत् । पश्चादन्येन पूर्वप्रदेशादुत्पाद्य पुरो निहितेन गच्छति तद्व-
त् । अयं च स्वीकारपरित्यागौ नात्यंतं भिन्नविषयाविति स्पष्टं दृष्टान्तान्तरमाह । यथा तृणजलौकेति । सा हि तृणान्तरमवष्टभ्य
पूर्वं तृणं त्यजति एवं कर्मपथे वर्तमानो जीवोऽपि ३९

नतु खलोपमेतन्मम सन्ते तान्शंक्याह खपमेव मत्युरिति ४७ तस्मादुपेक्षादोषपरिहारायैवं करिष्यामीत्याह प्रदायेति मत्यजेकं सायनन्विद्‌मपि नैवन्या
प्यामित्याशंक्याह सुताइति असौ यदि सुता मे जायेरन् तदायद्यपितद्भवतु जीवितं तु तावद्भवेदेवेतदरणम्य एमेव म्रियेत नरेन किंचिदन्या
पं ४८ यदि च सुता भविष्यंति नचाहं म्रियेत तदा मत्पुत्रादेवास्य मरणमिति विपर्ययो वा किं न स्यात् ननु शो ठस्य कं सस्पत वालकालं कथं
मृत्युः स्यात्तत्राह गतिरिति धातुः अस्यास्वामव मोगभो हं तेत्युक्तवतः अतइदानीमपत्यार्थ्यं प्रतिज्ञैव मंत्रः तथापि उपस्थितो मृत्यु

मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं यद्यसौ न निवर्त्तेत नापराधोऽस्ति देहिनः ४७ आज्ञाप्य मृत्यवे पुत्रान्नो च
वै कृपणाम्मिमौ सुता मे यदि जायेरन् मृत्युर्वा न म्रियेत च ४८ विपर्ययो वापि किं न स्याद्गतिर्धातुर्दुरत्यया उप
स्थितो निवर्त्तेत निवृत्तः पुनरापतेत् ४९ अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति एवं हि
जंतोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ५० एवं विमृश्य तं पापं यावदात्मनिदर्शनं पूजयामास वै शौरिर्बहु
मानपुरःसरं ५१ प्रसन्नवदनाम्भोजो नृशंसं निरपत्रपं मनसा दूयमानेन विहसन्निदमब्रवीत् ५२

त्यावन्निवर्त्तेत निवृत्तः पुनः कालान्तरे [illegible] आपतेच्चेत् तथा न पराधो मम मृत्युर्थः प्रथवा मत्पुत्रादुपस्थितो मृत्युः असावधा यो निवर्त्तेत स पु
त्रेणेन मन्मंत्रेण भवेदेवेति पद्य गतिर्धातुर्दुरत्यये त्येतस्याश्रयं च उपस्थित इति ४९ प्राणिनामदृष्टं च दुर्विवेचकमिति सदृष्टांतमाह अग्नेरिति
वने वृक्षान्प्रदहन्वह्निः सन्निहितानपि दारून्नस्पृशति कदाचिन् दूरस्थानपि दहति ग्रामिण्ं हात्वा नतस्य प्रामाण्य दृष्टव्यतिरेकेण किंचिन्नि
यामकमस्ति यथा एवं जंतोर्जन्ममरणयोरपि हेतुर्दुर्विभाव्यः अचिंत्यः ५० यावदात्मनिदर्शनं स्वप्रज्ञा यथाधि विचार्य ५१ तस्य विश्वासाय प्रवि
कसितमुखांभोजः यस्य सन्नब्रवीत् ५२

ननु सत्यं भविष्यत्येवं किमपि देहमात्रं तथाप्यस्माभिः प्रियस्यात्मदेहस्य रक्षणं परैः समभिक्रियत इति चेत् तत्राह

ज्योतिरिति अदः अभ्रं इत्यादि । उदकयुक्तेषु पार्थिवेषु घटादिषु यद्वा उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिंबेन स्थितं समी

रस्य वायोर्वेगमनुगतं कंपादियुक्तं प्रतीयते तथा एवं स्वाविद्यारचितेषु गुणेषु देहेषु असौ रागेणानुगतः प्रविष्टो मुह्यति

अभिनिवेशं प्राप्नोति अयं भावः आत्मनस्तावद्देहाद्यध्यासात् जन्मो नेत्यसहते न जायत इति तत्रान्योन्याध्यासमा

ध्यासाद्यथा देहधर्माः कार्श्यादयः आत्मनि प्रतीयन्ते एवमात्मनो धर्माः प्रेमास्पदत्वादयोऽपि देहादिष्विति रागानु

ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागा

नुगतो विमुह्यति ४२ तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयं ४३ विवेको

एषा तवानुजा बाला कृपणा पुत्रिकोपमा हन्तुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल ४४ श्रीशुक उवाच एवं स साम

भिर्भेदैर्बोध्यमानोऽपि दारुणः नन्यवर्तत कौरव्य पुरुषादाननुव्रतः ४५ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः

प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ॥ ४६

करदेहयोर्विशेषाभावात् व्यर्थो मत्पुत्रवधोऽकार इति ४२ एवमुक्तं सामोपायमुपसंहरन् भेदमाह तस्मादिति परत इति अभिद्रुह्यमाना

संबंधिनः स्वयमात्मापि भयमिति भेदो दर्शितः इहामुत्र च ४३ पुनः साममाह एषेति पुत्रिकोपमा दुहितृसमा वा चोतन प्रथमा ४४ बोध्यमानः

उपदिश्यमानः स्वयं दारुणः पुनः पुरुषादान् दैत्याननुव्रतः इति आनकदुंदुभिरिति पदं महाभागोऽपि तथोक्तोऽभिप्रायः प्रतिव्योढुं

॥ भा० द० स्कं० ॥
९

कंसस्य शांति र्देवकार्यानुगुणानि नवनीतिनारदस्य प्रत्यवस्थानं नंदाद्य नंदाद्या इत्यादि त्रयेण ॥ अथ योर्वसुदेव नंदकुलयो र्[illegible]
मर्देववत्तमिति शेषः ॥ निगडैः स्वबंधनैः ॥ अजनो विष्णुस्तद्वकृपया ॥ इति दशमे प्रथम ॥ १ ॥ द्वितीये कंसघाताय देवक्यागर्भमोहनं
[illegible]

नंदाद्याये व्रजे गोपा याश्चामीषांच योषितः ॥ वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥ ६२ ॥ सर्वे वै देवताप्रा॥
॥या उभयोरपि भारत ॥ ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ॥ ६३ ॥ एतत्कंसाय भगवांछशंसाभ्येत्य नारदः ॥ भूमे॥
॥र्भारायमाणानां दैत्यानां च वधोद्यमं ॥ ६४ ॥ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति ॥ देवक्या गर्भसंभूतं विष्णुं च॥
॥स्ववधं प्रति ॥ ६५ ॥ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे ॥ जातं जातमहन्पुत्रं तयोरजनशंकया ॥ ६६ ॥ मातरं पितरं॥
॥भ्रातॄन्सर्वांश्च सुहृदस्तथा ॥ घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ॥ ६७ ॥ आत्मानमिह संजातं जानन्॥
॥प्राग्विष्णुना हतं ॥ महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥ ६८ ॥ उग्रसेनं च पितरं यदुभोजांधकाधिपं ॥ स्व॥
॥यं निगृह्य बुभुजे शूरसेनान्महाबलः ॥ ६९ ॥ इति श्रीभागवते दशमस्कंधे प्रथमोध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ प्र॥
॥लंबबकचाणूरतृणावर्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥ अन्यैश्चासुरभूपालैर्बाणभौ॥
॥मादिभिर्युतः ॥ यदूनां कदनं चक्रे बली मागधसंश्रयः ॥ २ ॥ ते पीडिता निविविशुः कुरुपांचालकेकयान् ॥ शाल्वा॥
[illegible] ॥ न्विदर्भान्निषधान्विदेहान्कोशलानपि ॥ ३ ॥ [illegible]
[illegible] ॥ [illegible] ॥ एतत्वावकामसुर [illegible]
[illegible]
त्र स्राहिरिणिः सुतः साच सा [illegible] यत्र ॥ यदुभिः संव्यरुध्यत इत्युक्तं तमेव विवृणोति अधप्रपंचयति ॥ त्वरया देवकीगर्भ॥
स्यान्यत्र संचारणं भगवतः प्रवेशं च कृष्ण प्रलंबेत्यादि सार्द्धत्रयेण ह महाशनोऽघासुरः ॥ ३ ॥ श्रीराधावल्लभो जयति ॥ [illegible]
मागधो जरासंधः ॥ ततः दृष्टिम् [illegible] ततः [illegible] ॥ ॥ ते जदवाः नानतां [illegible] दशाः [illegible]

देवकसुतं तद्वेदतस्य कालनेमे [illegible] [illegible]

गृहीत

॥ श्री सख्या ॥
॥ ९ ॥

पतनप्रयोगःपातीति ली रागाहनतन्न याहिनि स्थितं ग्रस्ताः ॥ सकृपा सौजन्येन पंनास्ति ॥ यतो येभ्य पुत्रेभ्यस्तेन त्वप्युपस्थितं ॥ अष्टमो
हंतेत्युक्तेग्रन्येभ्यो भयेत्तया सद्यैव मान्नवेपुरित्यद्भुतत्तेनास्याः ॥ पुत्रान्समर्पयिष्ये ॥ अत्रविवक्षेनिरस्तः तद्दस्ये
साठ उपपत्तिं ॥ तदिति ५४ प्रसूतिकाले प्राप्ते सर्वा कीत्याच गत्वा नेव देवता यस्याः ॥ सातथा सर्वदेव मयीतिवान
गवहन्त्र पत्वात ॥ ५५ ॥ मत्स्यवेपुत्रं कथं मर्पितवानित्यपेक्षायामाह ॥ किंदुः सहमिति ॥ साधूनां सत्सत्यधानां पुत्रलालि

॥ श्रीवसुदेव उवाच ॥ नह्यस्यास्तेभयंसौम्य यद्वैसाहाशरीरवाक् ॥ पुत्रान्समर्पयिष्येऽस्या यतस्तेभयमु
॥ त्थितं ॥ ५३ ॥ श्रीशुक उवाच ॥ स्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित् ॥ वसुदेवोपि तं प्रीतः प्रशंस्य
॥ प्राविशद्गृहं ॥ ५४ ॥ अथ काल उपावृत्ते देवकी सर्वदेवता ॥ पुत्रान्प्रसुषुवेचाष्टौ कन्यांचैवानुवत्सरं ॥ ५५ ॥
॥ कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः ॥ अर्पयामास कृच्छ्रेण सोऽनृताद्तिविह्वलः ॥ किंदुःसहंनु साधू
॥ नां विदुषांकिमपेक्षितं ॥ किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां ॥ ५६ ॥ दृष्ट्वा समत्वं तच्छौरेः सत्ये
॥ चैवव्यवस्थितं ॥ कंसस्तुष्टमना राजन्प्रहसन्निदमब्रवीत् ॥ ५७ ॥ प्रतियातु कुमारोयं नह्यस्मादस्तिमेभयं ॥
॥ अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः किल ॥ ५८ ॥ तथेति सुतमादाय ययावानकदुंदुभिः ॥ नाभ्यनंदत तद्वा
॥ क्यमसतोऽविजितात्मनः ॥ ५९ ॥

नसुस्तायेताकथं त्यक्तेति मत्र तत्राह ॥ विदुषामिति भगवानेव तत्त्वं नान्यदिति जानतामित्यर्थः ॥ ननु स्वयं नीतेसतिकं
सो बालं नहत्यादितिमत्वा नीमवानित्यति किं नस्यादिति तेनेत्याह ॥ किमकार्यमिति ॥ ननु च देवकी कथं पुत्रं नत्यजेत्यतआह
दुस्त्यजमिति ॥ तच्चित्ते ५८ तत्राह हरियैस्त्रेवा ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ श्रीवासायस्यायतलांजीनमः ॥ श्रीराधेकृष्णः ॥

भा० द

सर्वेभ्युत्रादीन्कामयंति ये तेभ्यो वरान् ईश्वरीं भेष्यन्नि यंत्री अर्चिकामानां सर्वान्कामान् वरान् प्रददाति या तां १०।११।१२। चंद्रिकेति

रामेति तस्य नाम भविष्यतीत्याह गर्भसंकर्षणादित्यादिना रामेति च संकर्षिष्यति लोकं रमणात् रम्यत्वाद्वादिति १३

तथेति पुनरपि ओमिति आत्मादरेण पूर्वाद्गु गां पृथ्वीं गतासगीतथैवाकरोत् १४ विशंति पतति इत्यर्थः इति विचुकुशुः

जनुत हा हा इत्यर्थः १५ मन आविवेश मनस्याविर्बभूव जीवानामिव न धातु संबंध इत्यर्थः १६ धाममूर्तिः १७ जगन्मं

गलं जगतां मूर्तिमन्मंगलं अच्युतांशं अच्युताः च्युतिरहिताः अंशा ऐश्वर्यादयो यस्य तं यद्वा अच्युतस्य अंशं

अर्चिष्यंति मनुष्या त्वां सर्वकामवरेश्वरीं धूपोपहारबलिभिः सर्वकामफलप्रदां १० नामधेयानि कुर्वंति

स्थानानि च नरा भुवि दुर्गेति भद्रकालीति विजया वैष्णवीति च ११ कुमुदा चंडिका कृष्णा माधवी कन्यकेति च मा

या नारायणी ईशानी शारदेत्यंबिकेति च १२ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं बुधाः रामेति लोकरमणा

द्बलभद्रं बलोच्छ्रयात् १३ संदिष्टैवं भगवता तथेत्योमिति तद्वचः प्रतिगृह्य परिक्रम्य गां गता तत्तथाकरोत् १४

गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः १५ भगवानपि विश्वात्मा

भक्तानामभयंकरः आविवेशांशभागेन मन आनकदुंदुभेः १६ स बिभ्रत्पौरुषं धाम राजमानो यथा रविः

दुरासदोतिदुर्धर्षो भूतानां संबभूव ह १७ ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी

दधार सर्वात्मकमात्मभूतं काष्ठा यथानंदकरं मनसाः १८

स्वांशांशभक्ता युग्म रूपपरिच्छिन्नमिव वपुरित्यर्थः समग्रभूतमेव आहितं वेधपीठ्या अर्पितं देवी द्योतमानाशु

द्धसत्त्वेत्यर्थः सर्वात्मकं सर्वस्यात्मनं अतएवात्मभूतं स्वात्मन्यासीदेव संतं मनसाः मनसैव दधार धृतवती अत्रानु

रूपं दृष्टांतमाह यथा काष्ठा प्राची दिक् आनं

अनुरुंधाना अनुवर्तमानाः ४ धामकलात्मदेवस्य सप्तमो गर्भो बभूव किंभूतमेत्यत आह यमनंतमिति हर्षशोकविवर्द्धनः आनंदस्वरूपत्वा
त्तोषेऽस्मिन् हर्षः पूर्वगर्भसाधारण्य दृष्ट्या शोक इति अगदिशत् आज्ञां दत्तवान् ५।६ ननु रोहिणी गोकुले किमित्यास्ते अत आह अन्याश्चेति
न केवलं सैव अन्यापि इति विवरेषु अलक्ष्यस्थाने षु ७ जठरे संतं तं तत आकृष्य मारेण गर्भः स्रपं भवेत् अत आह मैवमहं सामर्थ्यात् तत्र ति
मर्षमेव कार्यमित्यत आह अथेत्यंशभागेनेति अंशांशत्वमिभिर्भजने अधीति अनति सर्वान् अस्मादिस्तांभ पर्यंतान् इति
शाभागः तेन परिपूर्णेन रूपेणेत्यर्थः यद्वा अंशेन ज्ञानैश्वर्यबलादिभिर्भजनीयं पति स्वीपाश्रितत्वात्तेन यद्वा अंशेन पुरुषेण

एके तमनुरुंधाना ज्ञातयः पर्युपासते मथुरायां स्थिता केचिदक्रूराद्या विशांपते ४ हतेषु षट्सु बालेषु
देवक्या औग्रसेनिना सप्तमो वैष्णवं धाम यमनंतं प्रचक्षते ५ गर्भो बभूव देवक्या हर्षशोकविवर्द्धनः भगवानपि
विश्वात्मा विदित्वा कंसजं भयं ६ यदूनां निजनाथानां योगमायां समादिशत् गच्छ देवि व्रजं भद्रे गोपगोभिरलं
कृतं रोहिणी वसुदेवस्य भार्यास्ते नंदगोकुले अन्याश्च कंससंविग्ना विवरेषु वसंति हि ८ देवक्या जठरे गर्भं शेषाख्यं धा
म मामकं तत्संनिकृष्य रोहिण्या उदरे संनिवेशय अथाहमंशभागेन देवक्याः पुत्रतां शुभे प्राप्स्यामि त्वं यशोदायां
नंदपत्न्यां भविष्यसि ॥ ९

मायाभागो भजनं स्वरूपं यस्य तेन यद्वा अंशेन मायागुणत्वमाद्यादिरूपाः भागा भेदा यस्य तेन यद्वा अंशा ये च म
त्स्याद्यादिरूपाः भजनीयाः न मुक्ता हाः स्वरूपं यस्य तेन अथवा अंशेन ज्ञानबलादिभिर्भजनं अनुवर्तनं भक्तेषु यस्य ते
न यद्वा यापरिपूर्णेन रूपेणेति च विवक्षितां कृत्वा तु भगवान् स्वयमित्युक्तवानिति ना प्रोत्साहयति ९ कृत्वा राधाभ्यां नमः

मतपंचकात

प्रतिष्ठितं सत्यं ब्रह्मवित्सु दृष्टा॥ सत्ये सत्ये नेत्रं पूर्वमंत्रे एवं निःसत्यव्रतमिति। सत्यं तं सत्यसंकल्पो यस्य तं। सत्यसंकल्पमित्यर्थः। सत्य परं सत्यं। परं ब्रह्म प्राप्तिसाधनं। यस्मिन् तं। त्रिसत्यं त्रिष्वपि कालेषु सत्यः। सर्वं प्रलयानंतरं च स्थितिसमये च सत्यं। अस्मिन्ना दृश्यवर्तमानं तद्वाचु। सत्यस्य योनिं यिति। सत्यं च तत्पञ्चभूतं ज्ञानं सत्यस्य नेतृ। दृश्यमाना कारणो एवं सत्यं सत्येन तत्पंचकं॥ तत्सत्य मिमा ग्रंतत। इतिश्रुतेः। तस्य योनिं कारणं। अनेन पूर्वं वर्तमानत्वोक्तो। नयात्सत्येत स्मिन्नेव निहितं। वृत्तपर्यंतमिति। स्थितं। अत्र नास्ति सत्यमवयोपि सत्यस्य सत्यमृतं। नयात्सत्येवसत्यं सत्यं। सत्यं। पर मार्थिकं का शेषव्यावहारिकमात्रं पं। अनेन प्रलये यद्वधित्वे न सत्यत्वेरार्थितं। एवंविधं सत्यं तु पयान्तितं। नयोऽन्तः सत्यनेत्रं। ऋतं च सत्यं च तयोर्वाणी। सत्यं च समदर्शनं। नयान्तर्गवतां व्याख्यानं कामाना सत्यं च समदर्शनं। ऋतं च सत्यं च तयोर्वाणी कवि[illegible]ः पारकीर्तिरिति। नयोनेत्रं नेतारं प्रवर्तकमिति कावत्। एवं सर्वप्रकारेण नमनसाधनं।

॥ब्रह्मोवाच॥ सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये। सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं॥
॥त्वां शरणं प्रपन्नाः॥२६॥ एकायनोसौ द्विफलस्त्रिमूलश्चतूरसः॥ पंचविधः षडात्मा॥ सप्तत्वगष्ट
॥विटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः॥२७॥

१ द्विफल॰ सत्यात्मकं त्वां भगवंतं वयं शरणं प्रपन्नाः॥ ... तु नवनीतोपि लोकेभ्यः एव तुल्या एव क्रियमिति प्रणतोः प्रपद्ये तेनैवं नाच्यत मेवैकः। सर्वस्मात्। सर्वसंसारकारणत्वात् ... प्रपंचरूपेण शरणोपेत। लोकादिरूपेण च सर्वत्वं ... मिति रेकेणानासीति वक्तुं दैतप्रपंचं रूपत्वेन केवलात्मनि प्रपद्यति। एकायनः इति। श्लोकोपि प्रपंचं प्राहिवृक्षः ... सुनिरसः। समष्टिव्यष्टिदेहरूपः। एकायनं एकायनः। एका प्रकृतिः यन्नाम यथा योयस्य। द्वे सुखदुःखे फले यस्य सः। त्रयो गुणाः मूलानि यस्य सः। धर्मार्थकाममोक्षा अत्र रसा यस्य सः॥ पंचइंद्रियाणि विधा ज्ञानप्रकारा यस्य सः। षडूर्मयः शोकमोहौ जरामृत्यू क्षुत्पिपासे आत्मानः स्वभावा यस्य सः। सप्तधातवः॥ त्वचो यस्य सः। पंचमहाभूतानि मनो बुद्धिरहंकारश्चेत्यष्टविटपाः। शाखा यस्य सः। नवद्वाराणि अक्षाणि छिद्राणि यस्य सः। दश प्राणाः पत्राणि यस्य सः॥ दशच्छदी॥ जीवेश्वरौ खगौ पक्षिणौ यस्मिन् स द्विखगः॥२७॥ प्राणोपानस्तथा व्यानः समानोदान एव च। नागः कूर्मश्च कृकरो देवदत्तो धनंजयः।

प्राण पान व्यानो दान समान नाग कूर्म कृकल देवदत्त धनंजया

त्वङ्मांसमेदोमज्जास्थिशुक्रं।

जरामृत्यू शोकमोहौ क्षुत्पिपासे च षडूर्मयः।
जायते स्ति वर्धते विपरिणमते अपक्षीयते नश्यत इति कोशाः॥

॥भा॰द॰टी॰॥ ॥८॥

८५२ हरि३ २४ वलेस्नान२ यथा२

सर्वजगन्निवासस्य श्रीहरेर्निवासभूतामप्यपिनितरां सर्वजनास्तात्कृतपानदेजेकिंतु स्वयमेवानंदमन्वनवरतपनः। कंसस्याग्रेहे हरिः
भूमेर्देहे ऽपचते। पदारिबुद्रग्रामगृन्निशिखरोरी यंकस्मिन्केवनतयासती शोभमाना सदेवेनीसानवंचवटं तद्वीद्वास्येषा मनुपकारि लीवत
जनेनदनतां॥ नतु प्रभवयावनविरोचयेनी। प्रजितं भुमनतत्कृषिमध्येप सान्ता। एषविरोजमान। भूवंहोरदेयपतपसानं इहि
शीघ्रर्नासीत॥२॥ ननु संततिमामादयउयाया॥ नेतिस्वयमेवाह। भूपमर्यनं चोदेकार्यप्रधानः। विक्रमं नविहंतिमदधेपदाक्रमं

नेमयातक्कि
नभुशाक्ति
दरतायन

॥सोदेवक्षासर्वजगन्निवासनिवासनभूतानितरां नरेजे। सोजेदंग्नहेम्निचरिषेवहद्वाभुरसेवनीकानवली॥
॥ययाललताप्रे। मांधीन्यकेसः। पूनयाजितोतरांविरोचयंतीभवनं भूनिचस्त्रित्रं मां। भूदैवमेघ्राणोहरोहरि॥
॥गृहानंकृवंचरित्रनोपदन्त्रपुरेणूनीहयो॥ किमध्येनसिन्ककरणीयमाभूमेयदर्थनंत्रोनविहंतिदिक्रमं॥ वधल तनार
॥विपावनगृहमस्यावधोयेपशः प्रियेहत्यनुकालमायुः॥ स्वेयेसजीव नेवेलसंपरेतोबर्तेन॥
॥योत्यंत्रनशोषितेनदेहमतेतमनुजाः शापूतिगतातंमोधंतनुमानिनोभुवं॥२२॥ इतिपोतमाश्रवा॥
॥त्तेविदर्नःस्वयंप्रनुः॥ श्रालेषुनीतनूतञ्ज्वर्मोहरेर्वैतनुबंधरस्त॥२३॥ श्राशीनः सोविरश्लिष्टनरनृजानेप॥
॥पटम्महीचित्रपानोहृषीकेशमयपश्यतन्मयंजगत्॥२४॥ वलानवश्वतत्रे समुनिस्त्रिर्मारहादिभिःदेवैः॥
॥सानुचरैः॥ श्रावंगीतिर्वतामेदयत्॥२५॥

सप कोरिष्यंवेत्यर्थः। यद्ग्तर्हिदत्तानीमेवहन्य तामितिविचिंत्याह। भूपर्यतंत्रोपिप्रमानत्वंविक्रमं नविहंतिननाशयेति। त्यविधेतस्मा
त्स्यारितिकवः॥ नरेवाहत्रिपादिवि। गृरुसमत्तागुर्विरेणा॥२१॥ किंचससदेषजीवन्तपिमृतस्पात्। नूशंक्षिते न कैर्यो एलोकेवर्तेन
नंजीवंतमेवमनुजाः शावंतिकुर्वन्केचिधिपूकुर्वंति। मत्वदेहस्ते तेनतुमानिनः। पाषिनोलोकनकेगच्छंति। पूथवाशायधकामे
वाहतनुमानिनोऽस्पदेहस्तेयं भुवमंधंतमोगताग[illegible]मिष्यंतितिनीति॥२२॥ सविष्णूनशपानः॥२४॥ स्माविस्तिर्मरादिभिः स्वस्वकल्पसर्वर्षि

स्वकार्यप्रधानैःपृनष्व:

हरेर्वैतानुबंधनिमित्तंस्मरणंकीर्तनं
कृतेतीतितत्तदेवाहस्वासीनइति

हे अरविंदाक्ष कमलनैन मुक्तमानी जो पुरुष है कै हम मुक्त भये औ तुमारे विषै भक्ति नहीं है जिनकी औ तातैं निर्मल बुद्धि नहीं है जिनकी सो कष्ट जो हान
व्रत तपस्या

॥भा०१०पू०॥
॥९॥

ननु विवेकिनां मद्भजनेन मुक्ता एव दृश्यंते तत्राहुः॥ ये ऽन्य इति विमुक्तमानिनः॥ विमुक्ता वयमिति मन्यमानाः त्वयि अस्तो निरस्तो भावो येषां त
स्मात् कैवल्यादिस्वार्थः॥ न विशुद्धा बुद्धिर्येषां ते तथा॥ पदं त्वत्पदं कृच्छ्रेणा॥ इति ते ऽरःमकर्मतपः॥ आरुह्य त्वय्यविशुद्धबुद्धयः॥ किंचु लब
ध्वं अनादृततया॥ परं परमोत्तमं सिद्धिं तं सत्कुलेन तपः॥ सुतो ऽपि स्मात् स्वधर्माद्भ्रष्टत्वं निषिद्धं दर्शितं रूपं तेन॥ अहं तेषु मुक्तं च्युतोपेक्ष
त्वं ये त्वदीयास्तु न कदाचिदपि पतंतीत्याहुः॥ तथेति॥ विनायका विघ्नहेतवः॥ तेषामनीकानि सेनाः तानि॥ पांति ते षां मूर्द्धसु विच

॥ये ऽन्ये ऽरविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः॥ आरुह्य कृच्छ्रेण परं॥
॥पदं ततः॥ पतंत्यधो ऽनादृतयुष्मदंघ्रयः॥३२॥ तथा न ते माधव तावकाः क्वचिद्भ्र॥
॥श्यंति मार्गात्त्वयि बद्धसौहृदाः॥ त्वयाभिगुप्ता विचरंति निर्भया विनायकानीक॥
॥पमूर्द्धसु प्रभो॥३३॥ सत्त्वं विशुद्धं श्रयते भवान्स्थितौ शरीरिणां श्रेय उपायनं व॥
॥पुः॥ वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते॥३४॥ श्रीरस्तु॥

रंतीति विघ्नान् जयंतीत्यर्थः॥३३॥ ननु तां सुखेनावहानि निरूप्या निधार्य पर्सीयुक्तं॥ विमर्शि त्वत्पाणि॥ न केन प्रकारेण सखा वह्नि
वाणि त्वयि ये स्तायामाहुः॥ सत्त्वं विशुद्धमिति॥ सत्त्वं वपुः श्रयते इत्यन्वयः॥ श्रेय उपायनं कर्मफलदातृत्वं॥ कथं येन वपुषा ज
नः तवार्हणं पूजां समीहते करोति॥ कैः॥ वेदश्च क्रियायोगश्च तपश्च समाधिश्च तैः॥ चतुराश्रमधर्मैरित्यर्थः॥ वपुषो नाश्र
॥यत्वे ऽर्हणासंभवात् न कर्मफलसिद्धिः स्यात्॥३४॥ ॥श्रीरस्तु॥
॥९॥

है जा वनु तुमारी माया करके संवृत नाम रूप के हैं चित जिनके सो तुम को नाना प्रकार करके देखै। औ ज्ञानी पुरुष है सो हे तुम को एकही रूप करके सर्वत्र देखै
तें हैं। तुम कैसे हौ अस त् जो संसार है तिसके प्रसूति होत्पन्न के करणे वाले हौ औ घोरणा नाम प्रलय करने वाले हौ औ अनुग्रह नाम प्रतपालन के करने वाले हौ ॥२८॥ हे अबोध
एवं त्वं नलस्य संसारस्य सतः। कार्यस्य त्वमेक एव प्रसूतिः। प्रकर्षेण सूतिर्जन्म यस्मात् सर्वस्ते कारणमित्यर्थः। त्वं सन्निधाने
नैव सत्स्वपि धीयते यस्मिन् इति लपस्थानं। त्वमेवानुगृह्णः अनुगृह्णातीति पालकः। नत्तु लविभुत्वरूपं एवं तु तु प्रसि
ग्रं कथम हमेवेति चेत् तु गृह। त्वन्मायये तिसंवृतमेवहि। संवृतो ज्ञानयेषां ते त्वामेव नाना पश्यन्ति। येनुविपश्चितो विद्वांसस्ते
त एवानपश्यन्ति॥२८॥ अनुत्वेवक्तीङ्गुणमा कथमेवं वर्णयतिचेत्तत्राह। विमर्षीति। अवबोधैकरूप। ज्ञानात्वमेवरूपा
ति मूढा॥ विमर्षिपत्से नतु त्वं कस्यापि पुत्र इत्यर्थः। सेमायपालनायसता धर्मवर्तिना पुत्रः करालि। रवलनामचकत्ति
मारा कानि॥ नकेवलमेतावता। नक्षानामोहायमयीत्याह। नयीति। त्वयि समाधिना वेशितचेतसां निचिन्तान्त्वे
त्याह येते नाश्रितेनैके पुरुषोत्तिविविदितः। महद्भिरज्ञेन सेव्य तयाल्यापारिते न। यद्वा इत्ययिमामापयपित्स्यनाहर्यापित्य
॥त्वमेकएवात्मस्वतः प्रसूतिस्त्वं सन्निधानं त्वमनुग्रहस्त्व। त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नानान विवि
॥यश्चितो ये॥२९॥ विमर्षिपत्सू परत्पराय वोधमात्मानमिमायलोकः स्वयं त्वदन्तरलसः॥ सत्त्वोपपन्नान्निधुकवहानि॥
॥सतामन्तर्गतोऽपि मूढः घत्तानोरथ्यं स्वय्यनुजानीतिलसन्तधात्मिसमाधिनावेशितचेतसैमात्वत्स्वार्थयोतेन॥
॥महत्सु तेनकुर्वतिगोवरसपरमेवारिधिः। स्वयं त्वमुत्रीयदुर्दुस्तरं पुमनसेवाग्णीत्यान्मा मन्दमत्त्वोहृतः॥
नवसगं जोलहनावमत्रनैनिधाय पातः सहनुगृहीनवान्॥३०॥
ज्योदयेव महत्सर्वोकृपमनविस्तिरूते नवकृमत्तेनस्यर्थः॥ नवाप्नुवित्ति धीकुर्वंति। भ्रनापासेनैवनजनानुशासिस्तवां
कात्वत्पादपोतस्य पापमात्रेण नकांनुधोवस्सपरमात्रेजानेवतत्संनिरपेतं स्वयमेवमर्येषांजीमंकुसमपिनवा
र्णवेन तु तीर्णायनवस्मतं जोलहल्ल्पानामत्रैवनिधायपनकिमार्गसप्रापं पूर्वस्यपर्यः। कारपातासलि। पतोन्नसौहृतः
सर्वदतेतेषुप्रातिपुरुषा। अतनलो। त्येषांते तणपनिधायेति। कथंभवत्पादपोतेनेतनीर्णा अतउक्तं भवान्नरानुगृहः। सतोन
हे प्रभु मनु हे स्वरूपप्रकाशयो ध्यामानपुरुष है सो तुमारे जो चरण विंदु सो इ जो भइ नौका तिस विषै चढ करके तुमारे लोक को जात है। औ रतन मके से
हौ साधुजो मगन है तिन पे तुम सदा अनुग्रह करते हौ॥३१॥

ह जो तुमके म
लनैन अखिल सत्व
औ जीव है तिनके रू
प हौ तुमारे विषै समा
धि है चित जिनके औ
से जो प्राणी सो तुमारे
जो चरणविंदु सो इजो
नौका तिस विषै चढ
करके भव जो संसार ति
सको वास्ते परु तर करके
नि जो तनर्ये॥ कैसेतु
मा रेचरण है महापुरुष
ण करके जाने हौ॥३०॥

वाले हौ॥२८॥ हे अबोध
आत्मन तुमारे जो स्व
प है सो तुम ही जानत
हौ। चराचर लोक ए
ता है तिसके कल्या
न के करता हौ। कैसे स्व
प है तुमारे सत्व जो ते
ज तिस विषै पूर्ण हौ
कैसे स्वप है तुमारे
साधु जु है तिन को सु
ख के देने वारे हौ॥ औ
र दु जु है तिन
कौ अमंगल के क
र्ता हौ॥२९॥

अ
ध्या
रा
मा
बा
लि
का
२०

तस्मादेवं नैव मोक्षो तस्मात् उपसंहरति अत एव चितिश्रुत्यादीनपि संस्कारयन् क्रियासु देवार्चनादिकर्मसु अर्चविशेषतः मा तस्मात् कि
रमतिनरदिति रिक्तवीं गृहस्थाचार तव पदः पादन्तिका पाः ईश्वरस्य तव जन्म मात्रेण स्वयमीतस्य क्रियते त्वस्य द्वैः कोपतेः पदः पु
रोधानेनैवं ज्ञानकुशलादिगुणलक्षणोः नामरक्षी यांसर्गं च तत्त्वपानुद्धंपितं ४ तव जन्म नाकारोपजात न स्मृतेः मममपि जीवत्व
स्य साकारज्ञेः नहि नहीत्याह नेति तवेहेदं शास्त्रमसारिणो जन्मन कारणं कोऽपि नान तर्कयामः किं चेहेश्वरयामपायन नपंक्ता वि

अत एव वाग्रहणं सम्यगेवं श्रविवितमयन्त्यामानि स्तपादिाचयं गलानितं कियासु परत्वेच रक्षेभविरयोरा विद्य
विनोनन नाय कल्पते अरिक्षयाहुरेस्यां भवतः परोनुशोभारोपनी ततिव जन्म नेशिनुः दिक्ष्यं किंता
नुत्यहं सुशोभने दंसाम गांधाचन वाउ वृंपितं ४ नतेऽनव स्येशानवस्य कारणं विनाविनो देवततं
कृपामहे नवोनितेषः स्थितिस्थविषयाह तावत तस्वयमेयाम पामनि ४ पतस्या अकथं पव
ताहन्तसिंहहं सराज्य न्यविप्रविकुधेषु रतावतारः त्वं यासि नक्षि नुवनं च यथाधुनेशका एं नुगोह
रयहन्तं मवरं नतो अ दिक्ष्यं वितकुशिगतः परः प्रमाते शेनसाताङ्गकालेन वायनः मान्द्र
पंकोजय पतेर्भुम बोगोंप्रापदन्तो नवितानितवालमजः ४३

अयतद्रु नितत्या नत्संबोधनं हे नित्यमुक्ते स्वयं तव जन्म कारणं नास्तीति किंयते व्यपतो जीवात्म न्यपि न चारयत्विवि
षयेपाविद्यान याततया सतान परमार्थनः सतीति प्रस्तुतं संप्रार्थयते मत्स्याये ति अवश्यमा नृशिनुवनन च अन्यत्र र्यया
यासितत्याधुनयि याहीति वं धनेन तदिति अतः सर्वे शिरो दिक्षि प्रणमंति अरे वकी प्रत्याह रीक्ष्येति नोऽस्मा अनवाय
इवा यसाहता न्यरः प्रमुमां स्नेकुक्षिं गतः अतोनयं मान्नहिति अन्येषामपि कुक्षिं हरयं गतो विभ्रुभवति तेषां नयं न भवति रुमाय

हे माहराज हमपाकरवे कथा नरके जो तुमारे नाम रूप तिन को सुनत है कहित है स्मरन करत है चिंतमन करत है ॥ कैसे है तुमारे नाम रूप मंग
लके कर्ता है तुमारे जो चरणारविंद है तिन विषै युक्त है चित्त जिनके सो संसार के विषै न ही प्राप्त होते है ॥ ३१ ॥ हे माहराज हमारे आपको कहेकै आर
तेषां तु आहे ता दिना [illegible] चयेत नगवद्भक्ता नाम तमो सोना न्वेषामि [illegible] कर्मफलेन [illegible] मां [illegible] तुज्ञाने [illegible] साध्य
त्वात् ॥ किं न ज्ञेयमिति सानुशयात् प्रमाहुः ॥ सत्वेन चेति ॥ हे धातः ॥ इदं सत्वेन निजेन त्वत् वर्धनेन वेवेतेह विज्ञान ॥ विलिह मयते [illegible] नत्वमे
वेनड्मनुवेग ॥ न चेन्मन्यप्रज्ञानं निरुपमार्जनं ॥ ज्ञानेन [illegible] मिराचननेयो रूपमार्जनं [illegible] ॥ परज्ञानं मिति विज्ञान ॥ मार्जनं
कायमात्रमेवेति ॥ ननु जडानां बुद्ध्या हीनानामतः प्रकाशः ॥ न चूले तिज्ञानं न भवेदेव न गुणप्रकाशे ॥ गुणान च द्वे ॥ प्रकाशे न कानूनसंग
तोपूर्वः ॥ केवलम् ॥ मनु मायले कल्पने न नु सत्ता न क्रिया भेद इत्यर्थः ॥ स्मृत मानप्रकाश्यमाह ॥ प्रकाशेत यत्स्वयं न वा गुणाः इत्यय स्वतः
पीभ्रम [illegible] ॥ प्रकाश तेयो गुणमालास्वे ॥ येन वा [illegible] टलानुग्रह्यधि [illegible] मिति तेन वा सो गुणः ॥ प्रकाशनत्वेन तु

॥ सत्वेन वेद्यानां हृदि निजेन वे विज्ञानं मक्तानां निरुपमार्जनं ॥ गुणप्रकाशैरनुमीयते भवान् ॥
॥ प्रकाशते यस्य च येन वा गुणः ॥ ३१ ॥ नाना महत्पेण राजन्म कर्मस्मि लिङ्गरूपितत्वो न च नस्त्वो ॥
॥ लोकित्रिलः ॥ मनोवचोभ्यां मनुमे यवर्लेनां देवक्रिया यां प्रतियंत्यथापि हि ॥ ३८ ॥ ॥

पीयन इत्यर्थः ॥ शुद्ध सत्ववपुषि त्वयि सेव मानो तु नराकारें न च कलो ॥ त्वस्य साहे न सो ना कारो न वे हिति भावः ॥ ३१ ॥ एवं तावद्
ज्ञानामनुदया ॥ पवर्गोर्यरूपाणि विनर्धित्य के ता न्यथि न जनी यानि केवलं न तु ज्ञानं ॥ राम्यं न स्वनं न ता [illegible] दत्तर्वितां च म
नो वच सो साचर त्वादित्याह ॥ न नाम रूप इति ॥ गुणः ॥ जन्मानि च कर्माणि च नैं न निरूपित्न स्वे नि रूपणा हे न भवतः ॥ कुतः मनु
मेयवर्त्म मार्गो यस्य तवेति ॥ तत्रापि हेतुः ॥ यस्य तस्य सा [illegible] हिता इति नहि साहित त्वं मनो वचो गोचर इत्यर्थः ॥ हे देव बहु
धा यो तत माना त्वापि क्रियायां उपात [illegible] नारि त्वे स साम्यां ॥ प्रनियंत्नु पासकाः ॥ साधी [illegible] स्यरंयति हि प्रसिद्धं ॥ ३८ ॥ ॥ स्वान्वृत्सो पनमः
जनमया ॥ अब तुम पध्वीका मारहूं केतै ॥ श्री मोहराज हमारे आपकर के ॥ तुमारे जो चरण तिनकजेश्व कितजो पध्वी भ्रस्संत पोला
को प्राप्त तिसकोहम देखे गे ॥ श्रो प्र पध्वी पैतुमने ह्याक रीहै ॥ ३८ ॥

भा०८०२०॥
॥१९॥

नमस्ताउद्धृत्तेयन्नमस्तिनिसोह्य॥ यथाय या यावत्सेश्वरेतौ च स्वपेरण॥ नयधृतं कालकं वसुदेव ऐहलनेति दितीयम्भो कस्येत्यत्र नय॥ मधुतनेहेनुर्गनालिविशेषलानि॥ मुंबुजेहरन मिस्या इति॥ श्रीवसस्वस्मारम्॥ गलेनेयो च नेगल शो नीय कौस्तुभे यस्मिन्॥ नपारिषद्कं सहस्रेकं तेलं कि तिरकुंडलाहीनं निर्माविषुमधुरिहयरिमिन वेराचिमिरार्थः॥ विस्मये नोमु स्रोविकसितेत्युलोचनेयस्य सः॥ गवामधु तनमस्परशत॥ मनसा ददनगानकं सा निग्रहीनस्य हनासंभोग्न॥ स्पष्टशेहेतुः॥ रक्ता वक्ता

॥नीशा येन नमउद्धृत्तेमायमामेजनाईने॥७॥ देवकां देवरुद्भिप॥ लंयाविष्णुः सर्वगुहाशय॥ भ्राविदतासोघपा॥ प्रत्याहिशं॥दुर्धंयुष्कलः॥ तेमधु नेवाल कं मंबुजेहणं॥ चनर्जं शं धगराधुराधुधं॥ श्रीवसस्तनं॥ स्वकं नलं॥ उद्गमकायंगरके कणाहिनिर्विति॥ चमानेवसुदेवहेतनः॥ सविस्मयो मधुल्लविलोचने॥ हरिंचुतं विलोक्यानकदुंदुभिस्तत॥ सहस्रावतारो॥ सवसंवनमोपर्य शान्तुतः॥ दिजेभ्योपुत्रमंसुताचगवां॥ श्रथेनमस्तोरवधार्य॥ रहबंपरं नतोगः॥ स्तनधीः॥ सतोजलिः॥ स्वरोविषासारत्तसूतिकामरहंविरोयततेगः॥ तधीः प्रज्ञाविति॥१२॥ श्रीवसुदेवउवाच॥ विदितोसिभवान्सांतात्पुरुषः प्रकृतेःपरः॥ केवलानुभवानंदस्वरूपः

नदेवानंदरूप त्वानवकोलुप जरे

॥रेतिमुक्तात्मातुनोथ्यामः॥ स्मातइतिवा॥११॥ तनधीः पुद्धबुद्धिः सन्॥ एवं स्तस्य पासय्युरबेश्रव धार्यश्वसो नः॥ प्रथमं पुत्रबुध्या येस्पवतापरि॥ महस्यात्॥ विदितोसीति॥ श्वहो विदितो सीति कथं विदितोसि॥ भवान् प्रकृतेः परःपूरुषइति॥ ननु किमत्रास्माधि पुष्ट्वसपकृतेरन्यताद्दिवेतिप्रतमाह॥ सात्तादिति प्रत्यस्त इत्यर्थ॥ ननवपूर्सम्निरुद्धं॥ प्रत्युत्तनउपसान्यते॥ मिथि चमिरम् तंमाह॥ केवलेति॥ केवलामासावकुनवत्रयानंदस्वता॥ रवत्वर्तपंयस्पसः॥ किंच सर्वबुद्धिदकृनेसेवंमू नोदृश्यो मवत्तीत्य र्थः॥२॥

॥भाहजाः॥
॥१९॥

यस्य स्वरूपमाविर्भावं सर्वप्रत्यग्भूतं। यथा यथावत् अस्मान् वंचयित्वा एतावद्धि ह स्यात् स्यात् इति मन्यमाना ब्रह्मेशानौ पुरोधा
य पुरतः कृत्वा ययुरिति॥४१॥ इति दशमे द्वितीयः॥२॥ ॥ स्वतोपेक्षितजन्मापि जनकौ सन्नमन् हरिः। स्वयं प्रियस्तयोः संस्कृतो नीतः
पितृभ्यां तेन गोकुलं॥ अथेति तं गत्वा यर्हि सर्वगुणोपेतः कालो वन्नव तत्र देवक्यां विष्णुराविरासीदिति संबन्धः
न गतेनान्वयः॥ अजस्य जन्म नक्षत्रं रोहिण्यादि॥ अजनाम जन्मनक्षत्रं यस्य प्रजापतेः। नक्षत्रं तदेव हि

॥श्रुक उवाच॥ इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा॥ ब्रह्मेशानौ पुरोधाय देवाः प्रतिययु
॥ र्दिवं॥४१॥ इति श्रीभागवते महापुराणे दशमस्कंधे गर्भगतविष्णोर्ब्रह्मादिकृतस्तुतिर्नाम द्वितीयो
॥ध्यायः॥२॥ श्रीशुक उवाच॥ अथ सर्वगुणोपेतः कालः परमशोभनः॥ यर्ह्येवाजनजन्मर्क्षं शान्तर्क्ष
॥ र्क्षग्रहतारकं॥१॥ दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयं॥ मही मंगलभूयिष्ठपुरग्रामव्रजाकरा॥२॥
॥ नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः॥ द्विजालिकुलसन्नादस्तवका वनराजयः॥३॥ ववौ वायुः सु
॥ खस्पर्शः पुण्यगंधवहः शुचिः॥ अग्नयश्च द्विजातीनां शान्तास्तत्र समिंधत॥४॥ मनांस्यासन् प्रसन्नानि
॥ साधूनामसुरद्रुहां॥ जायमानेऽजने तस्मिन्नेदुर्दुंदुभयो दिवि॥५॥ जगुः किन्नरगंधर्वास्तुष्टुवुः सिद्ध
॥ चारणाः॥ विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा॥६॥ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः॥ मंदं मंदं जल
न तत्र कश्चन ते शान्ता॥ नक्षत्राण्यश्विन्यादीनि ग्रहाः सूर्यादयः तारकाः अस्य यस्मिन् एतत्तु यह्रीति सर्वत्रानुषज्जते॥ निर्मलानामु
डुगणानामुदयो यस्मिन् तत्तथा॥ मंगलभूयिष्ठाः पुरादयो यस्यां सा॥२॥ जलरुहैः श्रीः शोभा येषां ते॥ द्विजालिकुलानां स
न्नादा एव स्तवकाः यासु ताः॥३॥ समिंधत प्रज्वलिताः समिद्धद्धवा॥ समैधन्तेति॥ स्वभावतः शीघ्रावन्ह्युद्दीपनस्पर्शः॥ प्रसवदुह्यके सा
दिपतिरिक्तानां सर्वप्राणिनां देवानां वेति॥ अजने जायमाने॥ प्रसन्नाः प्रसवोत्तस्मिन् समये॥५॥६॥७॥ श्रीकृष्णाय नमः॥

दु४

ता३

दार्ढ्यं तिष्ठेत्सिद्धिर्भवति। स्यं भवानीति। ननु यद्गुहमच्युतस्य स्वस्वरूपमेव कारणं तया कार्यं सुवर्णनाहिं नेष्विद्युद्धे गृह्यमाणे बुमम
गृहणं किं नास्ति नग्राह। बुद्ध्यनुमेयलक्षणैर्गुणैरिति। बुद्ध्याहित्थपारिस्त्वानेनानुमेयं लक्षणं स्वस्वरूपं येषां तैर्गुणैरिन्द्रियैर्ग्राह्यायेन
गुणैः सह सन्नपि वर्त्तमानोऽपि तद्गुणाग्रहः तैर्गुणैः सह न गृह्यसे अग्रहणाव। नहि ग्राह्यैः सह नाव मात्रेण गृहे कारणं
किं तु इन्द्रियाणां शक्तिः सा च कार्यैकसमाधिगम्या। यथा कार्यमेव कल्प्यते। अतो यथा च कार्यस्वरूपगृहणे कारणस्य गृहणा
स्ति। न चैवं निर्विषयग्रहणे च तद्गुणाग्रहणमपीति। अविषयत्वेनेन्द्रियग्रहणाभावात्मकमेव सर्वबुद्धीन्द्रियग्राह्य इत्येवं तावत्प्रागेव

॥एवं भवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः।
॥अनावृतत्वाद्बहिरन्तरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः॥१७॥

विद्यमानत्वात् प्रवेशो नास्तीत्युक्तं। किंच। परिच्छिन्नस्यैनीडे यत्राहरिव प्रवेशो भवेत्। नवत्वनावृतत्वाद्यपरिच्छि
न्नो न्यवबहिरन्तरं ते नास्ति कुतः प्रवेश इत्याह। अनावृतत्वादिति। अनावृतत्वे हेतुमाह सर्वस्येति। नहि सर्वस्वरूपस्य ग्र
न्न हेतुरन्तं मास्ति सर्वात्मनः। न हि घटे नारत्नो। आत्मत्वेन। आत्मा वस्तुन इति। आत्मनो वस्तुनश्चेति हेतुद्वयं। अनात्मग
समन्वयस्यात्। अनन्तित्वात्प्रोतो सर्वस्मात्। नहि व्यापकस्यावरणं घटते। नथा वस्तुनः परमार्थस्य वस्तुनः। कृत्वावरणं न घट
ते इत्यर्थः। नस्मादन्तर्यामितया प्रवेशो नसंभवोऽस्ति। कुतः। सतां गर्भे प्रवेशः। अतः देवलानुसारेण स्वरूपं एवं तेवि

॥श्रीकृष्णः॥
॥१४॥

ननुदेवकीजठरेप्रविष्टस्यकिंमायातिरस्कृतिः।किंप्रयोजनमतआह॥सएवेति॥सएवउक्तःस्वकृतंत्वंनदेवकीजठरेगर्भत्वेनप्रविष्ट
इत्यर्थः॥ननुविश्वंसृष्ट्वातदन्तःप्रविष्टस्यापिमेनदृश्येनविक्षिप्यतेअतआह॥स्वप्रकाशोऽस्मीति।स्वमाययाइदंसृष्ट्वा।नहन्तुन्व
मैविष्टएवेति।ननुतर्हिकथंस्वप्नेसोच्यते।नत्वसृष्ट्वातदनुप्राविशदितिश्रुतेरतआह॥प्रविष्टइवेति।नाच्यसेनित्यप्रवेशेप्रस
क्तेनोपादेयेनप्रविष्टइवलक्ष्यसे॥यथेति॥यथेमेविकृताभावामहदादयोयथायथोक्ति।दृष्टान्तंविवृणोति

॥सएवस्वप्रकाशोऽयंसृष्ट्वागुणत्रयात्मकं।तदनुत्वंह्यप्रविष्टःप्रविष्टइवभाव्य
से॥१४॥यथेमेविकृताभावास्तथातेविकृतैःसह।नानावीर्याःपृथग्भूताःविरा
जंजनयंतिहि॥१५॥सन्निपत्यसमुत्पाद्यदृश्यंतेनुगताइव।प्रागेवविद्यमान
त्वान्नतेषामिहसंभवः॥१६॥

मेविकृतैरिति॥सविकृतैः।षोडशविकारैः।सहसन्निपत्यमिलित्वाविराजंब्रह्माण्डंजनयंति।सन्निपतनेहेतुः।यतःपृथग्भू
ताः॥संतोनानावीर्याविशिष्टकार्यसामर्थ्यानभवंति।अतःसन्निपत्येति॥समुत्पाद्यानुगताःप्रविष्टाइवदृश्यंतेनपुनः
प्रविष्टाः।कुतः।उच्यते।प्रागेवकारणतयाविद्यमानत्वान्नतेषामिहसृष्टेकार्योपसृष्टःसंभवः।प्रवेशइति॥१६॥श्री॥

१७३

॥भा०द०पू०॥
॥२३॥

किं नु तथाप्युपपन्नेन तत्पालनाय मित्याह। अयं त्विति। असभ्यः खलः। समर्पितं कथितं॥२२॥ उपधावत् अस्तौत्॥२३॥ तथापि भयशंकैव नासीत् निस्तो-
कचतुष्टयेनाह। देवकी किं विदितृत्ता यश्चिनं स्तूयमिति। यत्किमपि परं वस्तु प्राहुर्वेदाः। किंतु दृश्यं न तदाह। अव्यक्तं। अव्यक्तहेतुं। आद्यं कारणं। किं परमाणवः॥
न बृहत्त्वरहितं। किं प्रधानं। न ज्योतिश्चेतनं। किं वैशेषिकाणामिव ज्ञानगुणं। न निर्गुणं। किं मीमांसकानामिव ज्ञानपरिणामि। न निर्विकारं। किं युष्का-
लादानमिव शक्तिविशेषेण परिणामि। न सत्तामात्रं। तर्हि किं सामान्यं। न निर्विशेषं। तर्हि किं कारणत्वात् सक्रियं। न निरीहं। सन्निधिमात्रेण कार-
णं। एवंभूतं किमपि कार्यकर्तृत्वं यद्वस्तु स एव साक्षात्त्वं विष्णुरिति। अपरोक्षमेवाह। अध्यात्मदीप इति। बुद्ध्यादिकार्यकारणसंघातप्रकाशः॥

सदर्प

॥ अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर॥ स तेऽवतारं पुरुषैः समर्पितं
॥ श्रुत्वाधुनैवाभि [illegible] रायुधः॥२२॥ श्रीशुक उवाच॥ अथैनमात्मजं वीक्ष्य महापुरुषलक्षणं॥ दे-
॥ वकी तमुपाधावत्कंसाद्भीता सुचिस्मिता॥२३॥ देवक्युवाच॥ रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म॥
ज्योतिर्निर्गुणं निर्विकारं। सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः॥२४॥

कइत्यर्थः। अथवा। अव्यक्तं नकेनापि प्रकारेणाव्यज्यत इत्युक्तं। कथं। उपलब्धाता वन्नव्यजत इत्याह। आद्यं संघातसर्वस्य कार्य-
स्याद्यं। अनादीत्यर्थः। तथा ब्रह्म ज्योतिर्निर्गुणं निर्विकारमिति चतुर्भिः॥ पदैः निर्देशेन प्रकाशेन गुणेन च विकारेण च व्यक्तं करोति
न तथा सत्तामात्रमिति विशेषणात् निर्विशेषमिति। सामान्येन निरीहमिति क्रियायाच व्यक्तं निराकरोति॥ अन्यत्समानं। एवं
भूतेन स्पनवचनेन पर्शकेति भावः॥२४॥ श्रीहरि राम हरि राम राम राम हरि हरि॥ हरि राम हरि राम राम राम रामेक हरि हरि॥

॥श्रीरामः॥

॥२३॥

नन्वेतद्देहे तु वसुदेवस्य प्रपंचस्याने घटेत। तत्राह। संभवतीति सन्निरूप्यते न प्रतीतेरित्याशंक्याह। य इति। य आत्मनो दृश्येषु गुणेषु देहादिषु स्वव्यतिरेकतः। अन्वय
व्यतिरेकेण पृथक्सन्नन्वयं देहादिरिति व्यवस्यते निश्चिनोति यः प्रमान्सम्बुद्धः। अविवेकी न व्यतिरेकदर्शनात्। किंच मनीषितं विचारितं सततेहादि
सर्वं यतः। विनानुवादं वाचारम्भणमात्रं विना सम्पन्नं भवति। श्रुतो वस्त्वेन त्वं कागाधि नसेववाल्पवद्ध्या उपाददत्स्वीकुर्वन्ननुधः स्यात्। एवं परमेश्वरस्य
दृश्यस्य व्यतिरेकेण सन्नप्रवेशं। परमेश्वरो यद्यपि तत्त्वतोऽपि तद्व्यतिरेकेण सत्त्वमित्याह। त्वत्तोऽस्येति। न चैवं सत्यपि विकारित्वमित्याह। श्रुतीसति नन्वेम
हर्यर्भिविरुद्धमेवनेत्याह। त्वयीति। अगुणत्वादनीहत्वं ततोऽविकारित्वं च मिथः परस्परम्। ननु नीहस्य कथं कर्तृत्वं कुतो विकारित्वं तत्राह। त्वदाश्रयत्वादिति।

॥ य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः॥ विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पु
मान्॥१८॥ त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदन्त्यनीहादगुणादविक्रियात्॥ त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यते गु
णैः॥१९॥ स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः॥ सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्य
ये॥२०॥ त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वर॥ राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना
॥ निहनिष्यसे चमूः॥२१॥

त्वल्लीलात्वादविकारित्वं ईश्वरे कर्तृत्वमिति। नन्वेतद्दर्शितविरुद्धमेव नेत्याह। सारमप्यत्वादिति। गुणैः कुर्वद्भिः। नापि सत्त्वादिकर्तृ
त्वमुपचर्यते गुणत्रयप्रवर्तकत्वात्। यथा राजसैन्यकृतं राजनीति॥१९॥ एवं तत्सेवनवयथाविश्वस्थितिसर्गलयार्थं त्रिवर्णाः गुणाः कृता
॥ एवमयं नारायण एनार्थं मिति जिज्ञासतन्त्यमित्याह। स त्वमिति त्रिलोकस्थेन। रक्षिनुमिति पुरवतीर्णोऽसि। रक्षणेन वर्णेन। अतः साधूनां र
क्षणार्थं राजन्यसंज्ञा ये असुरकोटियूथपास्तैर्निर्व्यूह्यमाना तत्तत्स्थानस्थापिता माना अश्मम्। सेनानिहनिष्यसे संहरिष्यसि॥२०॥२१॥
श्री हरि राम हरे राम राम राम राम हरे हरे। हरि रामहरि रुषि रुमरु रामहरि हरि॥ श्री बाबा स्याबलाजी साहयः॥ श्रीकृष्णा॥

द्विभिस्तु यसंहर्त्तव्यं । एवंभूतेन मया पुत्रेण तव महती श्लाघा स्यादिति तत्राह । विश्वमिति । निशांते प्रलयावसाने यथावकाशम संकोचनतः । प्र
पंचावितततत्त्वाद्युपहास्यत्वं तस्यादित्यर्थः ३१ नन्तुभुजस्य येन एविसर्गावे कालेन तदाह त्वमेवेत्यादि चतुर्दशभिः । एवं सर्गे प्रथमजन्मनि पृश्नेः ।
स्वासाः । पृश्निर्नाम स्वायंभुवे मन्वन्तरे । तदायं वसुदेवः । ३२ तेपाथे तेपथुः । तं संवत्सरो ३३ । ३४ । ३५ तप्यतोः स्वायंतोः । द्वादशवर्षसहस्राणि इ

॥ विश्वं यदेतत्स्वतनौ निशांते यथावकाशं पुरुषः परो भवान् । बिभर्त्ति सोयं मम गर्भगोभूदहो नृलोकस्य
॥ विडंबनं महत् ३१ ॥ श्रीभगवानुवाच ॥ त्वमेव पूर्वसर्गेभूः पृश्निः स्वायंभुवे सति । तदायं सुतपा नाम प्रजा
॥ पतिरकल्मषः ३२ युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः । सन्नियम्येंद्रियग्रामं तेपाथे परमं तपः ३३
॥ वर्षवातातपहिमघर्मकालगुणाननु । सहमानौ श्वासरोधविनिर्द्धूतमनोमलौ ३४ शीर्णपर्णानिलाहा ॥ प्राणायामः ४
॥ रावुपशांतेन चेतसा । मत्तः कामानभीप्संतौ मदाराधनमीहतुः ३५ एवं वां तप्यतोस्तीव्रं तपः परमदुष्करं ॥
॥ दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ३६ तदा वां परितुष्टोहममुना वपुषानघे । तपसा श्रद्धया नित्यं भ ॥
॥ क्त्या च हृदि भावितः ३७ ॥ प्रादुरासं वरदराड् युवयोः कामदित्सया । व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥
॥ ३८ अजुष्टग्राम्यविषयावनपत्यौ च दंपती । न वव्राथेऽपवर्गं मे मोहितौ देवमायया ३९ गते मयि युवां ॥

निरंतरं

धर्म्म ४

पुर्गतानि महात्मनोः । मच्चित्तयोः श्रमकवपुषा ३७ प्रादुर्भूतोस्मि वरदराट् वरदेषु श्रेष्ठ इत्यर्थः । तेन मत्सदृशे रत्नं च कार्यं वा रमा विनिर्गावे ॥
कारणेनोक्ते । मादृशः । मायासदृशः । कामस्य दित्सया दातुमिच्छया ३८ । मे मत्तोपि पुत्रांश्च अपवर्गं निर्वव्राथे न वृतवंतौ ३९ । अक्लृप्तापत्यमः ।

किंच महाप्रलयेप्यवशिष्यमाणस्य कुतो भयमित्याह। नष्टे लोक इति। चराचरे लोके महाभूतेषु लाने तेष्वप्यादिभूतं। भूतसूक्ष्मं प्रविष्टेषु न
स्मिन्नपि व्यक्ते ऽव्यक्तं प्रधानं प्राप्ते॥ अव्यक्तो ऽहमस्य के प्रधाने संज्ञा प्रज्ञा यस्य स एवं मयि लीनमपि समुल्लियस्या देवमुहोधनी यस्मितिसः। अशेषसं
ज्ञः शेषसंज्ञ इति वा॥२५॥ किंच। एवंप्रलयहेतुर्योयं कालः एतं हे ऽव्यक्तबंधो प्रकृतिप्रवर्तकस्य प्रलयापाधिभूतस्य तेन चेष्टां लीलां।
चेष्टते विपरिवर्तते पुनः पुनर्वत्सरादरूपा महीयान् द्विपरार्द्धरूपः। यस्य चेष्टामाहुः। तं त्वां वत्त्वां क्षेमधाम। क्षेमयस्यानं प्रपद्ये शरणं

॥नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु। व्यक्ते ऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते ऽ॥
॥शेषसंज्ञः॥२५॥ योयं कालस्तस्य ते ऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वं। निमेषादिर्वत्सरांतो महीयां॥
॥स्तं त्वेशानं क्षेमधाम प्रपद्ये॥२६॥ मर्त्यो मृत्युव्यालभीतः पलायन् लोकान्सर्वान्निर्भयं नाध्यगच्छत्॥
॥त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति॥२७॥ सत्वं घोरादुग्रसेनात्मजान्नः त्रा॥ पा
॥हि त्रस्तान्भृत्यवित्रासहासि। रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्ठाः॥२८॥
॥जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन। समुद्विजे भवद्धेतोः कंसादहमधीरधीः॥२९॥ उपसं॥
॥हर विश्वात्मन्नदो रूपमलौकिकं। शंखचक्रगदापद्मश्रिया जुष्टं चतुर्भुजं॥३०॥ श्री कृष्णन मस्तु॥

भुजे॥२६॥ क्षेमधाम त्वमेवाह। मर्त्य इति। लोकान्प्रति। यदृच्छया केनापि भाग्योदयेन हे आद्य॥२७॥ प्रभुं तं विज्ञाय पाति सत्वमिति॥
न्नस्मान्नो वित्रासं हंतीति तथा भृत्यवित्रासहा न त्वमिति वा च्छेदः। पौरुषं ऐश्वरं ध्यानधिष्ण्यं ध्यानास्पदं। मांसदृशां मांसचक्षुषां
प्रत्यक्षं मा कृथाः॥२८॥ जन्म तत एवं हेतोः। निमित्तात्कंसात्समुद्विजे बिभेमि। पनो धीरचित्ताः॥२९॥३०॥ श्री गोपीनाथाय नमः॥

स्वयमेवव्यवर्तितविरता इत्यर्थः ॥ त्वय्यद्धपं नेति व के व्ये गुणाः ॥ प्रसरः ॥ दवेलिमिन्नात् ॥४८॥ गंभीरोयलोघुत्तस्य जवेन पेऊर्मयस्सैः ॥ फेनिलापेन
यापा ॥ नयानकेरावर्तशतैः याग्राधि ॥ विपः ॥ पतेः सीतापते ॥४९॥ निरपाश्रजयाप्रतिमुच्य बद्धा पदेः पारयोलोह निगडश्राख्ने स्म ॥५२॥
॥नाः ॥ स्वाहेवसुदेवश्राग तेनेल्वपंच्य वर्तितयथा तमोरवेः ॥ ववर्ष पर्जन्य उपांशुगर्जितः ॥ शेषोन्वगाद्वारि निवारयन्फ ॥
॥लैः ॥४९॥ मघोनि वर्षत्यसकृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला ॥ भयानकावर्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रि
॥यः पतेः ॥५०॥ नंदव्रजं शौरिरुपेत्य तत्र तान् गोपान्प्रसुप्तानुपलभ्य निद्रया ॥ सुतं यशोदाशयने निधाय तत्सुतामुपादाय पुन
॥र्गृहानगात् ॥५१॥ देवक्याः शयने न्यस्य वसुदेवोथ दारिकां ॥ प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ॥५२॥ यशोदा नंदपत्नी च
॥जातं परमबुध्यत ॥ नतल्लिंगं परिश्रांता निद्रयापगतस्मृतिः ॥५३॥ इति श्रीभागवते महापुराणे दशमस्कंधे स्कंधेजन्मनि ॥
॥तृतीयोध्यायः ॥३॥ शुक उवाच ॥ बहिरंतःपुरद्वारः सर्वाः पूर्ववदावृताः ॥ ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥१॥
॥ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् ॥ आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते ॥२॥ स तल्पात्तूर्णमुत्थाय कालोयमि
॥ति विह्वलः ॥ सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्द्धजः ॥३॥ तमाह भ्राता देवी कृपणा करुणावती ॥ स्नुषेयं तव कल्याण
॥स्त्रियं मा हंतुमर्हसि ॥४॥ बहवो हिंसिता भ्रातः शिशवः पावकोपमाः ॥ त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयतां ॥५॥ नन्वहं ते ह्य
॥वरजा दीना हतसुता प्रभो ॥ दातुमर्हसि मंदाया अंगेमां चरमां प्रजां ॥६॥ श्रीशुक उवाच ॥ उपगुह्यात्मजामेवं रुदत्या दीनदीनवत् ॥ याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ॥७॥ तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुतां ॥ अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ॥८॥ सा तद्धस्तात्समुत्पत्य सद्यो देव्यंबरं गता ॥ अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ॥९॥
॥६॥ श्रीशुक उवाच ॥ गोपालो हामोद्याय यमाधवेति ॥

जातं किंचिद्विदितिकेवलं ॥ अबुध्यत नतद्रुग्ः कन्याद्वेति ॥५३॥ इति दशमतृतीयः ॥३॥ बहुर्धंवंडिकाबाल्यमाकर्ण्य निजयाकुलः ॥ दुर्मं
चिंतितहिंतमेनेकसोबालादिहिंसने ॥१॥ नंदव्रजमजन्म ॥२॥ कालोमस्तु ॥३॥ पुंगहेन्नानः ॥५॥६॥ श्रीरामानुजायनमः ॥ श्रीकृष्णायनमः

॥श्रीकृष्ण ॥

वरं दत्त्वा मयि गते ॥४०॥४१॥ आदित्यां कश्यपाद्वामनरूपेणासमिप पुत्रत्वं ॥ तर्हि दृष्टपयोर्युवयोरहमेव पुनरागमिष्यामीति ॥४२॥४३॥ प्राक्रूपप्रदर्शनं तावदेतत् रूपं मे जन्मेति स्मरणाय ज्ञानाय दर्शितं ॥ मद्भवं मद्विषयं ज्ञानं नरं नरदृष्ट्यावलोपि न भविष्यामीति भावः ॥४४॥ ननु त्वयि पुत्रस्नेहे पि कथमावयोः पुनः पुनर्जन्म स्यात् ॥ परं न भविष्यतीत्याह युवामिति ॥४५॥ यदि के साक्षाद्विचिन्तयिष्यथ मां गोकुलं नयतं न पपश्चात् प्राकृतशिशुं कथं मन्यमानाः माननीयं विशेषण

॥ गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतं ॥ ग्राम्यान् भोगान् अभुञ्जाथां युवां प्राप्तमनोरथौ ॥४०॥ अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समं ॥ अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ॥४१॥ तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ॥ उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ॥४२॥ तृतीयेस्मिन् भवेहं वै तेनैव वपुषाथ वां ॥ जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥४३॥ एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ॥ नान्यथा मद्भवं ज्ञानं मर्त्यलिङ्गेन जायते ॥४४॥ युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् ॥ चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गतिं परां ॥४५॥

सू० ॥ श्रीशुक उवाच ॥ इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ॥ पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥४६॥ ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ॥ यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमाया जनि नंदजायया ॥४७॥ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ ॥ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ॥४८॥

मेवा भगवत्प्रचोदितो वसुदेवो यदा गन्तुमैच्छत् ॥ तदैव अजापि या योगमाया निमित्तं मायान्तरपाश्च जनिता ॥४७॥ हृताः प्रत्ययाः सर्वो वृत्तयो येषां श्च यथा ॥ हृतप्रत्ययाः ॥ स्वप्नावस्थासर्ववृत्तयो येषां जाग्रतामपि ॥ तथा नृतेषु द्वारपालेषु सत्सु बृहत्सु कपाटेषु लोहकीलकयुक्तो

पुत्रयोः

आद्यन्तादिताः

सहनानासतत इत्यनेनपुरुक्तं जन्ममरणादितदपि देहानां नात्मन इत्याह अनुजीति अजानिदेहा एवयांति अपयंयांति चनवंति चेत्यर्थः यथानु
विनौ मानियथादीनितद्वत्‌ एवंसुजन्मादिसिद्धिक्रियमाणेसु यथा सपौ तेन तया प्रत्यभिज्ञायमानो न विपर्यति विपर्ययं न प्राप्नोति एकस्तूप
एवं वर्ततइत्यर्थः नौ मेघु क्रियमाणेषु यथा न्तूलमेति एवं विचार्यमाणे सति न शोकार्थं कारणं १९ अज्ञानतस्तु न निवर्तत इत्याह यथेति
यथा यथा वत्‌ स्नुनेवेत्वेहः एवमज्ञानतः आत्मविपर्ययः देहात्मबुद्धिर्भवति यतो विपर्ययाद्देहो भवति देहाहंकारेण आत्मनि यदि च्छिन्नवेस
तीदं कारणं यदिनिन्नेभवति यतो मेरान्मुखादि देहे योगवियोगश्रवणतः संसरति सुखदुःखे इति यावदज्ञानं न निवर्तत इत्यर्थः २० एवमुक्तमर्थं

अनुविनौमानिनस्तानि यथा पांथ यथांति च नायमात्मा तथैनेषु विपर्येति यथैव न्नरं ॥१९॥ यथा नैवं
॥विदोमे हायनज्ञानात्मविपर्ययः देहयोगवियोगौ च संसृतिर्न निवर्तते २० तस्मात्‌ द्वैतमनयात्मया
॥व्यापादितो न पिमानुशोचयतः सर्वं स्वरूपविंदतेः वशः २१ यावद्धतोऽस्मि हंतास्मीत्यात्मानं मन्य
॥तेत्वदकृता वर्तते निमानं स्तोवाध्यवाधकतामियात्‌ २२ अहमध्वं ममहेरात्मसाधवोदीनवत्सलाः॥
॥इत्युक्तः सुमुख पाहेमरात्म्यः सुप्रोरघाग्रहीत्‌ २३॥

रानैतेनवचनयाः अहं तु सात्मघातितवान्‌ ॥ तथापि अज्ञानदृष्ट्या स्वेनतयात्मयाव्यापादितान पिमानुशोचेति मां त्वयि ति तस्मादिति
अज्ञानाश्रयमेवकर्मवारमाह यत इति २१ कथं तर्हि ब्राह्मणोऽहं नुत्वद्भ्रतस्यच प्राप्तं मिश्रितं सर्वं नामज्ञानमूलमेवेत्याह यावदिति अस्व
इतदेहे तु मिमानीतदि मिमानी तस्य देहस्य हननमात्मनि सन्निधानं लिंगसमवायेन प्राणान्तं मान्यमान इत्यर्थः २२ एकत्वात्‌ आत्म आत्मो
रितित्वदरयादेनांद्विवचनानुपपत्त्यापि पुनगणणप्रतीति मयुनीलतरणयाः स्वस्तत्स्यात्तदि धानं लिंगसमवायेन प्राणान्तं नतउपदधाती
तिवत्‌ देवकीवसुदेवयोः प्रत्यपाहे मगृहीतू इत्यर्थः सपात्मा देनकयं चिदहदेहानि धानं २३ ॥ आवा वा स्यावत्साजीराहयः सत्प्र:

एवं हरिर्न बन्दीनाहरिर्नवत् । न तु तथा पुत्रस्यान्यज्ञातत्वात् । सा च योगमायेति ज्ञातत्वात् । याविशेषोपि स्याद्विधेऽस्या सम्य
ग्ज्ञातः । स्वयोऽप्यपत । वत्सतरश्चैवेहैष । सिंधुरवेवाप्मना । रा । रूपमा विलि । श्रामन्नात्रिशोमूर्न हनि अज्ञातिस्तातावोरवति पा
तनेरमामोरूवलमरघाः । हिसामवमानसीति । १२ । बहुनाकानिकेतेषु वारणस्थास्थानेषु । १३ । परमेविस्मितः । कथं देवागमनं

॥ शुक उवाच ॥ अपगूह्यात्मजामेवं दन्तं तेन दीनवत् । याचितं तां विनिर्भर्त्स्य हत्वा ताञ्छिशूं देवलः । ७ । तां गृहीत्वा
॥ चरणे पोर्जातमज्ञां च मध्युः कृतां कुचेधपरस्थि । लाप्टष्टे स्वा शैलमूलिनसो हृदः । ८ । सानन्द्वस्मात्समुन्पत्य सद्यो देवं व
॥ रंगता शुद्धरूपता नु जाविश्वमोसायुधाष्टमहाभुजा । ९ । दिव्यस्त्रगंबरालेपरत्नाभरणभूषिता । धनुः शूलेषुचर्मा
॥ सिशंखचक्रगदाधरा । १० । सिद्धचारणगंधर्वैरप्सरःकिन्नरोरगैः । उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् । ११ । चंडि
॥ कौ उवाच ॥ किं मया हतया मंद जातः खलु तवांतकृत् । यत्र क्वचित्पूर्वशत्रुर्मा हिंसीः कृपणान्वृथा । १२ ॥ शुक उवाच ॥
॥ इति प्रभाष्य तं देवी माया भगवती भुवि । बहुनामनिकेतेषु बहुनामा बभूव ह । १३ । तयाभिहितमाकर्ण्य कं
॥ सः परमविस्मितः । देवकीं वसुदेवं च विमुच्य प्रश्रितोब्रवीत् । १४ । अहो भगिन्यहो भाम मया वां बत पाप्मना
॥ पुरुषाद इवापत्यं बहवो हिंसिताः सुताः । १५ । स त्वहं त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः । कान्लोकान्वै गमि
॥ ष्यामि ब्रह्महेव मृतः श्वसन् । १६ । दैवमप्यनृतं वक्ति न मर्त्या एव केवलं । यद्विश्रंभादहं पापः स्वसुर्नि
हतवाञ्छिशून् । १७ । मा शोचतं महाभागावात्मजान्स्वकृतंभुजः । जंतवो न सदैकत्र दैवाधीनाः सहासते । १८

ला

तेषि । १९ । नाम हे जगिनी चन्द्रैः पुरुषो होरात्मसोयथा त्वापत्यमेवाहितंवलि तद्वत । २५ । २६ । २७ । हे महाभागो स्वकृतं भुजं स्वारब्ध
कर्मनोन्नून । किं च जंतव प्राणिनः सहासहनासनते । किं च । कस्यत्यकालमेव नतापि एकत्र नसिते । किंतु विजृंभते दैवाधीनाः । २८

दुर्गाकाया
बोधकमाहं
नामानन्तव

तं

हेमेनिर्नये रे शोमूरैः। असंयुगाः रूप्य अविकत्थनं प्रौढिवातेयेषां तैः। ननु हरिर्विजेष्यति शंभोऽप्यस्ति तेन्द्रभ्रमः रहोजुषेति। सर्वस्याप्यंतः प्रविष्टेन किं
पिवन्हिरहरेष्टेनेत्यर्थः। पुनःसपृष्टेवा रहि नशिलायां लवननमो कोपस्यते नशंभुना ३६। यद्यप्युपमे देवा नवीक्ष्य हियिक त्रैसमर्थात्पथापि नोपेक्षितव्या इत्याह

॥ किंक्षेमशूरैर्विबुधैरसंयुगविकत्थनैः। रहोजुषा किं हरिणा शंभुना वा वनौकसा ३६। किमिंद्रेणाल्पवीर्येण ब्रह्म॥
॥ णा वा तपस्यता। तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे। ततस्तन्मूलखनने नियुंक्ष्वास्मानऽनुव्रतान्॥
॥ ३७ यथामयोऽगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुं। यथेंद्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्ध॥
॥ बलो न चाल्यते ३८ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः। तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः ३९॥
॥ तस्मात्सर्वात्मना राजन् ब्राह्मणान्ब्रह्मवादिनः। तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ४० विप्रा गाव॥
॥ श्च वेदाश्च तपः सत्यं दमः शमः। श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ४१ स हि सर्वसुराध्यक्षो ह्यसुरद्विड्॥
॥ गुहाशयः। तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः। ४२ अयं वै तद्वधोपायो यदृषीणां विहिंसनं ४३॥
॥ श्रीशुक उवाच॥ एवं दुर्मंत्रिभिः कंसः सह संमंत्र्य दुर्मतिः। ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः ४४ संदिश्य॥
॥ साधुलोकस्य कदने कदनप्रियान्। कामरूपधरान्दिक्षु दानवान्गृहमाविशत् ४५ ते वै रजःप्रकृतयस्तम॥
॥ सा मूढचेतसः। सतां विद्वेषमाचेरुरारादागतमृत्यवः ४६ आयुः श्रियं यशो धर्मं लोकानाशिष एव च। हंति श्रेयांसि॥
॥ सर्वाणि पुंसो महदतिक्रमः ४७ इति श्रीभागवते महापुराणे दशमस्कंधे चतुर्थोऽध्यायः॥ ४॥ श्रीरामजी शाह॥

त्रैर्गैवेत्याह। तन्मूलखननीति ३७ रूढपदः बद्धमूलः ३८ देवानां मूलं विष्णुः। सच धर्मलिंगात्तस्य धर्मस्य मूलं वेदादय इति ३९।४०।४१ किं च विप्रादयो हरेस्त
नवो यस्मादयमेवोपाय इत्याह अयमिति ४२।४३।४४ कालपाशेनावृतः आरादागतो मृत्युर्येषां ते ४६ सतां विद्वेषो न मनागपि हेतुः। किं तु वक्तव्यं

आत्मसौहृदं प्रियपक्षपातादि नाशं दर्शयन् २४ स्वपरभेददर्शने किं न वर्तते तदाह शोकहर्षेति नावैरेव निमित्तभूतैर्भावान्यन्ते पूर्वं तं भावमात्मनं पश्यंति किं त्वहमेव हंता हतस्त्वयं इति मन्यंत इत्यर्थः २७ विशुद्धं यथा स्यात्तथा प्रतिभाषितः २८ २९ नातिकोविदाः ३० मात्रमंत्रयतः

॥ मोचयामास निगडाद्विश्रब्धः कन्यकागिरा देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं २४ भ्रातुः समनुत॥
॥ प्तस्य क्षांतरोषा च देवकी व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह २५ एवमेतन्महाभाग यथा वदसि दे॥ वसुदेव उवाच
॥ हिनां अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः २६ शोकहर्षभयद्वेषलोभमोहमदान्विताः मिथो घ्नंतं॥
॥ न पश्यंति भावैर्भावं पृथग्दृशः २७ कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः देवकीवसुदेवाभ्यामनु॥
॥ ज्ञातो विशद्गृहं २८ ॥ श्रीशुक उवाच ॥ तस्यां रात्र्यां व्यतीतायां कंस आहूय मंत्रिणः तेभ्य आचष्ट तत्सर्वं यदु॥
॥ क्तं योगनिद्रया २९ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः॥
दैत्या ऊचुः ॥ ३० एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजादिषु अनिर्दशान्निर्दशांश्च हनिष्यामोद्य वै शिशून् ३१ किमुद्यमैः॥
॥ करिष्यंति देवाः समरभीरवः नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ३२ अस्यतस्ते शरव्रातैर्हन्य॥
॥ मानाः समंततः जिजीविषव उत्सृज्य पलायनपरा ययुः ३३ केचित्प्रांजलयो दीना न्यस्तशस्त्रा दि॥
॥ वौकसः मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ३४ न त्वं विस्मृतशस्त्रास्त्रान्विरथान्भ॥
॥ यसंवृतान् हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः ३५॥

अनिर्गतानि दशाहानि येषां तान् अन्यांश्च ३१ ३२ अस्यतः विध्यतः सतः उत्सृज्य रणं त्यक्त्वा ३३ ३४ अन्यासक्तान् विमुखान् भग्नचापा
मनसः

द० स्कं० भा० टी० ५८

आकल्याद्भूतं काल ॥८॥ नवकुंकुमकिंजल्कैर्मुखपंकजेषु भूषिताः । आर्पासांतां ॥९॥ समच्छानि उज्वलितानि मणिमयानि कुंडलानि यासां निष्काः
पदकानि कंठेषु यासां तासु शिखासु च्युतानि माल्यवर्षितया सो या ॥ नरालपव्रजती ॥ व्रजं ययपि विरेजुः । सवला याः कंकणभूषिताः

॥ महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥८॥ गोप्यश्चाकर्ण्य मुदिता
॥ यशोदायाः सुतोद्भवं ॥ आत्मानं भूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ॥९॥ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलि
॥ भिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥१०॥ गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमा
॥ ल्यवर्षाः ॥ नंदालयं सवलया व्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ॥११॥ ता आशिषः प्रयुंजानाश्चिरं
॥ पाहीति बालके ॥ हरिद्राचूर्णतैलाद्भिः सिंचंत्यो जनमुज्जगुः ॥१२॥ अवाद्यंत विचित्राणि वादित्राणि महोत्सवे
॥ कृष्णे विश्वेश्वरेऽनंते नंदस्य गृहमागते ॥१३॥ गोपाः परस्परं हृष्टा दधिक्षीरघृतांबुभिः ॥ आसिंचंतो विलिंपंतो
॥ नवनीतैश्च चिक्षिपुः ॥१४॥ नंदो महामनास्तेभ्यो वासोऽलंकारगोधनं ॥ सूतमागधवंदिभ्यो येऽन्ये विद्योपजीविनः ॥१५॥
॥ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् ॥ विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥१६॥ रोहिणी च महाभागा
॥ नंदगोपाभिनंदिता ॥ व्यचरद्दिव्यवासस्रक्कंठाभरणभूषिता ॥१७॥ तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्नि
॥ वासात्मगुणै रमाक्रीडमभून्नृप ॥१८॥ गोपान्गोकुलरक्षायां निरूप्य मथुरां गतः ॥ नंदः कंसस्य वार्षिक्यं करं दातुं कुरू–

आस्योतलैः । कुंडलभूषिताः । कोनापासांता ॥११॥ जनसिंचंत्यः स्वजनमुज्जगुरितिवा ॥१२॥ तेभ्यः प्रागुक्तेभ्यः ॥१५॥ पश्चो विसमन्यानपि
अपूजयत् ॥ हरेर्निवासेन पे आत्मगुणा रमायाः क्रीडाविहारस्थानं ॥१८॥ वार्षिकं प्रतिवर्षदेयं ॥१९॥ श्री द॰ म॰ ट॰ ॥

एवं च ये जातकं नंदः सूनोः स्नात्वा महोत्सवं । गत्वाथ मथुरां प्राप वसुदेवागमोत्सवं । महामना उदारचित्तः ॥१॥२॥ नियुते द्वे लक्षे सप्त तिलपर्व-
तान्प्रादात् । कथंभूतान् रत्नौघैः शातकौंभैः स्वर्णैः अंबरैश्चावृतान् ॥३॥ द्रव्याणां शुद्धिहेतुमाह कालेनेति । कालेन भूम्यादि स्नानेन वस्त्रादि शौचेन
द्रव्यादि संस्कारेण गर्भादि तपसा इन्द्रियादि इज्यया ब्राह्मणादि दानेन द्रव्यादि संतुष्ट्या मनः

॥ श्रीशुक उवाच ॥ नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः । आहूय विप्रान्वेदज्ञान्स्नातः शुचिरलंकृतः ॥१॥
॥ वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै । कारयामास विधिवत्पितृदेवार्चनं तथा ॥२॥ धेनूनां नियुते प्रा-
दाद्विप्रेभ्यः समलंकृते । तिलाद्रीन्सप्त रत्नौघशातकौंभांबरावृतान् ॥३॥ कालेन स्नानशौचाभ्यां संस्कारैस्तप-
सेज्यया । शुध्यंति दानैः संतुष्ट्या द्रव्याण्यात्मात्मविद्यया ॥४॥ सौमंगल्यगिरो विप्राः सूतमागधवंदिनः ।
गायकाश्च जगुर्नेदुर्भेर्यो दुंदुभयो मुहुः ॥५॥ व्रजः संमृष्टसंसिक्तद्वाराजिरगृहांतरः । चित्रध्वजपताका-
स्रक्चैलपल्लवतोरणैः ॥६॥ गावो वृषा वत्सतरा हरिद्रातैलरूषिताः । विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ॥७॥

१ ८२

आत्मा आत्मविद्ययेति ॥४॥ सौमंगल्यगिरः मंगलवाचका विप्राः येषां बंदिनः सूताः पौराणिकाः मागधा वंशशंसकाः वंदिनः स्तव-
मानप्रज्ञाः प्रस्तावसदृशोक्तयः ॥५॥ संमृष्टानि संसिक्तानि च द्वाराणि अजिराणि अंगणानि गृहमध्यानि च यस्मिन् स तथा । चित्रध्वजप-
ताकाः स्रजश्च चैलानि च पल्लवतोरणानि च तैर्भूषितः । हरिद्रातैलरूषिताः लिप्ताः । विचित्रा धातवः बर्हाः स्रजश्च वस्त्राणि च कांचनमा-
लाश्च तासां मालाः विद्यंते येषां ते तथा ॥६॥७॥ श्रीकमलापतये देवाय माधवाय नारायणाय नमो नमः ॥

नहृदेवनिष्ठा सम्सिद्धस्य सः। स देवं कृष्णादिशब्दं प्रहृदयं हीयते तेनेत्वं ते पुत्रान्हनोनमर्थं नीत्यर्थः। सुहृद परमस्य। नष्टान्
देवमेव परमे पस्यतः। यद्यपि पुत्रहयो वियुक्तो जन्मना वितानं दृष्ट्वा पुत्रः। संगम पत्नीत्यर्थः एव महृदय माल्ला नेस्व
केस्याश्रितिवान्निकारणं मृत्तिकुद्रयोर्वेदेहनम् प्रति। तस्मात् हिहानीत्यर्थः। न दुःखेन नाव नीयं पत्ता मानूस्थितिं युक्ता नाम
अंधकालान्तरे सर्वनंयोगः भवेत् समवाप्तः। सुस्मराहि लिसिपिकालानन्तरे तद्वियोगे स्वप्रपीतिनं हस्पष्टं गो दायो वा वावि

न नेहर्द ह्रनि वोयं महृदय पटमो जनः। सुहृदस्माल्लनं नं तं पोवेन्नसंगृहीतं॥३०॥ ॥श्रीशुक उवाच॥
॥वसुदेव उवाच॥ करो वै वार्षिको दत्तो राज्ञे दृष्टा वयं च वः। नेह स्थेयं बहुतिथं संत्युत्पाताश्च गोकुले॥३१॥
॥श्रीशुक उवाच॥ इति नंदादयो गोपाः प्रोक्तास्ते शौरिणा ययुः। अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलं॥३२॥
॥इति श्रीभागवते महापुराणे दशमस्कंधे वसुदेवनंदसमागमो नाम पंचमोध्यायः॥५॥ ॥श्रीशुक उवाच॥ नं-
दः पथि वचः शौरेर्न मृषेति विचिंतयन्। हरिं जगाम शरणमुत्पातागमशंकितः॥१॥ कंसेन प्रहिता घोरा
पूतना बालघातिनी। शिशूंश्चचार निघ्नंती पुरग्रामव्रजादिषु॥२॥ न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु।
कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि॥३॥ सा खेचर्येकदोत्पत्य पूतना नंदगोकुलं। योषि[illegible]त्वा
ययात्मानं प्राविश[illegible]त्कामचारिणी॥४॥

स्तिका॥३०॥ तावुभावपुत्रयोर्दुःखेनात्मानं स्माह। करो वै इति वः पुत्रान्ते॥३१॥३२॥ ॥इति दशमे पंचमः॥ षष्ठे सख्युर्गिरं तं हे
व्रजं गच्छन् पूतनां पथि दृष्ट्वा नुरागात् सीत तस्यामंसे पृष्ठ्वा च विस्मितः॥१॥२॥ रक्षविषयेशं कं मानं राजानं राजानं प्रति
स्वविषये पूतना सेवमरिष्यति तिनित्य यन्त्राह। न यत्रेति। यत्र श्रीरक्षश्रवणादीनि संति तत्रैव तासां शक्तिः। सा तान्नाशि
नोऽचसति का शंकेति भावः॥३॥ योषित्वा वै पत्रे वरांनारीमिव आत्मानं विधाय न तु निर्ल्लज्जानि दिर्शि कं शावसतीकंपं
शत्रुमपि प्रविशत् तत्राह। कामचारिणी तिनहि कामचारिणां सुदं से

॥यौसप्ताः॥

॥२९॥

ण्यात्र करं सत्त्वोपं। तदवमोचनं तत्स्थवसतिस्थानं। २०। २१। २२। २३। पुनर्भवः पुनर्जीन इव। तत्र हेतुः। गर्भविशेषणं संसारचक्रे वर्त्तमानि इति। २४। दुर्लभं
त्वमेवाह नैकत्रेति। प्रियस्त्रासोसंवासस्त्र प्रियसंवासः। हे प्रियेतिवा। प्लवेन स्त्रोघेन नीयमानानां प्लवानां तिप्लवाः। तृणकाष्ठादयस्तेषां यथा २५ कु
शस्थितिर्नालितत तत। २६। कच्चिद्वि रिति यस्त्वया दिसत्येनस्मिन्वने निर्दिष्टं गोपपोषध्यादि प्रचुरं गोपिकालनादिना पुत्रत्वेन विवृतवान् इति

॥ वसुदेव उपश्रुत्य भ्रातरं नंदमागतं। ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनं। २०। तं दृष्ट्वा सहसोत्थाय देहः ॥
॥ प्राणमिवागतं। प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः। २१। पूजितः सुखमासीनं पृष्ट्वानामयमादृतः ॥
॥ प्रसक्तधीः स्वात्मजयोरिदमाह विशांपते। २२। दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते। प्रजाशाया निवृ ॥ वसुदेवा
॥ त्तस्य प्रजा यत्समपद्यत। २३। दिष्ट्या संसारचक्रेस्मिन् वर्त्तमानः पुनर्भवः। उपलब्धो भवानद्य दुर्लभं ॥ य ३
॥ प्रियदर्शनं। २४। नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणां। ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा। २५ ॥
॥ कच्चित्पशव्यं निरुजं भूर्यंबुतृणवीरुधं। बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः। २६। भ्रातर्मम सुतः कच्चि ॥
॥ न्मात्रा सह भवद्व्रजे। तातं भवंतं मन्वानो भवद्भ्यामुपलालितः। २७। पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभा ॥
॥ वितः। न तेषु क्लिश्यमानेषु त्रिवर्गोर्थाय कल्पते। २८। नंद उवाच। अहो ते देवकीपुत्राः कंसेन बहवो हताः ॥
॥ एकावशिष्टावरजा कन्या सापि दिवं गता। २९।

प्रसक्तधीः। स्वात्मजयोरित्युक्तत्वात्। २२। भवद्भ्यामुपलालितः सन् कच्चिद्वर्त्तत इति शेषः। पुत्रादर्शनक्लेशमाह। पुंस इति सुहृदो वं
धून्प्रत्यनुभाविताः। संपादितो यस्त्रिवर्गः। त्वद्दि पुंसो विहितः पुत्राः। धर्मार्थकामाः प्रोक्ताः। न स्वमात्रपर्यवसितः। अतस्तेषु क्लिश्यमानेषु सु
खापननवती त्यर्थः। २८। नंदो वसुदेवं शोकयन्नाह अहो इति। २९। अयं यामहर्त्ता गोपालाः गिरिधारी कुंजकेलिविहारी जीमधुः

मेन्नुयशोदारोहितपोतांकपंनन्यवारयेतांतत्राहताभिति। वामंवल्गुजनन्याद्यचेष्टितंयस्यास्तावदास्त्रिपंचसहस्रैवमंतरागृहमध्येवीथ्य
श्रुतसैत्सरोयैवहिमार्ईवेचदहोनः। कौशायरिष्टहासिवत् मृदुचित्रचर्मनपः कोशः परिष्टः। स्नावलांयस्यःपुसे। एकनुस्यनहदः। त
स्त्रनयाचधर्षितैस्महन्त् तैस्मह नस्यजननाद्यवेतिमोहितेचसत्यों जननौनिदीसमारो। एवकेवलमज्ञिष्टतानतुनिकारितं

तांनीलाविततांभान्तिवामचेष्टितांवीक्ष्यांतेरात्कौशयरिष्टहासिवत् वरस्त्रियंतस्त्रनयाचधर्षितेनिरी
क्ष्यमाणोजननीहिरतिष्ठतां। ९ तस्मिंस्तनंदुर्जरवीर्यमुल्वणंघोरांकुमारायशिशोर्ददत्यथ गाढंक
राभ्यांनगवान्प्रपीड्यतत्प्राणैःसमंरोषसमन्वितोपिवत्॥१०॥ सामुंचमुंचालमितिप्रभाषिणी
निपीड्यमानाखिलजीवमर्मणि। विवृत्यनेत्रेचरणौभुजौमुहुर्निःविन्नगात्राक्षिपतीरुरोदह॥११
तस्याःस्वनेनातिगभीररंहसासाद्रिर्महीद्यौश्चचचालसग्रहाः। रसादिशश्चप्रतिनेदिरेजनाःपेतुः
क्षितौवज्रनिपातशंकया॥१२ निशाचरीत्थंव्यथितस्तनाव्यसुर्व्यादायकेशांश्चरणौभुजावपिप्र
सार्यगोष्ठेनिजरूपमास्थितावज्राहतोवृत्रइवापतन्नृप॥१३ पतमानोपितद्देहस्त्रिगव्यूत्यंतरद्रु
मान् चूर्णयामासराजेंद्रमहदासीत्तदद्भुतं॥१४

स्तौ। ९। तस्मिन्स्तनस्यानेदुर्जरंवीर्यंविषंयस्मिन्तत्। स्तनंमुखेसंलग्नंकुमारायतस्मैशिशवेददति। सत्यथअनंतरमेव। प्रपीड्यविषयस्य
क्ष्यमितिमत्वेव। तस्याःप्राणैःसमपिवत्। १०। चरणौभुजौचमुहुर्मुहुःक्षिपंतीनिःस्विन्नास्वेदयुक्तानिगात्राणियस्याःसा। ११ रसाः रसा
तलानिच। १२। व्यादायमुखंविवृत्यनिजरूपंराक्षसीतामास्थितानटरूपंसमयेकपटमयुक्तमितीव। १३ पतन्नपितस्यादेहःषट्क्रोशमध्यव

तां च विनामायतिं द्रष्टुं आगतां भ्रूविलितस्पवजो प्रियपमिव गोप्यो मंथानेन त्रस्तेः केनानयः॥ श्रीसम्पार्थानिति विशेषणानि॥ केशबंधव्यतिषक्तमल्लिकां॥ ध
म्मिल्ले व्यतिषक्ता मल्लिकाकुसुमा। रहस्ता नितंबेन स्तनाभ्यां च कृच्छ्रं कृशं मध्यं यस्याः। तां सुवाससः संरमणीयेवाससी यस्याः तां। कंपितयोः
कर्णभूषणयोः त्विषा उल्लसद्भिः कुंतलैर्मंडितमाननं यस्यास्तां॥५॥ वल्गुस्मितापांगविसर्गवीक्षितैः॥ वल्गु रम्यं स्मितं येषु तानि यानि अपांगविसर्गाये
षु तैर्वीक्षितैर्वनितानां मनो हरंती॥ अतो गोपा हननमनसं तां न निवारितवंत इत्युक्ते तिगोप्य इत्यपि मिवमनत्वा न्॥ श्रीज्ञासन्॥ अतः केनाप्यनि

॥ तां केशबंधव्यतिषक्तमल्लिकां बृहन्नितंबस्तनकृच्छ्रमध्यमां॥ सुवाससं कल्पितकर्णभूषणत्विषोल्लसत्कुं॥

॥ तलमंडिताननां॥५॥ वल्गुस्मितापांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसां॥ अमंसतांभोजकरेण रूप॥

॥ पिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिं॥६॥ बालग्रहस्तत्र विचिन्वती शिशून्यदृच्छया नंदगृहेऽसदंतकं॥ ॥

॥ बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि॥७॥ विबुध्य तां बालकमारिकाग्रहं चरा॥

॥ चरात्मा स निमीलितेक्षणः॥ अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जुधीः॥८॥ श्रीधरः॥

५१

वारितावत्यो प्रवेशेति भावः॥६॥ बालग्रहः पूतना। असदंतकं बालं ददर्श। असतामंतकं दृष्ट्वा कथं न विवेशेति। तत्राह। प्रतिच्छन्ननिजोरु
तेजसं। बालत्वाद्येन प्रतिच्छन्नं तिरोहितं निजं उरु तेजो येन तं। कमिव। भसि भस्मन्याहितमग्निमिवेति॥७॥ चराचरात्मा त्वादेव विबु
ध्य निमीलितेक्षणः। आसन्नं स्वयमनंतं दुष्टानामंतकं तां कमारोपयत्। बालं मत्वा यथोरगं सुप्तमबुद्ध्या अस्मासो रज्जुधीः सः। अस्मा
नेत्रो रज्जुबुद्ध्या गृह्णाति यथा न दृष्टिरिति॥८॥ श्रीरामकृष्णाय नमः। श्रीगोपालाय नमः। श्रीवासुदेवात्मजाय नमः। श्रीराधावल्लभोज

यथा रक्षां लोमं कुर्वन्ति तथाह चक्राण्यग्रत इति ॥ चक्रसहितो हरिस्त्वाग्रतो ऽस्तु । सहगदो गदासहितो हरिस्तव पश्चादस्तु । तव पार्श्वयोर्धनुर्धरो मधुहा । असि
धरो ऽजनश्च । शंखधर उरुगायश्चतुः कोणेषु ॥ क्षितौ च धरतात् ॥ २३ ॥ एवं च हरिरक्षां कृत्वा नवं गोमयं कुर्वन्ति तथाह । इंद्रियाणीति ॥ २४ ॥ आत्मानं महं क्रीडं ॥ २५ ॥ २६ ॥

॥ चक्राण्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयोर्धनुरसी मधुहाजनश्च । कोणेषु शंख उरुगाय उपर्युपेंद्रस्तार्क्ष्यः ॥
॥ क्षितौ हलधरः पुरुषः समंतात् ॥ २३ ॥ इंद्रियाणि हृषीकेशः प्राणान्नारायणो ऽवतु । श्वेतद्वीपपतिश्चित्तं मनो यो ॥
॥ गेश्वरो ऽवतु ॥ २४ ॥ पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः । क्रीडंतं पातु गोविंदः शयानं पातु माधवः ॥ २५ ॥ व्रजं
॥ तमव्याद्वैकुंठ आसीनं त्वां श्रियः पतिः । भुंजानं यज्ञभुक्पातु सर्वग्रहभयंकरः ॥ २६ ॥ डाकिन्यो यातुधान्यश्च कूष्मां ॥
॥ डा ये ऽर्भकग्रहाः । भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ २७ ॥ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः । उन्मादा ये ॥
॥ ह्यपस्मारा देहप्राणेंद्रियद्रुहः ॥ २८ ॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये । सर्वे नश्यंतु ते विष्णोर्नामग्रहणभीरवः
॥ २९ ॥ श्रीशुक उवाच ॥ इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणं । पाययित्वा स्तनं माता संन्यवेशयदात्मजं ॥ ३० ॥ ताव
॥ न्नंदादयो गोपा मथुराया व्रजं गताः । विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ॥ ३१ ॥ नूनं बतर्षिः संजातो योगेशो
॥ वा समास सः । स एव दृष्टो ह्युत्पातो यदाहानकदुंदुभिः ॥ ३२ ॥ कलेवरं परशुभिश्छित्त्वा तत्ते व्रजौकसः । दूरे क्षिप्त्वावय ॥
॥ वशो न्यदहन्काष्ठवेष्टितं ॥ ३३ ॥ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः । उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३४ ॥

सन्न्यवेशयत् शाययामास ॥ ३० ॥ ३१ ॥ विस्मयमेवाह नूनमिति । बत विस्मये । संप्रतं सस्यावलापप्रभावात् । योगेशो ज्ञानी वा सम[illegible] सपत्नः । स एव दृष्टः इति ॥
॥ ३२ ॥ ३३ ॥ विस्मयांतरमाह दह्यमानस्येति । कृष्णेन निर्भुक्तः । अत एव सपदि आहतः पाप्मा पाप्मा यस्याः ॥ ३५ ॥ आबृघ्रायनमः । आवाकास्पावलाजीनमः । राम ॥

इषामात्रोग्रदंष्ट्रास्यं ईषा लांगलदंड ॥ तत्प्रमाणा उग्रा दंष्ट्रा यस्मिंस्तत्तथाभूतमास्यं यस्मिंस्तत्तस्याः ॥ कलेवरं वीक्ष्य गोपा गोप्यश्च संतत्रसुः ॥ संज्ञा स्नेहे
नानेन पुनरवस्थिति ॥ यद्वा विशिनष्टि गिरि ॥ कंदरवन्नासिके यस्मिंस्तत् ॥ गिरेः स्थूलौ स्थूलौ पलौ नाविव स्तनौ यस्मिंस्तत्तदौद्रं घोरं ॥ प्रकीर्णाः प्रसृता अरुणा मूर्
र्द्धजा यस्मिंस्तत्तत् ॥ १५ ॥ अंधकूपवद्गंभीरे अक्षिणी यस्मिंस्तत्तत् ॥ पुलिनवदारोहौ जघने ताभ्यां भीषणं ॥ बद्धाः सेतव इव भुजोर्वंघ्रयो यस्मिन्
तत् ॥ शून्यतोयह्रदवदुदरं यस्मिंस्तत्तत् ॥ पूर्वमेव तस्याः शब्देन भीताः पुनर्दर्शनेन त्रासातिशयं प्राप्ता इत्याह ॥ पूर्वं त्विति ॥ तस्या निःस्वनितेन शब्देन भि

॥ ईषामात्रोग्रदंष्ट्रास्यं गिरिकंदरनासिकं ॥ गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्द्धजं ॥ १५ ॥ अंधकूपगभीराक्षं पुलिना ॥
॥ रोहभीषणं ॥ बद्धसेतुभुजोर्वंघ्रि शून्यतोयह्रदोदरं ॥ १६ ॥ संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरं ॥ पूर्वं तु तन्निः ॥
॥ स्वनितभिन्नहृत्कर्णमस्तकाः ॥ १७ ॥ बालं च तस्या उरसि क्रीडंतमकुतोभयं ॥ गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसं ॥
॥ भ्रमाः ॥ १८ ॥ यशोदारोहिणीभ्यां ताः समं बालस्य सर्वतः ॥ रक्षां विदधिरे सम्यग्गोपुच्छभ्रमणादिभिः ॥ १९ ॥ गोमूत्रे ॥
॥ ण स्नापयित्वा पुनर्गोरजसार्भकं ॥ रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः ॥ २० ॥ गोप्यः संस्पृष्टसलिलांगे ॥
॥ षु करयोः पृथक् ॥ न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत ॥ २१ ॥ अव्यादजोंघ्रि मणिमांस्तव जान्वथोरू यज्ञोच्यु ॥
॥ तः कटितटं जठरं हयास्यः ॥ हृत्केशवस्त्वदुर ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं ॥ २२ ॥ श्रीहरणाजी ॥ ॥

भिन्नाः हृत्कर्णमस्तका येषां ते ॥ १७ ॥ १८ ॥ १९ ॥ द्वादशांगेषु ललाटादिषु केशवादिभिर्द्वादशनामभिः ॥ २० ॥ स्वनाचांता एव प्रथममजिसंज्ञमेतौ वराहोक्तौ ॥
त्वा ॥ किंच ह्येधस्ता ताः ॥ पुनरात्मन्यप्येवं बीजन्यासमकुर्वतेत्याह ॥ संस्पृष्टसलिला ॥ स्वाचांताः ॥ आत्मनि प्रथममंगेषु करयोश्च पृथक् ॥
अजाद्येकादशबीजानां मध्ये करसंबंधौ त्रीणि करयोः ॥ संधिषु चत्वारि तत्र यथाक्रमं ग्राह एकैकस्मिन्नंगेषु ॥ अजाद्यैकैकं बीजं न्यस्य बालस्याप्यंगेषु
न्यासं कुर्वते ॥ २१ ॥ अंघ्रि अंघ्री जानू जानुनी भुजोरू जंके कटिः ॥ २२ ॥

दं १

॥भा०१०स०॥
॥२३॥

उत्तानशयनस्यार्भकस्य वेणेराकटस्याधःशयनं दर्शयन् विस्मयमाह पञ्चभिः श्रीशुक इति तस्मिन् संसारे अपि पुंस्त्वस्यानंदनिर्भरः स्नुपस्य देवस्य प्रबुद्ध
राजोऽन्यदपि तत्रेति ॥१॥ येन येनेति येन येनेत्यस्याद्यवताररूपेण भगवानीश्वरः विचित्रकर्माणि करोति तानि नः कर्णरम्याणि मनः प्रीतिकराणि चे
वदंत्येव ॥१॥ तथापि परं कृष्णस्यैव तत्र पुंसः पुरुषमात्रस्य अरतिर्मनोग्लानि ॥ तत्तस्मात्स्वतृष्णा विविधा तस्माद्भवत्यपि गच्छति ॥ तथा सत्त्वशुद्धिर्हरि
भक्तिः हरिदासस्य च्यानि च भवंति ॥ तदेव हारं हरेः सर्वाश्चरितं मनोहरं वा बालानुग्रहं करोषीति ॥२॥ अपौ उत्सृष्टो पुनर्विशिनष्टि अथेति अनु

॥राजोवाच॥ येन येनावतारेण भगवान् हरिरीश्वरः ॥ करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो ॥१॥ कर्म
॥ यच्छृण्वतोऽपैत्यरतिर्वितृष्णा सत्त्वं च शुद्ध्यत्यचिरेण पुंसः ॥ भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं व
॥ द मन्यसे चेत् ॥२॥ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतम् ॥ मानुषं लोकमासाद्य तज्जातिमनुरुन्ध ॥ भा०
॥ धतः ॥३॥ श्रीशुक उवाच ॥ कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषिताम् ॥ वादित्रगीत
॥ द्विजमन्त्रवाचकैश्चकार सूनोरभिषेचनं सती ॥४॥ नन्दस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं
॥ सुपूजितैः ॥ अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः ॥५॥ औत्थानिकौत्सुक्य ॥
॥ मना मनस्विनी समागतान् पूजयती व्रजौकसः ॥ नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुद ॥

तं धस्योऽनुकुर्वतः ॥३॥ उत्थानं शिशोरंगपरिवर्तनं तत्र कर्तव्ये कौतुकाप्लवे उत्सवाभिषेके तथा तस्मिन्नेव दिने जन्मनक्षत्रस्यापि योगे समवेत
वे ॥ समवेतयोषितां मिलितस्त्रीणां मध्ये वादित्राणि च गीतानि च द्विजमंत्राणां वाचकाश्च तैः सहिते वादित्रादिभिः ॥ सोऽभिषेचनं चकार ॥४॥ अन्नादि
भिः सुपूजितैर्विप्रैः कृतं मंगलं ॥ संजातनिद्रे अक्षिणी यस्य तं आसीत् शयनं शायितवन्ती शकटस्याधस्तात् प्रेर्य ॥५॥ उदक्षिपत् उर्द्ध्वं चालितवान् ॥६॥

वालचरित२

त्याः२

॥श्रीरामः॥
॥२३॥

प्रसंगात्तद्वै मुत्यन्तरायेन मलिकिं वैनमवमाह ॥ पूतनेति ३५ ॥ श्रद्धया भक्तिकयेन ॥ नत्तया प्रेम्णा रक्ताः ॥ स्निग्धा स्तन्यमातरः ॥ पतिवस्त्राहरणलीलासिप्रायेणाव
रुकवचने ॥ कोपि कालसंगमात्तरोऽवक्लिनीति ॥ तासां मोहः किमाश्चर्यं ३९ ॥ ४३ ॥ य एतत्पूतनामोक्षं कृष्णार्भकं चरितं ॥ किं तत्पूतनामोक्षमिति ॥ ४४

॥ पूतना लोकबालघ्नी राक्षसी रुधिराशना जिघांसयापि हरये स्तनं दत्वाप सद्गतिं ३५ किं पुनः श्रद्धया भक्त्या ॥
२ लोकाः कृष्णाय परमात्मने यच्छन् प्रियतमं किं नु रक्तास्तन्मातरो यथा ३६ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां ॥
॥ लोकवंदितैः अंगं यस्याः समाक्रम्य भगवानपि तत्स्तनं ३७ यातुधान्यपि सा स्वर्गमवाप जननीगतिं कृष्णभु ॥
॥ क्तस्तनक्षीराः किमु गावो नु मातरः ३८ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलं भगवान्देवकीपुत्रः कैव ॥
॥ ल्याद्यखिलप्रदः ३९ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणं न पुनः कल्पते राजन्संसारोऽज्ञानसंभवः ४० ॥
॥ कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः किमिदं कुत एवेति वदंतो व्रजमाययुः ४१ ते तत्र वर्णितं गोपैः पू ॥
॥ तनागमनादिकं श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ४२ नंदः स्वपुत्रमादाय प्रेत्यागतमुदार ॥
॥ धीः मूर्ध्न्युपाघ्राय परमं मुदं लेभे कुरूद्वह ४३ य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भुतं शृणुयाच्छ्रद्धया ॥
॥ मर्त्यो गोविंदे लभते रतिं ४४ इति श्रीभागवते महापुराणे दशमस्कंधे पूतनामोक्षो नाम षष्ठोऽध्यायः ॥ ६ ॥ श्री

अथ तु दैत्यकुलानीमाः पूतनायाः पिसुधलात् ॥ तन्त्र्यापो शानतः प्रार्थो प्राक्तह्य मितिकैल्पयन् ॥ १ ॥ इति दशमे षष्ठः ॥ ६ ॥ श्रीकृष्णः ॥

॥भा०द०पू०॥

॥२३॥

इति एवमभिप्रेत्य सामर्ग्यजुर्भिरुपाकृतैः संस्कृतैः ॥ पवित्रा औषधयो येषु जलेषु तैः ॥ सर्वद्विजोत्तमैः ॥ कर्तृभिरभिषिच्य स्नपयित्वा अभिषेकं कारयित्वा ॥१४॥ हुत्वा वाचयित्वा ॥१५॥ गावः गाश्च प्रादात् स्वत्वयुक्ता ... ॥१६॥ तथापि एवं बुद्धिरित्यर्थः ॥ उत्तरश्लोकस्य ... दुःखप्रकारेण ... तर्कयोस्मिन्नन्यथा ॥ तृणावर्तेन हरणात् पाप्मनस्तस्य पातयत्रेकाकि ॥१७॥ सोऽहमसंग ॥१८॥ तृणावर्तो नाम तस्य मनुष्याकारत्वाय दृष्टो नैवात्मानं तृणसंगात् ॥ उत्तरायणं तत्र नामे जानंती

॥ इति बालकमादाय सामर्ग्यजुरुपाकृतैः ॥ जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः ॥१४॥ वाचयित्वा स्वस्त्य ॥

॥ यनं नक्षत्रयोगे समाहिता ॥ हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणं ॥१५॥ गावः सर्वगुणोपेता वासः स ॥

॥ ग्रुक्‍मालिनीः ॥ आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुञ्जत ॥१६॥ विप्रा मंत्रविदो युक्तास्तैर्याः प्रोक्तास्तथा ॥

॥ शिषः ॥ ता निष्फला भविष्यन्ति न कदाचिदपि स्फुटं ॥१७॥ एकदारोहमारूढं लालयंती सुतं सती ॥ गरिमाणं ॥

॥ शिशोर्वोढुं न सेहे गिरिकूटवत् ॥१८॥ भूमौ निधाय तं गोपी विस्मिता भारपीडिता ॥ महापुरुषमादध्यौ जगता ॥

॥ मास कर्मसु ॥१९॥ दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रणोदितः ॥ चक्रवातस्वरूपेण जहारासीनमर्भकं ॥२०॥ गो ॥

॥ कुलं सर्वमावृण्वन् मुष्णंश्चक्षूंषि रेणुभिः ॥ ईरयन् सुमहाघोरशब्देन प्रदिशो दिशः ॥२१॥ मुहूर्तमभवद्गोष्ठं ॥ कृ २

॥ रजसा तमसावृतं ॥ सुतं यशोदा नापश्यत्तस्मिन्न्यस्तवती यतः ॥२२॥ नापश्यत्कश्चनात्मानं परं चापि वि ॥

॥ मोहितः ॥ तृणावर्तनिसृष्टाभिः शर्कराभिरुपद्रुतः ॥२३॥

उत्पातशंकया महापुरुषं नारायणं आदध्यौ ॥ आदध्यौ स्मृतवती ॥ जगतां भारेण पीडिता विस्मिता च ॥ यद्वा जगतां मध्ये कर्मसु प्रवृत्तः सन्नुदरे जगद्धरं न वेदेत्यर्थः ॥१९॥२०॥ ईरयन् निनादयन् इत्यर्थः ॥२१॥२२॥ यतः यत्र न्यस्तवती तस्मिन्स्थाने नापश्यत् ॥२३॥ श्रीबालबालस्वावलोकाय ॥ श्रीकृष्णः ॥

॥श्रीकृष्णः॥

॥२३॥

बरषरीरणमिः २

नरधः शयानस्य शिशोरल्पकस्याऽसौ प्रवालमृदुः अंघ्रिः तेन हतं अनः । शकटं व्यवर्त्तत विपरीतमपतत् । कथंभूतं ध्वस्तानि नानारसवन्ति कुप्यभा
जनानि स्वर्णरजतादिरहितानि कांस्यादिमयानि पात्राणि यस्मिन् तत् । तथा चक्रे च अक्षश्च व्यत्यस्ता यस्मिन् । विभिन्नः कूबरो युगंधरो यस्य
तच्च यथा भवति तथा व्यवर्त्तत ॥७॥ अद्भुतदर्शनेन आकुलाः नन्दादयः ऊचुः । कथमिति । विपर्यगात् विपरीतमपतत् इति ॥८॥ न श्रद्दधिरे विश्वा

नो१

॥अनोऽधःशयानस्य शिशोरनोऽल्पकप्रवालमृद्वंघ्रिहतं व्यवर्त्तत । विध्वस्तनानारसकुप्यभाजनं व्यत्यस्त॥
॥चक्राक्षविभिन्नकूबरं ॥ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः । नन्दादयश्चाद्भुत॥
॥दर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ॥९॥ ऊचुरव्यवसितमतीन् गोपान् गोपीश्च बालकाः॥
॥रुदतानेन पादेन क्षिप्तमेतन्न संशयः ॥१०॥ न ते श्रद्दधिरे गोपा बालभाषितमित्युत । अप्रमेयं बलं तस्य॥
॥बालकस्य न ते विदुः ॥११॥ रुदन्तं सुतमादाय यशोदा ग्रहशंकिता । कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाय॥
॥यत् ॥१२॥ पूर्ववत् स्थापितं गोपैर्बलिभिः सपरिच्छदम् । विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशाम्बुभिः ॥१३॥ ये॥
॥ऽसूयानृतदम्भेर्ष्याहिंसामानविवर्जिताः । न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥१४॥ श्रीराम॥

सं न जगृहुः । उत अपि बालस्यैतन्न संभवति । एते च बालाः किं जानन्तीति ॥१०॥ रक्षोघ्नैः सूक्तैः कृत्वा ॥११॥ भगवतः भव्यानुसन्धानं विप्रैश्चेष्टितं किंच
यत्नात् । पूर्ववत् स्थापितं बलिभिः शाकैः । यत् अमुष्य इति बलिभिः सहितं परिकरं यथा पूर्वं स्थापितं । विप्राः दध्यादिभिरर्चयामासुः हुत्वा ग्रहादि
होमं विधाय ॥१२॥ असूयानृतदम्भेर्ष्याहिंसामानविवर्जितानां सत्यशीलानामाशिषः कृता अफलाः न ॥१३॥ श्रीराधामाधवस्य ... जी सहायः ॥१॥

॥ भा॰ द॰ टी॰ ॥
॥ २४ ॥

नः सुखासि चीर्णमिति पूर्तमिति वापीकूपतडागादिनिर्माणं इष्टं पंचयज्ञाग्निहोत्रादि । दत्तं दानं यत् यस्मात् तत् तस्मात् । प्रणयन् हर्षयन् ॥ ३२ ॥ तत्राव लोगमेघ्यत्वे गोरवाशास्त्रिनी पुत्रं मोहयन् दर्शयामास जृंभमाणो मुखे जगत् । पीतप्रायस्य पानप्रायः स्तनो येन तस्य ॥ ३६ ॥ नगान् गिरीन् तत्दुहितृ नदीः ॥ ३७ ॥ इति दशमे सप्तमः ॥ ७ ॥ अष्टमे नामकर्मास्य बालक्रीडाकुतूहले मृद्भक्षणमिषेणोर्वविश्वरूपनिरूप्यते ॥ १ ॥ विश्वरूपदर्शिबालस्य

॥ किं नस्तपश्चीर्णमधोक्षजार्चनं पूर्तेष्टदत्तमुत भूतसौहृदं । यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबंधून् प्रणयन्नुप॥
॥ स्थितः ॥ ३२ ॥ दृष्ट्वाद्भुतानि बहुशो नंदगोपो बृहद्वने । वसुदेववचो भूयो मानयामास विस्मितः ॥ ३३ ॥ एकदार्भकमादा॥
॥ य स्वांकमारोप्य भामिनी । प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥ ३४ ॥ पीतप्रायस्य जननी सुतस्य रुचिरस्मितं ॥
॥ मुखं लालयती राजन् जृंभतो ददृशे इदं ॥ ३५ ॥ खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च । द्वीपा॥
त् ॥ न्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि ॥ ३६ ॥ सा वीक्ष्य विश्वं सहसा राजन् संजातवेपथुः । संमी॥
॥ ल्य मृगशावाक्षी नेत्रे आसीत् सुविस्मिता ॥ ३७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे बालचरिते विश्व॥
॥ रूपदर्शनो नाम सप्तमोऽध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ गर्गः पुरोहितो राजन् यदूनां सुमहातपाः । व्र॥
॥ जं जगाम नंदस्य वसुदेवप्रचोदितः ॥ १ ॥ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतांजलिः । आनर्चाधोक्षजधिया प्र॥
॥ णिपातपुरःसरं ॥ २ ॥ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिं । नंदयित्वाब्रवीद्ब्रह्मन् पूर्णस्य करवाम किं ॥ ३ ॥ म॥
॥ हद्विचलनं नृणां गृहिणां दीनचेतसां । निःश्रेयसाय भगवन् कल्पते नान्यथा क्वचित् ॥ ४ ॥ ज्योतिषामयनं ॥

विश्वरूपदर्शितः पुनः नामकरणं वाक्येन निजं तत्त्वमसूचयत् ॥ १ ॥ पूर्णस्येति कथं धनिनो गृहमागतस्तत्राह महद्विचलनमिति । महतां वि चरणमात्मनविचलनं नतु स्वार्थं किंतु गृहिणां मंगलायानंनु तर्हि त्वयैव महद्दर्शनार्थं किं निमित्तं नागतमिति तत्राह । दीनचेतसां स्वप्रपंचतया नदविगृहे त्यक्तुमशक्यत्वान्नागतमित्यर्थः ॥ ४ ॥ श्रीरामाय नमः जयति ॥ श्री हरे राम हरे राम राम राम हरे हरे हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥

प्रसुवती

सेदृशि घाघामि॥

॥ भा॰ द॰ टी॰ ॥
॥ २५ ॥

खरपवनचक्रात्पांशुवर्षे सति ॥२४॥ उपारतः पांशुवर्षस्य वेगो यस्मिन्पवने तथाभूते पवने सति । तत्र तस्या रुदितमनुनिशम्य गोप्यो रुरुदुः ॥२५॥ वात्याचक्र-
वेगः । तद्रूपधरः कृष्णं हरन् शान्तरयः । कं यं स्थितं नभोगतः । ततः परं गन्तुं नाशक्नोदित्यर्थः ॥२६॥ गुरुमत्तया पाषाणवत् गौरवेण तेन तया । अश्मानं मन्यमानः स्वात्मपर्णं तं पर्वतं प्र-
मन्यमानस्तेनैव आत्मनो गलेन गृहीतत्वात् । तस्य कृष्णस्य उत्स्रष्टुं नाशक्नोदित्यर्थः ॥२७॥ तस्योरसि लम्बमानं कृष्णं मातुः पाणौ प्रतिहृत्य समर्प्य विस्मिताः

॥ इति खरपवनचक्रपांशुवर्षे सुतपदवीमबलाविलक्ष्य माता । अतिकरुणमनुस्मरन्त्यशोचद्भुवि प॥
॥ तिता मृतवत्सका यथा गौः ॥२४॥ रुदितमनुनिशम्य गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः । रुरुदुरनुप॥
लभ्य नन्दसूनुं पवन उपारतपांशुवर्षवेगे ॥२५॥ तृणावर्तः शान्तरयो वात्यारूपधरो हरन् । कृष्णं नभोगतो ॥
॥ गन्तुं नाशक्नोद्भूरिभारभृत् ॥२६॥ तमश्मानं मन्यमान आत्मनो गुरुमत्तया । गले गृहीत उत्स्रष्टुं नाशक्नोदद्भु॥
॥ तार्भकं ॥२७॥ गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः । अव्यक्तरावो न्यपतत्सहबालो व्यसुर्व्रजे ॥२८॥ तमम॥
॥ न्तरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालं । पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदत्यो ददृशुः स॥
॥ मेताः ॥२९॥ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लम्बमानं । तं स्वस्तिमन्तं पुरुषादनीतं विहायसा॥
॥ मृत्युमुखात्प्रमुक्तं ॥३०॥ गोप्यश्च गोपाः किल नन्दमुख्या लब्ध्वा पुनः प्रापुरतीव मोदं ॥ अहो ब॥
॥ तात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात्पुनः । हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन॥
भयाद्विमुच्यते ॥३१॥

स्वस्तिमन्तं कुशलिनमेवानुवर्तिते । विहायसा गगनमार्गेण पुरुषादेन नीतं तथापि मृत्युमुखात्प्रमुक्तं पुनर्लब्ध्वा मोदं प्रापुरिति ॥३०॥ परस्परं हर्षेण कथामाहुः॥
अहो बतेति निवृत्तिं मरणं गमितः प्रापितः । कोऽत्र विस्मयो यद्यप्येवं तदिति । तेष्वेव केचिदाहुः हिंस्र इति ॥३१॥ श्रीकृष्णाय नमः॥

कुतस्मिन्द्धेतोः विप्रतिपद्यमानानां यदूनामपृथग्भावेतर भावो भावनं तस्मात् अन्योन्यहितया सर्वैकमत्यकरणोऽस्त्यर्थः संकर्ष
णे एकाकरोतीति संकर्षणमप्युशंतीति मन्यंते वीर्यं नीत्यर्थः गर्भसंकर्षणात्तु न प्रकाशयति १२ अस्य तव पुत्रस्य अन्वतः कृष्ण इत्येतं नाम भवि
ष्यतीति १३ प्रागयमिति सामान्योक्त्या कंचित् यं जन्मांतरे तत्तन्नामकं स्पयतीति तेनं होमन्यते सम्यक् ततः किंवासः एनं वासुदेव इति संप्रवेति तनुइति

॥शुक उवाच॥ एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् चकार नामकरणं गूढो रहसि बालयोः ११॥
॥गर्ग उवाच॥ अयं हि रोहिणीपुत्रो रमयन्सुहृदो गुणैः आख्यास्यते राम इति बलाधिक्याद्बलं विदुः॥
॥यदूनामपृथग्भावात्संकर्षणमुशंत्युत १२ आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः शुक्लो र
क्तस्तथा पीत इदानीं कृष्णतां गतः १३ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः वासुदेव इति श्रीमा
नभिज्ञाः संप्रचक्षते १४ बहूनि संति नामानि रूपाणि च सुतस्य ते गुणकर्मानुरूपाणि तान्यहं वेद नो ज
नाः १५ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ १६ पुरानेन
व्रजपते साधवो दस्युपीडिताः अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः १७ य एतस्मिन्महाभागाः प्रीतिं
कुर्वंति मानवाः नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः १८ तस्मान्नंदात्मजोऽयं ते नारायणसमो
गुणैः श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः १९ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते नंदः प्रमुदि
तो मेने आत्मानं पूर्णाशिषाम् २०

१५ गुणानुरूपाणि ईश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोवर्धनोद्धरण इत्यादीनि तानि सर्वाण्यपि नो वेद जना अपि नो वि
दुरिति १६ जातकफलमाह एष इति श्रेय आधास्यत् आधास्यति १७ अनेन रक्ष्यमाणाः समेधिताः संवृद्धाः विरिजग्युरिति १७।१८।१९ इति

त्वया बालयोर्नामकरणादिकं कर्तव्यमिति वक्तुं तस्य ज्ञानातिशयमाह ज्योतिषामयनमिति। यदतींद्रियज्ञानसाधनं ज्योतिषामयनं
तत्त्वप्रतिपादकं ज्योतिःशास्त्रमित्यर्थः। तत्साक्षाद्भवता प्रणीतं येनायमपि पुमान् परावरं परं कारणं पूर्वजन्मकृतं कर्म अवरं कार्यमस्मि
न्जन्मनि तत्फलं तद्वेद॥५॥ किंच जातके यद्यपि तमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्तिं यजमानपि ममत्वेन तन्मम सिद्ध्या
गोदायद्वेवेति।५। त्वं हीति। हि यस्मात् ब्रह्मविदां त्वं श्रेष्ठः अतो नामकरणादिसंस्कारान् कर्तुमर्हसि। ननु एतद्गुरूणां कर्म
यमिति चेत्तत्राह नृणामिति। जन्मनैव सर्वहितं नरं प्रति गुरुरेव तत्कार्यमित्यभिप्रायेण पृष्टः सन् गर्ग एवं आह यदूनामिति त्रिभिः ननु तथा

॥ ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानमतींद्रियं प्रणीतं भवता येन पुमान्वेद परावरं॥५॥ त्वं हि ब्रह्मविदां
॥ श्रेष्ठः संस्कारान्कर्तुमर्हसि बालयोरनयोर्नॄणां जन्मना ब्राह्मणो गुरुः॥६॥ गर्ग उवाच॥ य
॥ दूनामहमाचार्यः ख्यातश्च भुवि सर्वदा सुतं मया संस्कृतं ते मन्यते देवकीसुतं॥७॥ कंसः पापमतिः स
॥ ख्यं तव चानकदुंदुभेः देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति॥ इति संचिंतयन् श्रुत्वा देवक्या दा
॥ रिकावचः अपि हंता गताशंकस्तर्हि तन्नोऽनयो भवेत्॥९॥ नंद उवाच॥ अलक्षितोऽस्मिन् रहसि मा
मकैरपि गोव्रजे कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकं॥१०॥

पि त्वं मद्यागत इति कोऽपि विद्यादिति चेत्तत्राह ख्यातश्चेति। ततः किमत आह सुतमिति कं लोको मन्यते कल्पयेदित्यर्थः। ननु यदुकुमार इति
कथं विज्ञानात् तत्राह। वसुदेवस्य सुतत्वेनापि देवक्यां जात इति कुतो जानीयात्तत्राह। कंसः पापमतिरित्यादि॥८॥ किं मृग्याह तथा मंदे
त्यादि देवकीकन्यावचः श्रुत्वा देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हतीति निःसंचिंतयन् ... नान्येन केनचित् दृष्टा इति ... युक्तयो
श्चेत् सर्वं संचिंतयन् त्वद्गृहे ... इति संभाव्य मत्संस्कारलिंगेन च आगताशंकः। आगतः। यो कोपस्य सः। अपि यदि हंता हनिष्यति
तर्हि तन्नोऽस्माकमनयः अन्यायः स्यादिति॥९॥ द्विजातिसंस्कारं द्विजातीनामावश्यकं कर्तव्यं संस्कारमात्रं केवलं स्वस्तिवाचनपूर्वकं कुर्विति॥१०॥

श्रीभागवत २

॥गी॰ टी॰॥
॥२६॥

कृष्णचापलस्य वीर्यादितस्तैर्बाधितस्ततः । व्रजलंपतः समागत्य गोप्यो गोपीः प्रति ददुः ॥ अस्य स्मरणमपे हेहकाले कोपो संजातन हासः । स्ने पयो पार्जितं न तु दत्तं तत्रापि स्वादुनेतरं । दधि च पय स्वाय दधि पयः तस्ति किंच । मोतु स्पनमर्कटान् पूर्व विमृज्य दद्दाति । तेषामध्ये तत्र स्तेन कोपितः
ति चेन्नाहिं मांडं जिनत्ति । कदाचित् स्वस्वालाये सति सः । तत्र यत्प्रयत्नामाति कुपितो याति । पद्धतस्य गृहागृहि पालेभ्यः । कुपितस्तेषां मूत्रतो कारयः
पंका दिषु सुप्तान् कोपयते दधि चायातानि । दर्पकल्पितैस्तैस्ते पयो गैरिन्धुकं तत्र प्रपंचयति । हस्तागृह इति तं गृहे शिक्यस्यां भांडेषु स्वनिहि

॥कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले । अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा ॥२६॥ ततस्तु भगवान्कृष्णो वयस्यै
र्व्रजबालकैः । सह रामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदम् ॥२७॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम् । शृण्वत्याः किल
तन्मातुरिति होचुः समागताः ॥२८॥ गोप्य ऊचुः ॥ वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्व
त्त्यथ दधि पयः कल्पितैः स्तेययोगैः । मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे स गृहकुपितो यात्युप
क्रोश्य तोकान् ॥ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यन्तर्निहितवयुनः शिक्यभांडेषु तद्वित् । ध्वांता
गारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ॥२९॥ एवं धार्ष्ट्यान्युशति कुरुते मेह
नादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते । इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था
प्रहसितमुखी न ह्युपालब्धुमैच्छत् ॥३०॥

ते

तेद्ध्याहेव पुनं ज्ञानं पयस्य । छिद्रं रचयति नद्धृतछिद्रं रचनादिहितः ध्वांतयुक्तेगृहे स्वांगमेवार्थप्रदीपं रचयति विशेष तो धृतमणि
गणं । यर्हि यस्मिन्काले ॥२९॥ दरेचौरइत्याकृष्टः सन् उ प्रतिजल्पति त्वमेव चोरः अहं गृहस्वामी । मेहादीनि धार्ष्ट्यानि प्रगल्भानि । अथ
वा उशति उक्तमनीये पशौ दे यद्वा उशति शोभने वास्तौ स्वच्छे गृहे मेहनादीनि पुरीषोत्सर्गादीनि कुरुते । एवं स्तेयोपायैः विरचिता कृतिः कर्म
येन सः । त्वत्समीपे सुप्रतीकः साधुरिवास्ते । सभयेन नयनेन यस्मिन् तच्च तत् श्रीयुक्तं मुखं च । तदालोकिनीभिर्व्याख्यातार्थाप्रव्याख्यापित

॥श्रीकृष्णः॥
॥२६॥

कालक्रीडा न च मत्काद्यैः स्फोरामे लासं पुनः । परमानंद माधवं नमे नंद यशोदयोः ॥ २ ॥ हर्षलीनं च मे व दर्शयन्नाह कालेनेति ॥ २१ ॥ अनुरूप्य पुनः पुन
रनुरूप्य सरीसृपंतौ लोमृति शयेन चलंतौ । कथंपोपाः कृदियान्न खण किंकिण्यादीनां घोषेण तेन नादेन सुचिरं यथा तथा तेन घोषेणा नादेन हृष्ट
मनो ययोः सौ लोकं ततस्ततो गत्वा तं जनं । मध्वावसत्रि च तया लि पतानि मुग्धगम्य मुग्धवत् प्रभीतवत् प्रभीतं तत्त्वसमीपे उपेजग्मतुरुपयग्म
तुः ॥ २२ ॥ तदा च तत्र मातरौ निजसुतौ सेवांगोपयगृह्य प्रमोदं ययतुः । कथंभूते घ्राणपारुपयाऽनुंसौ वयः । स्रूहय पोधरसस्यो । पंकेनांगरागेण

॥ कालेन व्रजताल्पेन गोकुले रामकेशवौ । जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः ॥ २१ ॥ ताचंघ्रियुग्ममम
॥ नुकृष्य सरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु । तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतु
॥ रंति मात्रोः ॥ २२ ॥ तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्यां । दत्वास्तनं प्रपिबतोः स्म
॥ मुखं निरीक्ष्य मुग्धस्मितात्पदशनं ययतुः प्रमोदं ॥ २३ ॥ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृ
॥ हीतपुच्छैः । वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः ॥ २४ ॥ शृंग्यग्निदंष्ट्र्यसिजल
॥ द्विजकंटकेभ्यः । क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं । गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मन
ऽपि
॥ सोऽनवस्थां ॥ २५ ॥

णव हवि चिरो । कथंभूतं मुखं निरीक्ष्य । मुग्धं मंदस्मितं यस्मिन् । अल्पा दशनाः यस्मिन् तं च तच्च ॥ २३ ॥ यर्हि अंगनानां दर्शनीया कुमारलीला
ययोः । तथा भूतौ जातौ । तदा तत्र व्रजे व्रजमध्ये । तदबलाः व्रजांगना गोप्यस्तं स्पः प्रेक्षमाणाः । विस्मितगृहाः सत्योजहृषुः हृष्टा बभूवुः । कथंभूतौ ता
भ्यां वृतिहीना निपुच्छाग्रे पंनेः वत्सैरितस्ततोनुकृष्यमाणौ ॥ २४ ॥ अतिचपलौ शृंग्यादिभ्यो निषेद्धुं गृहे चिंतानि कर्माणि कर्तुं यत्र पदानं जननन्यो न
शेकाते । तदालं मनसोऽनवस्थामापतुरिति । गृहसौख्यस्य परकाष्ठा हर्षिता ॥ २५ ॥ श्रीहरे राम हरे राम राम राम हरे हरे । हरे रम हरे रम रम रम

॥भा०द०टी०॥
॥२७॥

तामाह किंस्वप्नइति परितोवितर्कयन्त्याह। नायंस्वप्नःहि किंदेवस्यहरेर्माया। तथाचेन्मे किंनपश्यंतितर्हि। किंवामदीयएव कश्चिद्बुद्धिमोहोविपर्यासःह
। हर्षलोमुखवचनात्। एवंतर्हिअयंसत्योपिकथमंतःप्रतीयते। अतर्वहिअस्यैवार्भकस्यरूपेणजगत्प्रतीयते। तथासतिबिंबप्रतिबिंबयोरिवपरस्परंवैपरी
त्येनप्रतीतिः। स्यादित्याशंक्यान्यथावितर्कयति अथोइति। अथवाअमुष्यममार्भकस्यापिसतोयः। कश्चनाचिंत्यः। आत्मयोगः। स्वीयमैश्वर्यं। औ
त्पत्तिकः। स्वाभाविकः॥४०॥ तदेवं पतन्मास्थित्वायमीश्वरं इतिनिश्चित्याह। अथोइतिचेतः। चित्तं। तदारिजिनंवितर्कगोचरं। यजगत्यदाश्रयंयदधिष्ठानं

॥किंस्वप्नएतदुतदेवमायाकिंवामदीयोबतबुद्धिमोहः। अथोअमुष्यैवममार्भकस्ययःकश्चनौत्पत्तिकआत्मयोगः॥
॥४१॥ अथोयथावन्नवितर्कगोचरंचेतोमनःकर्मवचोभिरंजसा। यदाश्रयंयेनयतःप्रतीयतेसुदुर्विभाव्यंप्रण॥
॥ता[illegible]स्मितत्पदं॥४२॥ अहंममासौपतिरेषमेसुतोव्रजेश्वरस्याखिलवित्तपासती। गोप्यश्चगोपाःसहगोध॥
॥नाश्चमेयन्माययेत्थंकुमतिःसमेगतिः॥४३॥ श्रीकृष्णाय॥ इत्थंविदिततत्त्वायांगोपिकायांसईश्वरः॥ वैष्णवीं
॥व्यतनोन्मायांपुत्रस्नेहमयींविभुः॥४४॥

येनकरणेनाधिष्ठात्रा। यतोबुद्धिरस्तिस्फूर्त्तानन्विदमवितर्क्यंनवतु। तस्यहंकीदृक्। अतआह। सुदुर्विभाव्यमिति। इदमस्यांनमचिंत्यमिम
यं॥४२॥ एवंप्रपंचप्रतीत्योनलीनंतत्त्वंपुनर्जीवसंस्तितिहेतुः। मयाअयत्वेनोन्नयंस्याह। अहंमितियस्योहनाम्नाहं। असौमेपतिः। अयंमेव्रजे
श्वरस्याखिलवित्तपाधिष्ठात्रीअहं। सतीजायाएषःसुतोमेसुतः। गोप्यादयश्चमदीयाः। इत्थंकुमतिर्जन्मायथायोयामायेषमेशरणमिति॥४३॥ वैष्ण

॥भा०द०स०॥
॥२७॥

कदाचिद् एवं ध्यानं उपालभ्य जननी तदनु महदाश्चर्यं प्रकटयति इति अपयन्नाह एकदेति ३२ उपालभ्य निर्भर्त्स्य भयेन संभ्रान्ते प्रेक्षणे च यस्य [illegible] हितैषिणी यस्य तं ३३ अदान्तात्मन् अनुपलब्धात्मन् रहः एकान्ते ३४ नाहं भक्षितवानिति नहि बाल्ये किंचिन्मयाज्ञातं तेन मत्कृताकृतं सर्वमलीकमिति भावः समक्षं प्रत्यक्षं ३५ व्यादेहि मुखं प्रसारयेति व्यादत्त प्रसारितवान् ३६ तत्र तस्मिन् मुखे विश्वं ददृशे ददर्श जित्वा प्रपञ्चयति जगत् जंगमं स्थास्नु स्थावरं खमन्तरिक्षं लोकं साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूगोलं भूर्लोकं वायुः प्रवहः स्वर्गश्चैव इन्दुश्चन्द्रः तारकाश्च तत्सहितं ३७ ज्योतिश्चक्रं स्वर्गलोकं वै

॥ एकदा क्रीडमानास्ते रामाद्या गोपदारकाः । कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥३२॥ सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी यशोदा भयसंभ्रान्तप्रेक्षणाक्षमभाषत ॥३३॥ कस्मान्मृदमदान्तात्मन् भवान् भक्षितवान् रहः । वदन्ति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययं ॥३४॥ श्रीकृष्ण उवाच ॥ नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः । यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ॥३५॥ यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान् हरिः । व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥३६॥ सा तत्र ददृशे विश्वं जगत् स्थास्नु च खं दिशः । साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकं ॥३७॥ ज्योतिश्चक्रं जलं तेजो नभस्वान् वियदेव च । वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ॥३८॥ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदं । सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां ॥४०॥

हा ४

वैकारिकाणि देवाः मन इति वैकारिकाद् इन्द्रियग्रहणमपि देववैलक्षण्यात् पुनरुक्तं इन्द्रियाणि च तैजसानि मात्राः तामसाः शब्दादयः गुणाः एवमेतद्विचित्रं विश्वं सह एकदेव वीक्ष्य विचित्रतामाह जीवस्य गुणतो भेदः कालस्य परिणामहेतुः स्वभावस्य जन्महेतुः कर्मवासनासंस्कार आशयश्च एतैर्लिंगानां चराचरशरीराणां भेदो यस्मिन् तत् तत्र व्रजं च सहात्मानं स्वसहितं च किंचिद्दीप्त्यस्तनौ तनौ विदारितास्ये शंकामवाप ४० श्रीराधावल्लभो जयति श्रीहरे राम हरे राम राम राम हरे हरे हरे कृष्ण हरे कृष्ण हरे कृष्ण कृष्ण

नवमे यशोदयोत्सिक्तेन गतागोप्यपतन्तनं विलोक्य कामं ड ग्रंगादिसूत्रं दाम्नाविबंधनं ॥१॥ ननु एतद्विलासं विमर्द्द्याविलित्नचेतसः बंधन ... घ्यगुल्मा रु
क्षौ ... तामनन्वर्थयति ॥ स्वयं दधिनिर्मंथया ॥ तदा गायनेति चकारान्वयः ॥ क्षौमं ... कांचीनद्धं ॥ रज्ज्वाकर्षे श्रमो यया योरुपोर्जयो ॥ स्वं
तौ ... कंकणौ च कबरतो गलं ... मालती यस्याः ॥३॥ अधिश्रितेचुल्ल्यामारोपिते उत्सिच्यमाने श्रतिनायये नोच्छियमाने ॥५॥ दद्भिर्दन्तैरश्मनाशि

॥श्रीशुक उवाच॥ एकदा गृहदासीषु यशोदा नंदगेहिनी कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि ॥१॥ यानि यानीह
गीतानि तद्बालचरितानि च दधिनिर्मंथने काले स्मरंती तान्यगायत ॥२॥ क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं
पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मा ग ३
लती निर्ममंथ ॥३॥ तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ॥४॥ तमं
कमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखं अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने प
यसि त्वधिश्रिते ॥५॥ संजातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनं भित्त्वा मृषाश्रुर्दृषदश्मना
रहो जघास हैयंगवमंतरं गतः ॥६॥ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं भग्नं विलो
क्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ॥७॥ उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं
शिचि स्थितं हैयंगवं चौर्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः ॥८॥ श्रीराधावल्लभो जयति:

ताप्युत्तेरणामुत्तरंगैरहमधुना गतः देहः एकांते नवनीतमभक्षयत् ॥६॥ सुशृतं सुतप्तं दधियं पात्रस्थानं प्रविश्य पश्चात् संदृश्य ॥७॥ उलूख
लांघ्रेः परिवर्तितस्योलूखलस्योपरि शिचि शिक्ये चौर्येण विशंकितं चंचलमीक्षणं यस्य तं ॥८॥ श्रीगोपालाजी का हय ॥ स्वातम

२

३ रुद्धे न ... ते हेनकलितं यशोदाहृदयं यस्याः सा पुरेवासीत् ४५ मेघावल्लोके इकमाह त्रय्येति त्रय्या इज्याद्यरिष्टापेण ३ उपनिषद्भिर्ब्रह्मेति सांख्ये पु
रुष इति योगैः परमात्मेति सात्वतैर्भगवानिति ३ उपगीयमानं माहात्म्यं यस्य तं ४६ श्रुतिविस्मयेन पृच्छति नंद इति महोदयं महानुदयो यस्मात्तद्दृ
यस्य तत् ४७ पयोः प्रसन्नौ वत्सीर्णलीलोपि तरौ नान्वविंदेतां न प्रापतुः तं ... ह्रस्वोदारं महत् ... र्भकेहितं बाललीलां यत् तत् यशोदाकपोवनं

॥ सद्यो नष्टस्मृतिर्गोपी साऽऽरोप्यारोहमात्मजं प्रवृद्धस्नेहकलिलहृदयासीद्यथा पुरा ४५ त्रय्या चोपनिषद्भिश्च
॥ सांख्ययोगैश्च सात्वतैः उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजं ४६ राजोवाच नंदः किमकरोद्ब्र
॥ ह्मन् श्रेय एवं महोदयं यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ४७ पितरौ नान्वविंदेतां कृष्णोदारा
॥ र्भकेहितं गायंत्यद्यापि कवयो यल्लोकशमलापहं ४८ श्रीशुक उवाच द्रोणो वसूनां प्रवरो धरया भार्यया सह
॥ या करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह ४९ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ भक्तिः स्या
॥ त्परमा लोके ययांजो दुर्गतिं तरेत् ५० अस्त्वित्युक्तः स भगवान् व्रजे द्रोणो महायशाः जज्ञे नंद इति ख्यातो
॥ यशोदा सा धराभवत् ५१ ततो भक्तिर्भगवति पुत्रीभूते जनार्दने दंपत्योर्नितरामासीद्गोपगोपीषु
॥ भारत ५२ कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ५३ इति

श्रीभागवते महापुराणे दशमस्कंधेऽष्टमोऽध्यायः ॥८॥

श्रीशुक उवाच

ति नन्दो विंदन्तत् किं श्रेयो करोदिति ४८ ब्रह्मण आदेशान् गोपालनादिलक्षणान् ४९ स एव ... द्रोणो यज्ञे स च नंद इति ख्यातः सा च
धारा यशोदाऽभवत् ५१ गोपगोपीनामपि वत्सत्वमावादस्येव भक्तिः तयोः पुनर्नितरामिति ५२ स्वलीलया पुत्रभावानुकारिण्या ५३

॥ इति दशमटीकायामष्टमः ॥८॥

तं मर्त्यलिंगमधोक्षजं मातात्मजं मत्वा बबंधेति ॥१४॥ द्व्यंगुलोनं द्वाभ्यामंगुलीभ्यां न्यूनमभूत् ॥१५॥ स्मितं कुर्वतीनां मध्ये स्वयमपि हसंती विस्मयमाप ॥१७॥ न चैवं स्वातंत्र्यभंग इत्याह एवं संदर्शितेति सेश्वरमिदं विश्वं यस्य वशे वर्तते सोऽपि भक्ताधीन इत्यर्थः ॥ भगवत्प्रसादमन्यो न

॥तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजं गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा ॥१४॥ तद्दाम बध्यमानस्य॥

॥स्वार्भकस्य कृतागसः द्व्यंगुलोनमभूत्तेन संदधेन्यच्च गोपिका ॥१५॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे॥

॥तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनं ॥१६॥ एवं स्वगेहदामानि यशोदा संदधत्यपि गोपीनां सुस्मयंतीनां स्मयंती वि॥

॥स्मिताभवत् ॥१७॥ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने ॥१८॥

॥एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥१९॥ नेमं विरिंचो न भवो न॥

॥श्रीरप्यंगसंश्रया प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥२०॥ नायं सुखापो भगवान् देहिनां गोपिकासु॥

॥तः ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥२१॥ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः अद्राक्षीदर्जुनौ पू॥

॥र्वं गुह्यकौ धनदात्मजौ ॥२२॥ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् नलकूबरमणिग्रीवाविति ख्यातौ॥

॥श्रियान्वितौ ॥२३॥ इति श्रीभागवते महापुराणे दशमस्कंधे उलूखलबंधनं नाम नवमोऽध्यायः ॥९॥

कोऽन्यः प्राप्नोतीत्याह नेममिति विरिंचः पुत्रोऽपि भवः आत्मापि श्रीः जायापि अंगसंश्रयापि तं प्रसादं ॥ नायमिति देहिनां देहाभिमानिनां तापसादीनां ज्ञानिनां निरहंकाराणामपि नास्ति ॥ तैः सुखेनाप्राप्यमित्यर्थः ॥२१॥ इति द॰

शमे नवमः ॥९॥

पि॰ ७४ ।

नयस्यादृक्कागृहे ॥ इदं नवनीतं कारणं नोऽस्तीति ॥ भयमेवबद्धमेयोगं प्रवेष्टुं योगिनां मनोऽपि यं नापि तं ॥ अपयानमन्वधावत् ॥ देवत्वं न त्याप ॥ यतो योगिनो
यं प्रवेष्टुं न यत्नमपि ति ॥ अन्वंचमाना अन्वंचमुल्लमनुगच्छंती ॥ बृहत्योः चलयोः श्रोण्योः भारेणाक्रांता मंदा गतिर्यस्याः ॥ विस्रंसितात्
केशबंधनात् च्युतैः प्रसूनैरनुगतिरनुगमनं यस्यास्सा ॥ पदा जवेनामृशत्पितानात् ॥ केशबंधात् पुरः ॥ पतितानि प्रसूनानि पश्चात् निपतंति यस्याः
पदानुसारेणानुधावंती ॥१०॥ अंजनेन कृष्णौ मषिणौ ॥ अंजनमषिणी ॥ नेत्रे ॥ किरणी स्वपाणिनाकर्षंतं जिहीर्षं ... भर्त्सयंती हृतस्य

॥ तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽवरुह्यापससार भीतवत् ॥ गोप्यन्वधावन्नृपः माययाऽऽप योगिनां क्ष ॥
॥ मं प्रवेष्टुं तपसेरितं मनः ॥९॥ अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा ॥ जवेन ॥
॥ विस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृशत् ॥१०॥ कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्म ॥
॥ षिणी स्वपाणिना ॥ उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयंत्यवागुरत् ॥११॥ त्यक्त्वा यष्टिं सुतं ॥
॥ भीतं विज्ञायार्भकवत्सला ॥ इयेष किल तं बद्धुं दाम्ना तद्वीर्यकोविदा ॥१२॥ न चांतर्न बहिर्यस्य ॥
॥ न पूर्वं नापि चापरं ॥ पूर्वापरं बहिश्चांतर्जगतो यो जगच्च यः ॥ जगन्मयः ॥१३॥ पाठांतरं स्मात मजीः ॥

हस्ते ॥ भीषयंती भयमुत्पादयंती ॥ अवागुरत् भर्त्सयत् ॥११॥ इयेष बद्धुमैच्छत् ॥ अतद्वीर्यकोविदा तस्याज्ञानात् न जानती ॥ अज्ञो विरत्नमेवाह न
चांतरिति पंचभिः ॥ बंधनं हि बहिः परिवेष्टनेन ... न स्यात् वंति ॥ तथा पूर्वापरविभागवतो वस्तुनः ॥ सर्वतोऽप्यमध्यत्वात् परिवर्तनः ॥ परि
वेष्टनेन भवति ॥ न त्वेतत् स्यादित्याह ॥ न चांतरिति ॥ किंच ॥ व्याप्यव्यापकेन व्याप्यस्य बंधो न भवति ॥ तद्विपरीतमित्याह ॥ किंच ॥ तदपि ... कस्य चामस्तावा

॥भा॰द॰पू॰॥
॥२०॥

नरदेव नरदेवसंज्ञितमपि स्यादिति भेर्भसितं विट्संज्ञितं ह्यथं भस्मसंज्ञितं भूत्वानुक्रमसंज्ञितं तत्कृते तेन देहेन येन मधुकृतो न्यायपतो न्नतद्देहाश्रियो
न वलितस्य किं स्वार्थं देहनवे देवेतस्य ॥१०॥ निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाकरणे ॥११॥ अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवस्तत्रैवाप्य-
यो जगत्यन्ते आत्मसात्कृत्वा स्वात्मनीति मत्वा असतो मूढाद्दते ॥१२॥ एवं श्रीमदस्य विवेकिन मुक्त्वा तत्र पतनीकार्यं तिरित्रि दृशोति परं अंजनं दरिद्र एव केवले
मितिविवाकु तदसत्तग्राह आत्मौपम्येनेति तत्तोन्नदुःसतीति भावः सदृष्टान्तमाह यथेति मुखलस्त्वात्माहि लिंगैः सर्वेषां जीवानां दुःखं वेदलु समेदति

॥ देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितं ॥ भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो यतः ॥१०॥ देहः किमन्नदातुः स्वं निषे॥
क्तुर्मातुरेव च ॥ मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोपि वा ॥११॥ एवं साधारणं देहमव्यक्तप्रभवाप्ययं ॥ को विद्वानात्मसात्कृ॥
त्वा हंति जंतून्नृतेऽसतः ॥१२॥ असतः श्रीमदांधस्य दारिद्र्यं परमंजनं ॥ आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥१३॥ यथा॥
कंटकविद्धांगो जंतोर्नेच्छति तां व्यथां ॥ जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः ॥१४॥ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरि॥
ह ॥ कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः ॥१५॥ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः ॥ इंद्रियाण्यनुशुष्यंति हिंसा॥
भावयंतः पृच्छंति बाहुमिति तुलसिकायाः अलिकुलैः मत्तमदामोदमदांधैः अनुगम्यमानः इह चरन्निति॥ १२ कच्चिद

अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः। कांतांगसंगकुचकुंकु
मरंजितायाः कुंदस्रजः कुलपतेरिह वाति गंधः॥ ११ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तु
लसिकालिकुलैर्मदांधैः। अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलो
कैः॥ १२ पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः। नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो॥
१३ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः। लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः॥ १४

श्रीकृष्णाय नमः॥

पृच्छतेति॥
हे सख्यः इमा लताः पृच्छत। एता नूनं अनेन भगवता दृष्टाः इमाः पृच्छत। ननु स्वपतिसंगतेन तत्संगतिर्दुर्घटा न वनस्पतेः पत्युः बाहून्
आश्लिष्टाः अपि अहो नाम पुनः नूनं तत्करजैः स्पृष्टाः यतः उत्पुलकानि बिभ्रति न हि स्वपतिसंगताबीदृक् पुलकसंभव इति
भावः॥ उन्मत्तवचनं परस्परं पृष्ट्वा इति तत्संभृतं॥ १३ इतीरमा पुनस्ता नानाविधेष्टा जगदुः॥ तदात्मिकाः कृष्णान्वेषणे तन्मयचेष्टा इति
इति इति उन्मत्तवचो गोप्यः उन्मत्तवचनं तागोप्यः कृष्णान्वेषणे कातराः अतितिविह्वलाः अनुचक्रुः अनुकरणं चक्रुः॥ १४

श्रीरामः
॥९०॥

न२

र्महं तन्न पुष्पैर्वहूपकारित्यस्येति कुरवकाः दनूप धक्किंचिदिति हे कुरवकाः दयः दर्पहरं स्मितं यस्य सः इतो गतः कच्चि
त् दृष्ट इति । स्मृलिकुलैः सहतां विभ्रत् वाति प्रियः तया किं दृष्ट इति गुणातिरेको पि न स्वताहिमाः पश्येयुरितिपृष्टेति मा
लतीति हे मालति मल्लिके जाति यूथिके वो युष्माभिः किं स्पृहर्षितो दृष्टः करस्पर्शेन वश्रीतिं जनयन् किं जात इति । अमा
लति जातिस्त्वोत्वां न विशेषो दृष्टव्यः ७ फलादिभिः सर्वप्राणिनां तर्पयत्यताः एतेन पश्येयुरिति पृ चूतेति चूतो न सृयो र्वानर
जाति नेहः करवनाय पयोऽस्त्र हे चूतादयः हे येन सेवयरार्थामावि काः परार्थमेव भवो जन्म येषां ते यमुनो पकूलाः नसा

कच्चित्कुरवकाशोकनागपुंनागचंपकाः। रामानुजो मानिनीनां गतो दर्पहरस्मितः। ६ कच्चित्तुलसि क
ल्याणि गोविंदचरणप्रिये। सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेऽतिप्रियोऽच्युतः। ७ मालत्यदर्शि वः कच्चिन्मल्लि
के जाति यूथिके। प्रीतिं वो जनयन् जातः करस्पर्शेन माधवः। ८ चूतप्रियालपनसासनकोविदार
जंब्वर्कबिल्वबकुलाम्रकदंबनीपाः। येन्ये परार्थभविका यमुनोपकूलाः शंसन्तु कृष्णपदवीं रहितात्म
नां नः। ९ किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकिताङ्गरुहैर्विभासि। अप्यंघ्रि

संभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन। १०

कूलसामीप्ये वर्तमानाः तीर्थवासिनः इत्यर्थः नेमवं तः हरमात्मनां सूच्यचेनसां कस्यपदवीं कस्य मार्गं शंसन्तु दे
हे क्षिति तिने तया किं तपः कृतं यात्त्वं केशवांघ्रिस्पर्शोत्सवो केशवस्यांघ्रिस्पर्शेन उत्सवो पस्याः सा कृतः अंग
रुहैः तृणलक्षितैर्नाखेर्मा विभासि विभ्रासि शोभसे तत्र विशेषं पृच्छति अपीति किं अयमुत्सवः अंघ्रिसंभवः अधुनातनो हे वा

माघबदी ४ पा ५ त ४ कवनार ४

भा० द० स्क०
८१

सुपृक्तानि संमिश्राणि २५ तेन नंदसूनुना सह यातायाः अंसे न्यस्तः प्रकोष्ठो यस्याः करेणोः हस्तिन्याः करिणा यथा एकांतं नयति २६ हे आल्यः सख्यः अहो धन्या अमी वि
रेण्वः गोविंदांघ्र्यब्जरेणवः तत्र हेतुः यानिति ब्रह्मादिभिः मूर्ध्नि धृतत्वात् एवं निषेधेन तस्यै पदानि नावः २८ अमूनि अमूनि
तस्या इति गोपीनां सर्वस्वं भुंक्तेच्युताधरं तस्याः पदानि सपत्नीकानि नः क्षोभं कुर्वंती नेत्र इत्यत्र नूनं बलं

पदानि व्यक्तमेतानि नंदसूनोर्महात्मनः लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः २४ तैस्तैः पदैः
स्तत्पदवीमन्विछंत्योग्रतोबलाः वध्वाः पदैः सुपृक्तानि विलोक्यार्त्ताः समब्रुवन् २५ कस्याः पदा
नि चैतानि यातायानंदसूनुना अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा २६ अनयाराधि
तो नूनं भगवान्हरिरीश्वरः यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः २७ धन्या अहो अमी
आल्यो गोविंदांघ्र्यब्जरेणवः यान्ब्रह्मेशौ रमा देवी दधुर्मूर्ध्न्यघनुत्तये २८ तस्या अमूनि नः क्षो
भं कुर्वंत्युच्चैः पदानि यत् यैकापहृत्य गोपीनां रहो भुंक्तेच्युताधरं २८ न लक्ष्यंते पदान्यत्र तस्या नू
नं तृणांकुरैः खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः २९ इमान्यधिकमग्नानि पदानि वहतो
वधूं गोप्यः पश्यत कृष्णस्य भाराक्रांतस्य कामिनः अत्रावरोपिता कांता पुष्पहेतोर्महात्मना अत्र
प्रसूनावचयः प्रियार्थे प्रेयसा कृतः प्रपदाक्रमणे एते पश्यतासकले पदे ३० केशप्रसाधनं
त्वत्र कामिन्याः कामिना कृतं तानि चूडयता कांतामुपविष्टमिह ध्रुवं ३१ श्रीगोपालजी शाह

पादरेणून् वापि चिन्नं ... ता र इह ... त ... न तत्र हस्ते ... लेत्तं न इति खिद्यती सुजाते सुकुमारे अंघ्रितले
यस्यास्तां अनिन्ने स्कंधमारोपितवान् ३० प्रपदाभ्यां आक्रमणं ययोस्ते ... सकले पदे पश्यतेति ३० न

श्रीरामः
८१

मिस्मन १   गो १   पा सं २

कस्याश्चित्सिद्धिस्तादिदृशिंसि नुकरणं प्रपंच्यते तेन तत्स्यानुभिलम्मयत्वंपुनरेकेनानुकरणमितिविवेकः। मृतनायंत्या: रतनावहावरंस्या: रूसवराघ
रेतीसनमद्यिवत् लोकपिता लोकवहत्स्मान्नरूपता हेस्तापिता हेतुवत्तरणावर्तवहत्मानं कत्वा ऋक्‌ंतमाणमांविना रूसस्यानंजोवयति
याताम्भन्याहुः जहाराश्च दूरात्दूरेवर्त्तमानानागाः तद्वनयथाश्रीकृस्णस्यथाश्रीकृयतंरूसमनुकुर्वती अनुवर्त्तमानाश्वनुकुर्वतीतिकापाः

२ घ्री

कस्याश्चिन्मृतनायंत्या: रूसायंत्यपिवत्स्तनं तोकयित्वा रुदत्यन्यापदाहंत्न शकटायतीं १५ दैत्यायित्वा जहारा
न्यामेकां कृस्णार्भभावनां रिंगयामास काप्यंघ्री कर्षंतीघोषनिःस्वनैः १६ कृस्णरामायिते द्वे तु गोपायंत्य
श्च काश्चन वत्सायंतीं जघानान्या तत्रैका तु बकायतीं १७ आहूय दूरगा यद्वत्कृस्णं तमनुकुर्वतीं वेणुं
घ्नतीं क्रीडंतीमन्याः शंसंति साध्विति १८ कस्याश्चित्स्वभुजं न्यस्य चलंत्याहापरा नन्प कृस्णोहं पश्यत गतिं
ललितामिति तन्मनाः १९ मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया इत्युक्त्वैकेन हस्तेन यतंत्युन्निदधेंबरं
२० आरुह्यैका पदाक्रम्य शिरस्याहापरान्नृप दुष्टाहे गच्छ जातोहं खलानां ननु दंडधृक् २१ तत्रैकोवाच
हे गोपा दावाग्निं पश्यतोल्वणं चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममंजसा २२ बद्धान्यया स्रजा काचित्
तन्वी तत्र उलूखले भीता सुदृक्पिधायास्यं भेजे भीतिविडंबनं २३ एवं कृस्णं पृछमाना वृंदावनल
तास्तरून् व्यचक्षत वनोद्देशे पदानि परमात्मनः २४ श्रीकृस्णाय नमः श्रीराधावल्लभो जयति

१७ यतंतीयत्नंकुर्वंती श्रवरं ३ तरीयवत्से ३ अन्निदधे ऊर्द्ध्वं कृतवती अपिदध्वं निमीलयत २२ सुदृक् सुनयनं आस्यं पिधाय मु
दृक्करात्लीतिवा नीतिविडंबनेनयानुकरणं एवंपुनरपि रंतावनेलतास्तरूंस्त्र कृस्णं पृछंत्य: वानोद्देशेवन प्रदेशे यपवततं स्व
ययन २४ श्रीराम:

॥भा०९४॥
॥९२॥

किंतु सर्वयत्र भ्रात्कलसेरंगतिरस्मीत तत्रैव कालिंद्याः पुलिनमागत्य कलसंभावयंति ध्यायंतीतितत्पाश्चा कलसस्यागमनं कांक्षितं यास्ताः सि
क्षिताः सत्यः कलसमेव जगुरिति इतिश्रीभागवतेदशमस्कंधे १ ॥ एकत्रिंशेनिरामलुपुनः पुलिनमागताः कलसमेवानुगायंत्यः प्रार्थयंते तत्र गमं
जयतीति हे दयित ते जन्मनाधिकं यथा स्यात्तथा जयति उत्कर्षेण वर्तते यस्मात्त्वमत्र यातस्तस्मादिंदिरा लक्ष्मीः श्रयते व्रजमेवालंकृत्य
प्रवर्तते एवं व्रजे सर्वस्मिन्मोदमाने तितत्र त्वत्तास्त्वका स्वयोरागोपीजनाः तव पितरं यथा विचित्तास सवः धृतासवो येस्तैतविचिन्वंते मृगयं
ते ..... इति ......

॥पुनः पुलिनमागत्य कालिंद्याः कलसमावनाः समवेता जगुः कलसंत दागमनकांक्षिताः ४४ ॥ इतिश्रीभा॥
॥गवतेमहापुराणेदशमस्कंधेरासक्रीडायांविरहगोपीगानंनाम ॥ ३० ॥ गोप्यऊचुः जयतितेधिकं जन्मना
व्रजः श्रयत इंदिरा शश्वदत्र हि दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ १ ॥ शरदुदाश
ये साधुजातसत्सरसिजोदरश्रीमुषादृशा सुरतनाथ तेशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ २ ॥

सर्वस्मिन्लोके अवतारस्तो यद्यपि संगतिरुच्यते तत्र विचिन्वंति मम किमिति चेत्तत्राहुः शरदिति शरदुदाशये शरत्कालीने सरसि साधुजातं
यत्सरसिजं विकासितं पद्मं तस्य उदरे गर्भे याश्रीः ताम् मुष्णाति हरतीति तथा तया दृशा नेत्रेण हे सुरतनाथ संभोगपते वरद हे शुल्कदासिका
अमूल्यदासिकाः मूल्यरहिता निघ्नतो मारयतस्ते तव तया क्रियमाणो वधः इह लोके अयं वधो न भवति किं शस्त्रेणैव वधो वधः किं
शास्त्रवधोवधो न भवति किंतु भवत्येव ॥ तत्त्वदृशा अपहृतप्राणाः .... नामितिक्रियापदे .... विशे
षः २ ॥ हा हरे राम हरे राम राम राम हरे हरे हरे कृष्ण हरे कृष्ण .... कृष्ण हरे हरे ॥ १ ॥ श्रीराधावल्लभो जयति श्रीकृष्णः

धः २

रक्तरद
यदृ.नांप

॥श्रीकृष्णः॥
॥९२॥

यापाद्यतां २

३५

रेम इत्यादि स्वुकोक्तिः। आत्मरतः स्वतंत्रं स्वसुखः। आत्मारामः स्वक्रीडः। अखंडितः अखंडितं स्त्रीविभ्रमैरनाकृष्टोपि तथाचोक्तमिति रेमे स्वतंत्रमा
ह कामिनामिति स्त्रीणां दुरात्मतामाह साचेति द्वाभ्यां कामयानमार्गमनन्यसाधनं यासां ताः गोपीर्हित्वा मां भजते इति रात्मानं च
रेवं मेने इति कामिनां दैन्यं दर्शयतीत्येवमुक्तमिति स्कंधमारोहेत्युक्तमाह ततस्त्वरितमित्यर्थः अनुता

॥श्रीशुक उवाच॥ रेमे तया चात्मरत आत्मारामोप्यखंडितः। कामिनां दर्शयन्दैन्यं स्त्रीणां चैव दुरात्मतां ॥३४॥
इत्येवं दर्शयंत्यस्तास्चेरुर्गोप्यो विचेतसः। यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने ३५ सा च मेने तदा
त्मानं वरिष्ठं सर्वयोषितां। हित्वा गोपीः कामयाना मामसौ भजते प्रियः ३६ ततो गत्वा वनोद्देशं दृप्ता केशव
मब्रवीत्। न पारयेहं चलितुं नय मां यत्र ते मनः ३७ एवमुक्तः प्रियामाह स्कंध आरुह्यतामिति ततश्चांतर्द
धे कृष्णः सा वधूरन्वतप्यत ३८ हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज दास्यास्ते कृपणाया मे सखे
दर्शय संनिधिं ३९ अन्विच्छंतो भगवतो मार्गं गोप्योऽविदूरतः ददृशुः प्रियविश्लेषमोहितां दुःखितां
सखीं ४० तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् अवमानं च दौरात्म्याद्विस्मयं परमं ययुः ४१
ततो विशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते तमः प्रविष्टमालक्ष्य ततो निववृतुर्हरेः ४२ तन्मन
स्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः ४३ श्री

पमाह हा नाथेति। अन्विच्छंतो मार्गयमाणाः। अविदूरतः समीपे ४० ततस्तया विरहिताः कृष्णान्वेषणाय वनमेविश
न् ततो हरेरन्वेषणान्निववृतुः ४२ एवं तन्मनस्कास्तास्तत्र स्थित्वा गृहान्नैव सस्मरुरित्याह तन्मनस्का इति तदात्मिकाः। स एव कृष्ण आत्मा यासां ताः। तन्मा
या इत्यर्थः ४३

हे०रा० २

स्वता ४

॥ रा० १० पू० ॥ ॥ ४३ ॥

अविरोधेन प्रणतानां देहिनां पापकर्षणं पापहंतृ तृणचरानू पशूननुगच्छति तथा सोऽस्माकं न प्रियेभ्योऽपि केनापि वीर्याणि येन
लक्ष्मीनिकेतनं फणिफणार्पितं ते पदांबुजं कुचेषु नः कृणु किमर्थं हृच्छयं कामं कृंधि छिंधि दूरीकुरु हे पुष्करेक्षण तथैव मधुरया
गिरा वल्गुवाक्यया बुधमनोज्ञया विधिकरीः किंकरीः अधरसीधुना आ-
प्यायय सजीवय इति किंच अस्माकं त्वद्विरहे प्राणमेव मरणं किंतु त्वत्कथामृतं पायय ... जीवितमस्माकं ...
कथामृतं तप्तजीवनं ... कविभिरीडितं ... कल्मषापहं

॥ प्रणतदेहिनां पापकर्षणं तृणचरानुगं श्रीनिकेतनं फणिफणार्पितं ते पदांबुजं कृणु ॥
॥ कुचेषु नः कृंधि हृच्छयं ७ मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण विधि ॥
॥ करीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः ८ तव कथामृतं तप्तजीवनं कवि ॥
॥ भिरीडितं कल्मषापहं श्रवणमंगलं श्रीमदाततं भुवि गृणंति ते भूरिदा जनाः ९ ॥

... श्रवणमंगलं श्रवणमात्रेण मंगलप्रदं ...
किंच ... एवं ... कथामृतं ... गृणंति ... जनाः ...
... जीवनं ... एवंभूतं त्वत्कथामृतं ये ... गृणंति ते ...
... कथामृतं गृणंति ते ...
... श्रीगोपालजी श्रीकुंजविहारीजी श्रीनवलविहारीजी श्रीराधाय नमः

॥ श्रीकृष्ण: ॥
॥ ४३ ॥

७४

धेनु...कृतात

पा १

यं वज्र कृष्णो ऽमृत्युः कपयान्वपाहृतिता:। किं मित्रं गोद्दशामन्यथं संप्रेष्य पातयसीत्याहुः। विषेति हे ऋषभ श्रेष्ठ विषमयं जलात् यो ऽप्ययो नाशस्त
स्मात् व्यालेन राक्षसात् अघासुरात् वर्षात् मारुतात् वैद्युतानलात् मृशनिपातात् वृषो ऽरिष्टस्तस्मात् मयात्मजाद्व्योमासुरात् विश्वतः सर्वस्मादपि
सर्वतो ऽनपायवकालियस्य नारिनाशतिता:। किं मृतानीमुपेक्षस इति भावः। यद्यपि च विश्वपालनस्याच तीर्णस्तव जनं कोपेक्षास्तं तमनुचिन्तेत्याशये
नाहुः। नखल्विति हे सखे भवान् खलु निश्चितं यशोदानन्दनो न भवति किंतु सर्वप्राणिनां बुद्धिसाक्षी नतु किं तदर्शनेन भवति तत्राहुः। विश्वस्य
रक्षणं विश्वपालनाय पद्मयोनिना ब्रह्मणा प्रार्थितः सन् सात्वतां कुले उदेयिवानवतीर्णः सि तस्मात् द्रष्टव्यमस्माकमेतत्प्रार्थना च तद्वयं

॥ विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ॥ वृषमयात्मजाद्विश्वतोभयादृषभ ते वयं ॥
॥ रक्षिता मुहुः ३ न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ॥ विखनसार्थितो विश्वगु ॥
॥ प्तये सखउदेयिवान् सात्वतां कुले ४ विरचिताभयं वृष्णिधुर्य ते शरणमीयुषां संसृतेर्भयात् ॥
॥ करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहं ५ व्रजजनार्तिहन्वीर योषितां निज ॥
१८ ॥ जनस्मयध्वंसनस्मित भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय ६ श्रीकृष्णः ॥

संप्रार्थयन्त्याहुः। विरचितेति अभयमित्याशिषि न्वनु किं हे वृष्णिधुर्य संसृतेर्भयात् शरणमीयुषां शरणप्राप्तानां विरचितं दत्तं अभयं येन
तेषां हे कान्त कामदं वरं तथा श्रियः करं गृह्णातीति तथा तत् करसरोरुहं नः शिरसि धेहि हे व्रजजनार्तिहन् हे वीर हे निज
जनानां स्मयो गर्वः तस्य ध्वंसनं नाशनं स्मितं यस्य तथाभूत हे सखे भवत्किंकरीर्नः अस्मान् भज अस्माकमपराधं विस्मृत्य ततः प्र
॥ थमं तावत् जलरुहाननं चारु योषितां नः दर्शय ६ ॥

न्यपि च हे वीर ते ऽधरामृतं नो वितर देहि स्वारितेन नादितेन वेणुना सुष्ठु चुंबितं मिलितं नादामृतयासितमिति भावः इतररागविस्मारणं नृणां इतरेषु सावेषौ साहि-
त्वसु रागस्य विस्मापेति ~~[illegible]~~ विलापयतीति तथा नः ॥१४॥ किंच तवामपि त्वद्दर्शने दुःखं दर्शने च सुखं इत्याह सर्वं सं गच्छति सङ्गमयोर्य
तयस्ववयं त्वामपश्यता त्वं तत्कथमस्मान् त्यक्त्वा गच्छसि इति कृतान्नपुच्चुः अटतीति यदा भवान् काननं वनं प्रविश्य अटति गच्छति तदा त्वामपश्य-
तां प्राणिनां त्रुटिः क्षणोऽपि युगवद्भवति एवमदर्शने दुःखमुक्त्वा पुनस्तं कथंचित् दिनान्ते तव श्रीमन्मुखं च उदीक्षमाणानां तेषां दृशां पक्ष्मकृत् ब्रह्मा जडो मंद इति स

सुरतवर्द्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितं इतररागविस्मारणं नृणां वितर वीर न-
स्तेऽधरामृतं ॥१४॥ अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यतां कुटिलकुंतलं श्री-
मुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां ॥१५॥ पतिसुतान्वयभ्रातृबांधवानतिविलंघ्य तेंत्यच्यु-
तागताः गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥१६॥ श्रीरुक्म श्री

एष मात्रम पि दृष्टं न मे सहमिति तद्दर्शने सुखमुक्त्वा ॥१५॥ तस्मात् ~~हे [illegible] यमन जानंतः [illegible]~~ हे अच्युत पतीन् सुतान् अन्व-
यान् संबंधिनः भ्रातॄन् बांधवांश्च अति विलंघ्य तव समीपमागताः वयं कथंभूतास्तव गतिविदः अस्मादृशं मनं जानंतः अतिविदो वयं
तवोद्गीतैः उच्चैर्गीतैः मोहिताः हे कितव शठ एवंभूता योषितः निशि समागतास्त्वाम् कस्त्यजेत् न कोपीत्यर्थः ॥१६॥ श्रीगोपालजी

सौ ४

॥श्रीरुक्मः॥
॥८४॥

दा२

गीतगतिर्वा जानन्तः २

ननु तर्हि ... यामेव वनेव सितैस्ताः नन्वेवं ननु किं मद्दर्शनेन न ते त्वद्विलासात् ... विभावयन्तन्नाधि ... तिं न विरामः इत्याहुः प्रहसि
तमिति हे प्रिय हे कुहक कपट संविदः संकेतनर्मगोष्ठ्यः १० किं च त्वयि वने निष्प्राणाः इव तिष्ठा ... पुनः ... केन हेतुना कपटमोचरसी
त्याहुः श्लोकद्वयेन चलसीति हे नाथ हे कान्त यत् पद व्रजाच्चलसि पशूंश्चारयन्न तदा तत् नलिनसुंदरं कोमलं ते पदं शिलातृणांकुरैः सीदति
शोभते कोंकुरैः सा ... रत्तिनिशीदति इति नो मनः कलिलतां ... गच्छति प्राप्नोति एवं न ... तादृ ... दुःखं ... तिवयं ननु दिनपरि

प्रहसितं प्रियप्रेमवीक्षणं विहरणं च ते ध्यानमंगलं रहसि संविदो या हृदिस्पृशः कुहक नो मनः ॥
क्षोभयन्ति हि १० चलसि यद्व्रजाच्चारयन् पशून्नलिनसुंदरं नाथ ते पदं शिलतृणांकुरैः सीदती ॥
ति नः कलिलतां मनः कांत गच्छति ११ दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतं घ ॥
नरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि १२ प्रणतकामदं पद्मजार्चितं धरणिमंड ॥
नं ध्येयमापदि चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्पयाधिहन् १३ ॥ गोपाल ॥

तयेत्याहुः कालेन नलिनकुं ... ते रावृतं घनरजस्वलं गोरजोधूसरितं वनरुहाननं ... तिमालाकुल ... गुप्तिनयमनु
ष्यमाननं बिभ्रत् तत् च मुहुर्मुहुर्दर्शयन्नो मनसि केवलं स्मरं यच्छसि मर्प्ययसि न तु संगं ददासीति कपटत्वं इति भावः १२ अ
तोधुना कपटं विहाय ... कुर्विति प्रार्थयन्ति श्लोकद्वयेन प्रणतकाममिति हे प्रणत ... धिहन् हे ... पद्मजेन ब्रह्मणा
र्चितं मापदि ध्येयं ध्यानमात्रेणापन्निवर्तकं शंतमं च सेवा समये ... तनं ... चरणपंकजं कामतापशांतये नः स्तनेष्वर्पयेति १३

त्रिः २

भ्रुव ४ सा: १ दं: २ तन्वी: ३

भाँ० पु० ८५

कांश्चिंशो विरहालापविक्लिन्नहृदयो हरिः तत्राविर्भूय गोपीनां सांत्वयामास मानयन् १ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः स्वहृदयं नंदय यन् गोपीकृतानं दनं दनः २ इति गोप्य इति इति एवं प्रकृतिविचित्रधा अनेकधा सुस्वरं उच्चैः कृष्ण दर्शने लालसाः स्पृहायासां ताः ३ ताला साम न्मथमन्मथः जगन्मोहनस्य कामस्यापि मनस्युद्भूतः कामः तातान्तस्यापि मोहकत्वं सर्वधैः २ कल्याणहृदयः ३ स्मृं जलिना संहत हस्तद्वये न ५ नकुटिमावध्य कुटिलीकृत्य प्रेमसंरंभेण प्रणयकोपावेशेन विवशा विकलो दष्टाधरो याकटाः कंदाशास्ते ईर्ष्यातेयाः परिवकाले

इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः १ तासामाविरभूच्छौरिः स्मयमानमुखांबुजः पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः २ तं विलो क्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोबलाः उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतं ३ काचित्करांबुजं शौ रेर्जगृहेंजलिना मुदा काचिद्दधार तद्बाहुमंसे चंदनभूषितं ४ काचिदंजलिनागृह्णात्तन्वी तांबू लचर्वितं एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ५ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला घ्नंती वैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ६ अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजं आपीतमपि नातृप्य त्संतस्तच्चरणं यथा ७ तं काचिन्नेत्ररंध्रेण हृदिकृत्य निमील्य च पुलकांग्युपगुह्यास्ते योगीवानं दसंप्लुता ८ सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः जहुर्विरहजं तापं प्राज्ञं प्राप्य जथा जनाः ९

श्रीकृष्ण: ८५

ताडयंतीवैक्षत ६ अनिमिषंतीभ्यां अनिमिलंतीभ्यां दृग्भ्यां आपीतं सम्यग्दृष्टमपि पुनः पुनर्जुषाणा नातृप्यत् ७ हृदि कृत्य सह दयं नीत्वा सर्वः प्राज्ञं ईश्वरं प्राप्य यथा मुमुक्षवो जनाः यद्वा [illegible] यथा संसारिणः यद्वा प्राज्ञं सुषुप्तं प्राप्य जथा तेजसाख्यजीवाः ९:

८

मपि २ भेलत्वं कामौ ३

मु२ हृ ग०२

श्वतस्त्वयात्यक्तानामस्माकंप्राणानत्वद्दर्शनेनिरतानहृद्रोगस्यत्वत्संगस्यैवचिकित्सांकुर्वित्याहुः रहसीति ॥ श्रियोधामनेवक्षसि विशालं उरस्त्वदीयस्तनः स्पृहातिस्पृहायुक्तत्वाविवेनयावन्मुहुर्मुहुर्मनोमुह्यति ॥१७॥ तवव्यक्तिः अभिव्यक्तिः व्रजवनौकसांसर्वेषामविशेषण वृजिनहंत्री दुःखनिरसनी विश्वमंगलंस र्वमंगलरूपाच अतस्त्वत्स्पृहात्मनांत्वत्स्पृहा मनसांनः मनाक् ईषत् किमपि त्यज मुंच कार्पण्यं मा कुरु अन्नदेहीत्यर्थः किंतत्स्वजनहृद्रोगशांतये यत् तिगोप्यं निषूदनं निवर्तकं सौषधं यत्त्वमेवास्तीति भावः ॥१८॥ अतिप्रेमधर्षितानांहंस्यशंकायदित्याह यत्त इति हे प्रिय यत्ते तव सुकुमारं चरणांबुजं कठिनेषु कुचे

पं ६

॥ रहसिसंविदंहृछयोदयंप्रहसिताननंप्रेमवीक्षणं बृहदुरःश्रियोवीक्ष्यधामतेमुहुरतिस्पृहामुह्यते ॥

॥ मनः ॥१७॥ व्रजवनौकसांव्यक्तिरंगतेवृजिनहंत्र्यलंविश्वमंगलं त्यजमनाक्चनस्त्वत्स्पृहा ॥

॥ त्मनांस्वजनहृद्रुजांयन्निषूदनं ॥१८॥ यत्तेसुजातचरणांबुरुहंस्तनेषुभीताःशनैःप्रियदधीम ॥

॥ हिकर्कशेषु तेनाटवीमटसितद्व्यथतेनकिंस्वित्कूर्पादिभिर्भ्रमतिधीर्भवदायुषांनः ॥१९॥ इति ॥

॥ श्रीभागवतेमहापुराणेदशमस्कंधेएकत्रिंशोध्यायः ॥३१॥ श्रीगिरिवरधारिणेनमः श्री

षु संमर्दनशंकिताः शनैः शनैर्दधीमहि धारयेम वयं तेनाटवीमटसि नयसीति पाठे पश्चून्वा कांचिदन्यां वा आत्मानमेव वा नयसि प्राप यसि नन्वततः तस्य चरणांबुजं वा कूर्पादिभिः सूक्ष्मपाषाणादिभिः किंस्विन्न व्यथते कथंतु नाम व्यथनेति नवानेव आयुर्जीवितं यासां नो धीर्भ्रम ति मुह्यतीति ॥१९॥ इति दशमे एकत्रिंशो ॥३१॥ श्रीगोपालजीसाहय श्रीमहंतगोपालजीसाह पश्री श्रीबल्लभविहारीजीसाहयः ॥

नं३ नं२

तत्र भगवतो ऽभिमतमज्ञात्वा तद्वचनेनैव पार्श्वे पिनु कामं भूतानि प्रायालो कर्त्तज्ञा तस्मिन्नेव पृच्छंति भजतः इति भजतः प्रातिलोम्येन तद्वत् केचिद्भजनानुलोम्यात् भजंति केचित्तु ततद्विपर्ययं यथा न भवति तथा तद्भजनं नेयेत भजतो ऽपि न भजंति अन्ये च नोभयानिति १८ विविक्तत्वाभिप्रायज्ञः स मोहः निरूपयति हे सख्यः उपकाराय स्वमुपकारा नेयाये मिथो भजंति अन्यस्य भजंति किं त्वात्मानमेव कुतः हि यतः स्वार्थ एवैकांततः उद्यमो येषां ते तत्र च न सौहृदं न च तेन च धर्मो दृष्टो दृष्टार्थत्वात् गो माहात्म्याहि भजने न त्वदृष्टार्थः १९ ये तु अभजतो ऽपि भजंति ते द्विविधाः करुणाः स्निग्धाश्च तत्र यथा क्रमं धर्मः कामो भवतः इत्याह भजंत्य भजतः इति २० तृतीयपक्षो ऽभजतः ऽपि भजंतीत्यपमर्थः ते चतुर्विधाः एके आत्मारामाः आत्मारामाः आप्तकामाः केचित्तु अकृतज्ञाः विपर्यसेन

॥ गोप्य ऊचुः ॥ भजतो ऽनुभजंत्येक एक एतद्विपर्ययं ॥ नोभयांश्च भजंत्येक एतन्नो ब्रूहि साधु भोः ॥ १७ ॥

॥ श्रीभगवानुवाच ॥ मिथो भजंति ये सख्यः स्वार्थैकांतोद्यमा हि ते ॥ न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १८ ॥ भजंत्यभजतो ये वै करुणाः पितरो यथा ॥ धर्मो निरपवादो ऽत्र सौहृदं च सुमध्यमाः ॥ १९ ॥ भजतो ऽपि न वै केचिद्भजंत्यभजतः कुतः ॥ आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥ २० ॥ नाहं तु सख्यो भजतो ऽपि जंतून्भजाम्यमीषामनुवृत्तिवृत्तये ॥ यथाधनो लब्धधने विनष्टे तच्चिंतयान्यन्निभृतो न वेद ॥ २१ ॥

धर्मो निरपवादो ऽत्र

पितृवत्काम्यत्वेन भोगेच्छारहिताः अन्ये कृतज्ञाः संभूताः अन्ये गुरुद्रुहः अतिकठिनाः सपितापमपि योपकर्तृन् इति न्यायात् द्रुपकर्त्ता गुरुस्तत्रपः तस्मै द्रुह्यंतीति तथा ते २० अथ च परमेश्वरो ऽभिगतमात्मानं मत्वा ऽभिसंकोचैः परस्परं गूढस्मितमुखीः ताः दृष्ट्वाह नाहमिति हे सख्यः अहं तेषां मध्ये न को ऽपि किंतु परमकारुणिकः परमसुहृच्च रूपं अमीषां भजतां अनुवृत्तिवृत्तये निरंतरध्यानप्रवृत्तये तान्न भजामि एतत्सदृष्टांतमाह यथेति तस्य धनस्यैव चिंतया निभृतः पूर्णो ऽन्यान्न इतियावत् अन्यत्क्षुत्पिपासादि अपि न वेद २१

॥ स्त्री॰ स॰ ॥
॥ ९६ ॥

पाः रात्रेस्तमो पथा

पुरुषः परमात्मा ज्ञानादिभिः शक्तिभिर्यथा यद्वा उपासकः पुरुषो ज्ञानबलवीर्यादिशक्तिभिः यद्वा पुरुषोऽनुशायी प्रकृत्याद्युपाधिसंबन्धो विरोचते तद्वत् ॥१०॥ विकसत्कुन्दमन्दारैः सुरभिर्योऽनिलस्तस्मात् षट्पदा यस्मिन् तत् ॥११॥ शरच्चन्द्रांशूनां संदोहैः समूहैर्ध्वस्तं दोषातमः रात्रिगतं तमो यस्मिन् अत एव शिवं सुखकं कृष्णायास्तस्या हस्ततरलैस्तरङ्गैरचिता आस्तृता कोमला वालुका यस्मिन् स्वं पुलिनं ताः समादाय निर्विश्य तत्र तासां दर्शनेनाधिकं व्यरोचतेति पूर्वेणान्वयः ॥१२॥ तास्तु मनोरथानामन्तं पपुः पूर्णकामा बभूवुः श्रुतयो यथेति श्रुत्यर्थः यथा कर्मकाण्डेषु

तामिर्विधूतशोकाभिर्भगवानच्युतो वृतः व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥१०॥ ताः समादाय कालिन्द्या निर्विश्य पुलिनं विभुः विकसत्कुन्दमन्दारसुरभ्यनिलषट्पदं ॥११॥ शरच्चन्द्रांशुसंदोहध्वस्तदोषातमः शिवं कृष्णाया हस्ततरलाचितकोमलवालुकं ॥१२॥ तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथान्तं श्रुतयो यथा ययुः स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीकॢपन्नासनमात्मबन्धवे ॥१३॥ तत्रोपविष्टो भगवान् स ईश्वरो योगीश्वरान्तर्हृदि कल्पितासनः चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥१४॥ सभाजयित्वा तमनङ्गदीपनं सहासलीलेक्षणविभ्रमभ्रुवा संस्पर्शनेनाङ्ककृताङ्घ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे ॥१५॥ श्रीशुकः ॥

श्रुतयः परमेश्वरमुपदिशन्त्यः कर्मकाण्डे कामानुबन्धैः पूर्णा इव न भवन्ति ज्ञानकाण्डे तु परमेश्वरं दृष्ट्वा तदानन्दपूर्णाः कामानुबन्धं जहतीति तद्वदिति स्वाः प्रकामात् प्रतिप्रेम्णा तमभजन्निति आह स्वैरिति अचीकॢपन् रचयामासुः आत्मबन्धवे प्रियतमाय ॥१३॥ गोपीसभागतस्ताभिः संमानितः सन् चकास शुशुभे त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकं पदं स्थानं वपुर्दधत् ॥१४॥ सहासलीलेक्षणेन

॥ भा॰ १०॰ पू॰ ॥
॥ ५७ ॥

१२ ७५४ द्वयो ना: २

रासक्रीडां रासोनाम बहुनर्तकीयुक्तो नृत्यविशेषः तां क्रीडां अन्योन्यमाबद्धाः संलग्ना बाहवो यैस्तैः सह हस्तौ सा हि स्त्रीभिः जिनयेन स्पर्श
यति रासोत्सवः संप्रवृत्तः तं च प्रपञ्चयति द्वाभ्यां द्वाभ्यां स्त्रीभ्यां तासां मंडलरूपेणावस्थितानां द्वयोर्मध्ये प्रविष्टेन तेन तेन च कंठे गृहीतानां अन्य
तया आलिंगितानां कीदृशेन यं स्वनिकटं मामेवाश्लिष्टवानिति मन्येरन् तेन इत्तरत्र द्वयोर्द्वयोर्मध्ये प्रविष्टेन स्त्रीभिः स्वर्णैः न
नेकरूपत्वं न तथा प्रवेशः सर्वसंनिहितत्वेन कुतः स्वैकनिकटस्थत्वं मन्येरन् तास्ताः इति स्मृतं च तं योगेश्वरेणेति स्त्रीविंशपत्निने स्वर्णः ॥ ३

॥ तत्रारभत गोविंदो रासक्रीडामनुव्रतैः ॥ स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥ रासोत्सवः
संप्रवृत्तो गोपीमंडलमंडितः ॥ योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ प्रविष्टेन गृहीतानां
कंठे स्वनिकटं स्त्रियः ॥ यं मन्येरन्नभस्तावद्विमानशतसंकुलं ॥ ४ ॥ दिवौकसां सदाराणामौत्सुक्या
पहृतात्मनां ॥ ततो दुंदुभयो नेदुर्निपेतुः पुष्पवृष्टयः ॥ जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोऽ
मलं ॥ ५ ॥ वलयानां नूपुराणां किंकिणीनां च योषितां ॥ सप्रियाणामभूच्छब्दस्तुमुलो रासमंडले ॥ ६ ॥
तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः ॥ मध्ये मणीनां हैमानां महामरकतो यथा ॥ ७ ॥ ॥

स्क॰ ध॰ ३

॥ श्रीरामः ॥
॥ ५७ ॥

तावन्नभस्तलमेव क्षोभ्यत्वेनाह नभ इति नभस्तावदेव विमानशतैः संकीर्णं नभो यन्न व सदाराणां उत्सुकसहितानां
नृत्यतः संकीर्णः महामरकतो नीलमणिः दिवि हैमानां मध्ये तासां स्वर्णवर्णानां स्त्रीणां अश्लिष्टानां शुशुभे गोपीदृश्यत्वे श्रा
यत्वेन विनैव मध्यपदं दृष्टिमेकवचनं ॥ ७ ॥

स्वर्णमणीनां २
देवानां

श्र जर्यः ला ग्रू जदाप

द१

एवं मदर्थोज्झितलोकवेदस्वानां मदर्थे उज्झितो लोकः पुत्राद्युक्तायुक्तप्रतीतिहेतुर्वेदश्च धर्माधर्मप्रतीतिहेतुस्ताः स्वा ज्ञातयश्च ये ताभिस्तासां युष्माकं परोक्षं मदर्शनं यथा भवति तथा भजता युष्माकमेव मालापान् शृण्वतैव निवसता तिरोहितं तमेव मन्त्रं नेन स्थितं तत् तस्मा
त् हे प्रियाः मा मां मां असूयितुं दोषारोपेण द्वेष्टुं यूयं मार्हथ न योग्याः स्थ ॥२१॥ अहं स्वतः पूर्णोऽपि युष्माकं प्रत्युपकारं कर्तुं नेति
निरवद्यसंयुजां निरवद्या संयुक् संयोगो यासां तासां वः विबुधानामायुषापि चिरकालेनापि स्वीयं साधुकृत्यं प्रत्युपकारं कृत्वा
कर्तुं न पारये न शक्नोमि कथंभूतानां या मां भजन् दुर्जर[illegible]गेहशृङ्खलाः संवृश्च्य निःशेषं छित्त्वा मां भजन्त तासां

॥ एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ॥ मया परोक्षं भजता तिरोहितं ॥
॥ मासूयितुं मार्हथ तत्प्रियं प्रियाः ॥२१॥ न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि ॥
॥ वः या माभजन्दुर्जरगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥२२॥ इति श्रीभागव ॥
॥ ते महापुराणे दशमस्कन्धे द्वात्रिंशोऽध्यायः ॥३२॥ श्रीशुक उवाच ॥ इत्थं भगवतो गोप्यः ॥
॥ श्रुत्वा वाचः सुपेशलाः ॥ जहुर्विरहजं तापं तदङ्गोपचिताशिषः ॥१॥ श्रीकृष्णाय नमः ॥

भक्तिं तन्न वक्तुं प्रेमयुक्त तथापि [illegible]कनिष्ठं तस्माद्वो युष्माकं मेव साधुना साधुकृत्येन तत् युष्माकं साधुकृत्यं प्रतियातु प्रति
कृतं भवतु युष्माकं सौशील्येनैव ममानृण्यं न तु मत्कृतप्रत्युपकारेणेत्यर्थः ॥२२॥ इति द्वात्रिंशः ॥३२॥ त्रयस्त्रिंशे तु गोपी
मण्डलीमध्यगो हरिः सिषेवे [illegible]मया मास क्रीडिनी वनकेलिभिः ॥ तत्र तु भृङ्गहेलाजन्यपतस्य भगवतोऽङ्गेन वपुषा कत्वर

वमे ३ कृ ३

गोप्यः ८८
वाच ग्रन्थ

स: ॥ १२ ॥ १५

॥ ना॰पं॰सू॰ ॥
॥ ९८ ॥

कूजंतीनूपुरमेखलाचयस्याः॥ एवमन्यास्वपिगोप्योयथापर्यंनानारीचुम्बैर्विजह्रुरित्याह॥ गोप्यइति॥ तत्रकाश्चिद्गायकेषुचसख्येके
षुचगंधर्वकिंनरास्विपुरासासावेशेनमुग्धत्सुरत्सुरवान्यामेववाद्यादिसंपन्निंदर्शयन्तेसंभ्रममाह॥ करोत्पलेति॥ करोत्पलैश्चल
कविटंकैरलंकृतैः॥ कपोलैश्चघर्मैश्चवक्त्रैश्चसुलक्षीः॥ शोभायासांता॥ घोषाः किंकिण्यः॥ वलयनूपुरैश्चघोषैर्वाद्यैः॥ स्वकेशेभ्यःस्रस्ताःस्र
जोयासांता॥ एतेनतालगतिसंमुक्ता॥ केशाः सप्रिरंकं॥ पंपाहेषुपुष्पवृष्टिमिवाकुर्वन्निस्पृष्टैर्हिता॥ भगवतासहननृतुः॥ कंचूमरास्वगा

॥ नृत्यंतीगायंतीकाचित्कूजन्नूपुरमेखला। पार्श्वस्थाच्युतहस्ताब्जंश्रांताधात्स्तनयोःशिवं ॥
॥ ४६ ॥ गोप्योलब्धाच्युतंकांतंप्रियएकांतवल्लभं। गृहीतकंठ्यस्तद्दोर्भ्यांगायंत्यस्तंविजह्रि ॥
रे ॥ ४७ ॥ कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियोवलयनूपुरघोषवाद्यैः। गोप्यःस ॥
॥ मंभगवताननृतुःस्वकेशस्रस्तस्रजोभ्रमरगायकरासगोष्ठ्यां ॥ ४८ ॥ एवंपरिष्वंगकरा ॥
॥ भिमर्शस्निग्धेक्षणोद्दामविलासहासैः। रेमेरमेशोव्रजसुंदरीभिर्यथार्भकःस्वप्रतिबिं ॥
॥ बविभ्रमः ॥ ४९ ॥ श्री॰रूसः ॥

यकाः यस्यांरासस्यसभायां॥ परिष्वंगोभ्योनानाविभ्रमैर्भगवतोविजह्रुः॥ एवंभगवानपिस्वविलासैस्ताभिः॥ सहरेमइत्याह॥ एव
मिति॥ एवंयंतदिलासान्निरूपितस्यैवतौइच्छांतः॥ यथार्भकइति॥ स्वप्रतिबिंबैर्विभ्रमः॥ क्रीडयस्वस्यइव॥ स्वनेनेनेतईर्शितंत्वा
यमेवैकःलाकौशलंसौ॥ गंध्यमाधुर्य[illegible]लावण्याहि॥ चनासुसंचार्यताभिः॥ सहरेमेयथार्भकः॥ स्वप्रतिबिंबैरिति ॥ ४८ ॥ श्री ॥

॥ श्री॰रूसः ॥
॥ ९८ ॥

मर

सर्व१

कृ:४

प:२

सयथा तानि । भृगुमुने तथा तान्यपि तेन विरेजुरित्याह पादन्यासैरिति भुजविधुतिभिः करतालैः नम्यमानैर्मध्यैः चलद्भिः कुचैः स्वपटैः स्रग्-
कुण्डलैः स्रग्गण्डेषु चञ्चलैः । स्विद्यन्मुखैः स्विद्यन्ति स्वेदमुद्रितानि मुखानि यासां ताः कबरेषु रसनासु च ग्रथयो दृढा यासां ताः । पद्मानि बुतासु [illegible]
ग्रथयः शिथिलग्रन्थय इत्यर्थः तत्र गायन्त्यस्तं श्रीकृष्णमेघचक्रे इव तावत् [illegible] स्थिरविद्युत इव विरेजुः [illegible] गर्जितमिवेति यथा स्वरेण
[illegible] नृत्यमानाः रक्तकण्ठ्यः [illegible] नानारागैरनुरञ्जितकण्ठ्यः कृष्णस्याभिमर्शेन संस्पर्शेन मुदिताः हृष्टाः [illegible] मुकुन्देन सह स्वरजातीः

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः । स्विद्यन्मु-
खैः कबररसनाग्रन्थयः कृष्णवध्वो गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥ ८ उच्चैर्जगुर्नृत्यमाना र-
क्तकण्ठ्यो रतिप्रियाः कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ९ काचित्समं मुकुन्देन स्वरजातीरमिश्रि-
ताः उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति १० तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् का-
चिद्रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः जग्राह बाहुना स्कन्धं श्लथद्वलयमल्लिका ११ तत्रैकां-
सगतं बाहुं कृष्णस्योत्पलसौरभं चन्दनालिप्तमाघ्राय हृष्टरोमा चुचुम्ब ह १२ कस्याश्चिन्नाट्यवि-
क्षिप्तकुण्डलत्विषमण्डितं गण्डं गण्डे संदधत्याः प्रादात्ताम्बूलचर्वितं १४

[illegible] नानारागैः [illegible] श्रीकृष्णेन [illegible] प्रियमाणेन संमानिता तज्ज्ञास्तु [illegible] मेव ध्रुवं ध्रुवाख्यं ताल विशे-
षं [illegible] उन्निन्ये उद्गीतवती १० चन्दनस्य गीतादिनाश्लिष्टस्य संमानिता [illegible] सामर्थ्यविलासितं [illegible] काचिदिति श्लथन्ति वलयानि मल्लि-
काश्च यस्याः सा उत्पलस्य [illegible] सौरभं [illegible] विसौरभं पत्युरस्तं बाहुं [illegible] विक्षिप्तयोश्चलयोः [illegible] मण्डितं गण्डं [illegible]

श्लो२

कुण्डल

ना॰ ६९ ८८
९८

मुखजलवेल्लितलिमाह तासिरिति तासां मंगसंगेन घृष्टसमर्दितायास्स्रजः तस्याः अत एव तासां कुचकुंकुमेन रंजितायाः संबंधिभिः गंधर्वपा
लिभिः गंधर्ववीथ्याः गंधर्वपतय इव गायंतो येलयस्तैरनुद्रुतः अनुगतः सन् श्रांतः वा उदकं प्रविशत् भिन्नसेतुः विदारितवप्रः स्वयंम्॥ तिस्रो
लिभिः गंधर्ववीथ्याः गंधर्वपतय इव गायंतो ... जलस्थलक्रीडे दर्शिते वनक्रीडां दर्शयति तत इति ... यमुना
तिलोकवेल्मयोः स्वरतिः आत्मारामोपि गंधर्वगोपीगंडस्थले मलिका जलस्थलक्रीडे दर्शिते वनक्रीडां दर्शयति तत इति सख्याया यमुना
याउपवने जलस्थलप्रसूनानां गंधो यस्मिन् तेनानिलेन युक्तानि दिक्तटानि यस्मिन् यदा दिशः तटं स्थलं च यस्मिन् तस्मि

तासिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजः स्वकुचकुंकुमरंजितायाः गंधर्वपालिभिरनुद्रुतआ
विशद्वाः श्रांतो गजीभिरिभराडिव भिन्नसेतुः २४ सोंभस्यलं युवतिभिः परिषिच्यमानः प्रेम्णे
क्षितः प्रहसतीभिरितस्ततोंग वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र
गजेंद्रलीलः २५ ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे चचार भृंगप्र
मदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः २६ एवं शशांकांशुविराजिता निशाः स सत्य
कामोऽनुरताबलागणः सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः २७

म १
श्री रु॰
२४

न्ववने रंगाणां प्रमदानां गणैरावृतः सन् रासक्रीडां निगमयन् एवमिति स सत्यकामः सत्यसंकल्पः अनुरागवत्यः अबलायस्य सः एवं
निशा:
सर्वाः सेवितवान् शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूताः ... इति
द्वितीयात्वं तत्संयोगे सर्वं गसाश्रयाः शारदीः प्रसिद्धाः काव्येषु याः कथाः ता सिषेवे इवेति स्वस्मिन्नेवावरुद्धो वा वैसौरतः चरमधा
तुः न तु स्खलितो यस्येति कामजयोक्तिः २७ श्री गोपालजी शाह श्री हरि हर माधवेति श्री गोपीनाथजी शाह ...

६९:

तान्युक्तं भगवद्विलासैराकुला बभूवुरित्याह तदङ्गेति तस्याङ्गसंगेन प्रकृष्टा या मुत् प्रीतिस्तया आकुलितानि स्ववशानीन्द्रियाणि या
सां ताः। विस्रस्तबंधनान् केशादीन् अंजसा प्रतिव्योढुं यथापूर्वं धर्तुं नालं न समर्था बभूवुः। विस्रस्ता माला आभरणानि च यासां ताः॥
न केवलं ता एवाकुलेंद्रियाः किं तु देव्योपीत्याह कृष्णविक्रीडितमिति किं च शशांकश्चेति अनेनैव नक्षत्र[illegible]मिते
न गणेन विस्मितायां ततः प्राकृताः सर्वेपि ग्रहाः तत्र तत्रैव तस्थुः ततश्च रात्रिरेव न व्यरमत् रात्रिर्बुध्यथा सुखं विजह्रुरिति किंच कर्तव्येति श्रयं

तदंगसंगप्रमुदाकुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां वा नांजः प्रतिव्योढुमलं व्रजस्त्रियो वि
स्रस्तमालाभरणाः कुरूद्वह॥१८॥ कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः कामार्दिताः श
शांकश्च सगणो विस्मितोऽभवत्॥१९॥ कृत्वा तावंतमात्मानं यावतीर्गोपयोषितः रेमे स भग
वांस्ताभिरात्मारामोपि लीलया॥२०॥ तासामतिविहारेण श्रांतानां वदनानि सः प्रामृजत्क
रुणः प्रेम्णा शंतमेनांग पाणिना॥२१॥ गोप्यः स्फुरत्पुरटकुंडलकुंतलत्विड्गंडश्रिया सु
धितहासनिरीक्षणेन मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः॥२२॥

नाबः कांतायनिमहामाये महायोगिन्यधीश्वरि नंदगोपसुतं देवि पतिं मे कुरु ते नमः इति प्रत्येकं ताभिः प्रार्थनात् भगवतापि
जातावचनाद्व्रजं सिद्धा मयेमा रंस्यथ क्षपा इति तदेव प्रतिज्ञातत्वात् तावंतमात्मानं कृत्वा रेमे इति यावतीर्यावत्यः कृपातिशयमाह
तासामिति ततोतिहृष्टानां गोपीनां चरितमाह गोप्य इति स्फुरतां स्वर्णकुंडलानां कुंतलानां च त्विषा गंडेषु या श्रीः तया सुधितेन स्म
यमानेन हासेन सहितेन निरीक्षणेन च ऋषभस्य पत्युः श्रीकृष्णस्य मानं दधत्यः तत्कर्माणि जगुः तस्य कररुहैर्नखैः स्पर्शेन प्रमो

नकेवलमस्पर्शीकरोति यत्पादपंकजपरागस्य निषेवणेन तृप्ता यद्वा यस्य पादपंकजपरागनिषेवायां सक्ता ये तथाभूतास्ते योगप्रभावेण निरस्ताखिलकर्मबंधाः
न बध्यमाना इति न स्वनन्नह्यमानाः बंधनमप्राप्नुवंतः परमार्थतस्तु गोपीनां मंगीकस्य परिहारं दृष्टांतेन भगवतः सर्वांतर्यामित्वेन परिहरति
का विवक्षास्याह गोपीनामिति यो ऽतश्चरति स एव अध्यक्षो बुद्ध्यादिसाक्षी स एव क्रीडनेन देहभाक् न तस्य परदाराभिगमनं येन दोषः स्यादिति न केवलं देह
भाक्त्वमस्य निरिहितेन कुतः प्रवृत्तिरित्यत आह अनुग्रहायेति शृंगाररसाकृष्टचेतसोऽतिबहिर्मुखानपि स्वपरान् कर्तुमिति भावः तत्र

यत्पादपंकजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबंधाः स्वैरं चरंति मुनयोपि न नह्यमाना
स्तस्येच्छयात्तवपुषः कुत एव बंधः ३६ गोपीनां तत्पतीनां च सर्वेषामेव देहिनां योंतश्चरति सोऽध्यक्षः क्री
डनेनेह देहभाक् ३७ अनुग्रहाय भक्तानां मानुषं देहमाश्रितः भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो
भवेत् ३८ नासूयन् खलु कृष्णाय मोहितास्तस्य मायया मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान्
व्रजौकसः ३९ ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः अनिच्छंत्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः
४० विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद्यः भक्तिं परां भगवति प्रति
लभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ४१ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे

सोपि निंदाचरतः से चेष्टितमेवेति चेत्तत्राह नासूयन्निति एवंभूतैस्तैर्गोपैर्नाचेतना कुर्वंतः पापात्तेयाः इति भावः ब्रह्म
रात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते भगवतः कामविजयरासक्रीडाश्रवणादेः कामजयमेव फलमित्याह विक्रीडितमिति अचिरेणाधी
रः सन् हृद्रोगं कामं आशु अपहिनोति परित्यजतीति से पंचाध्यायमोहेन रसेविस्पाधरमिति स्मितं श्रीभागवतभावार्थदीपि
कायां दशमस्य १ ॥ इति त्रयस्त्रिंशः ॥ ३३ ॥ श्री

।।३

प्रतीपं प्रतिकूलं स्वधर्ममिति स्पर्धः आचरत् कृतवान् नचेदमधर्ममात्रं फलं जनहिताय च न त्वं किंतु महासाहसमित्याह परदाराभि
मर्शनमिति आप्तकामस्य नायमधर्म इति चेत् तथैवं नहिं कामासनावाधि हितं केनाभिप्रायेण कृतवानिति एष इति आप्तकाम इ
ति परमेश्वरस्य मुनिकन्यायेन परिहर्तुं सामान्यतो महत्तरं तं तमाह धर्मव्यतिक्रम इति साहसं च दृष्टं प्रजापतीन्द्रसोम
विश्वामित्रादीनां न च तु तेषां तेजस्विनां दोषाय पापं न भवतीति तत्र हि यथा सर्वभक्षस्य ... न्यायेनान्योपि कुर्यादित्यत आह नै

॥राजोवाच॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च अवतीर्णो हि भगवानंशेन जगदीश्वरः २८

स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता प्रतीपमाचरद्ब्रह्मन् परदाराभिमर्शनं २९ आप्तका

मो यदुपतिः कृतवान्वै जुगुप्सितं किमभिप्राय एतन्नः संशयं छेत्तुमर्हसि ३० ॥श्रीशुक उवाच॥

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ३१ नै

तत्समाचरेज्जातु मनसापि ह्यनीश्वरः विनश्यत्याचरन्मौढ्यात् यथारुद्रोऽब्धिजं विषं ३२

ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत् ३३

कुशलाचरितेनैषामिह स्वार्थो न विद्यते विपर्ययेण वानर्थो निरहंकारिणां प्रभो ३४

किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसां ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ३५

नाहेति अनीश्वरो देहादिपारतंत्र्यः ... व्यतिरिक्तो विषमाचरन् ... इति वा पाठः सेवन्नमन्तयन्निति रूपं त
र्हि सदाचारस्य प्रमाणत्वमनन्यथाह ईश्वराणामिति तेषां वचः सत्यं ... तदुक्तमाचरेदेव आचरितं तु क्वचित्सत्यं अतो स्ववचोयु
क्तं तेषां वचसा यदुक्तं अविरुद्धं तत्तदेवाचरेत् ननु तर्हि तेषां विषममेवं साहसमाचरन्ति तत्राह कुशलेति प्रारब्धकर्मक्षयमात्रमे

ग्राचरितं २

॥ना॰ द॰ पू॰॥
॥२०१॥

यः परया शोभया प्रकाशते स भवान् कः इति ॥ शाहसं उपहसितवानस्मि ॥ प्रलब्धैः उपहसितैः ॥ अनुग्रहायेनैर्व पापेन निमित्तेन यस्य
तः शापात् ॥ आपृच्छे स्वलोकं गंतुम् अनुज्ञां याचे ॥ अमीवहन् दुःखनाशन ॥ ब्रह्महेरहं निहत्यैवं प्रागन्मत्त सुदर्शनेन तद्दुन्मादितं लक्ष्मः

॥श्रीकृष्णउवाच॥ ॥ को भवान् परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ॥ कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ॥११॥ ॥सर्पउवाच॥
॥ अहं विद्याधरः कश्चित् सुदर्शन इति श्रुतः ॥ श्रिया स्वरूपसंपत्त्या विमानेनाचरं दिशः ॥१२॥ ऋषीन् विरूपान्
आंगिरसः प्राहसं रूपगर्वितः ॥ तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥१३॥ शापो मेऽनुग्रहायैव कृतस्तैः
करुणात्मभिः ॥ यदहं लोकगुरुणा पादस्पृष्टो हताशुभः ॥१४॥ तं त्वाहं भवभीतानां प्रपन्नानां भयापहं
आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥१५॥ प्रपन्नोऽस्मि महायोगिन् महापुरुष सत्पते ॥ अनुजानीहि
मां देव सर्वलोकमहेश्वर ॥१६॥ ब्रह्मदंडाद्विमुक्तोऽहं सद्यस्तेऽच्युत दर्शनात् ॥ यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मा
त्मानमेव च ॥ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥१७॥ ॥श्रीशुकउवाच॥ ॥ इत्यनुज्ञाप्य दाशार्हं
परिक्रम्याभिवंद्य च ॥ सुदर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः ॥ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौ
कसो विस्मितचेतसस्ततः ॥ समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः ॥१८॥ कदाचिदथ
गोविंदो रामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां ॥२०॥ उपगीयमानौ ल
लितं स्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्तांगौ स्रग्विणौ विरजोंबरौ ॥२१॥ श्री गोपालजी सहाय ॥
शंतनुमनाड्यन् ॥ तस्मिन् संगमाह कदाचिदिति [illegible] विरजो वस्त्रा वितिविरजसी अंबरे ययोस्तौ ॥२१॥ श्री कृष्णाः

॥विद्याधरउवाच॥

॥श्रीकृष्णः॥
॥२०१॥

चनुस्त्रिंशे हिना ग्रस्तं नंदं हीप्रमुचत विद्याध्रंचापि शापाद्रक्तवच्चूडं तथावधीत् १ तासोपेशानः कामक्रीडितं शिवं कामतः अप्युरुः कृत्वा दर्शयति स्मेतथा विद्याधराधिपं २ तदेवं मामानुग्रहे [illegible] मिलेकाम अजयं प्रति पाद्यत्यै [illegible] व विद्याधरजयं प्रति मा [illegible] यितुं तत्स्वतेजो दर्शयति एकदेति गावः गावः मधु मधुरं मधन्नं मधुना सहितं मन्नं जेलमात्रं प्राश्योपोषितास्तां तत्र अषु स्पवतन्कश्चिन्महानहिः अजगरः

॥ श्रीशुकउवाच ॥ एकदा देवयात्रायां गोपाला जातकौतुकाः अनोभिरनडुद्युक्तैः प्रययुस्तेंबिकावनं १ तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुं आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेंबिकां २ गावो हिरण्यं वासांसि मधु मध्वन्नमादृता ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ३ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः रजनीं तां महाभागा नंदसुनंदकादयः ४ कश्चिन्महानहिस्तस्मिन् विपिनेतिबुभुक्षितः यदृच्छयागतो नंदं शयानमुरगोग्रसीत् ५ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयं सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ६ तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसोत्थिताः ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं विव्यधुरुल्मुकैः ७ अलातैर्दह्यमानोपि नामुंचत्तमुरंगमः तमस्पृशत्पदाभ्येत्य भगवान्सात्वतां पतिः ८ स वै भगवतः श्रीमत्पादस्पर्शहताशुभः भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितं तमपृच्छद्धृषीकेशः प्रणतं समवस्थितं दीप्यमानेन वपुषा पुरुषं हेममालिनं १०

उरगः उरसा गच्छतीत्युरगः तं लिहतीत्युल्मुकं प्रयसी ज्वलन्तः विव्यधुः ताडयामासुः उल्मुकैर्ज्वलत्काष्ठैः ७ अलातैस्तैरेव [illegible] ८ विद्याधरैरर्चितं पूजितं गोपेभ्य आत्मन ऐश्वर्यं प्रकाशयितुमपृच्छत् दीप्यमानेन वपुषा समवस्थितं ॥१०॥

पंचत्रिंशे वनं याते कृष्णे गोकुलयोषितः । पुनस्तल्लीलानुगीतेन निन्युर्दुःखेन वासरान् ॥ १ ॥ एवं रात्रिषु कृष्णेन सहैव मिलितानां दिवा तद्
रहितानां गीतेन ...दिननिस्तारप्रकारमाह गोप्य इति दुःखेन कृच्छ्रेण । वामबाहुकृतवामकपोल इत्यादिनि पुनरुक्तानि हे गोप्यः । वा
मे बाहौ तन्मूले कृतः अर्पितः वामकपोलो येन सः । वल्गिते नर्तिते भ्रुवौ येन स वल्गितभ्रूः मुकुंदः । अधरे अर्पितं वेणुं कोमला
ङ्गुलिभिराश्रिता मार्गाः सप्तस्वररन्ध्राणि यस्य तं यत्र यदा ईरयति वादयति २ तदा व्योमयानानां विमानानां वनिताः सिद्धैः स

॥ श्रीशुक उवाच ॥ गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः । कृष्णलीलाः प्रगायंत्यो निन्युर्दुःखेन वास
रान् ॥ १ ॥ गोप्य ऊचुः ॥ वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुं । कोमलांगुलि
॥ भिराश्रितमार्गं गोप्य ईरयति यत्र मुकुंदः ॥ २ ॥ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य ॥
॥ सलज्जाः । काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥ श्यामकं द्यमन्दः ॥

पतिभिः सह वर्तमानाः अपि तदेतत् गोरतम् उपधार्य श्रुत्वा कर्णपथमं विस्मिताः । न केवलं ... मार्गणेभ्यः सम
र्पितानि चित्तानि याभिः ...लज्जाः । तत्परवशाः । हे सख्यः सलज्जाः कश्मलं मोहं ययुः । अपस्मृत लिंगं अपस्मृताः वि
स्मृता नीव्यो याभिरिति । अत एवेत्थं तस्य कृष्णस्य विरहं कथं सहाम इति सर्वत्र वाक्यशेषः ३ श्रीकुंजविहारी

ना ४

॥ श्रीकृष्णः ॥
॥ १०२ ॥

स्मृता तत्

किंच निशामुखे शं■कुर्वतो उदिते उडुपे ■रका यस्मिन् तत् मल्लिकागंधेन मत्ता अलयो यस्मिन् तत् २२ स्वनिबद्ध्या त्वालस्यै युगपत्क

स्यायितुमशक्यमपि तौ स्वरमंडलमूर्छितं युगपत्कल्पयंतौ मनःश्रवणयोर्मंगलं यथा भवति तथा जगतुः श्रुत्वा यत्तामिति २३

निशामुखं मानयंतावुदितोडुपतारकं मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना २२ जगतुः सर्वभूतानां मनः

श्रवणमंगलं तौ कल्पयंतौ युगपत्स्वरमंडलमूर्छितं २३ गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप स्र

संसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः २४ एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् शंखचूड इति ख्या

तो धनदानुचरोऽभ्यगात् २५ तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनं क्रोशंतं कालयामास दिश्युदीच्याम

शंकितः क्रोशंतं कृष्ण रामेति विलोक्य स्वपरिग्रहं यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावतां २७ मा

भैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं २८ स वीक्ष्य ■ ताावनुप्राप्तौ

कालमृत्यू इवोद्विजन् विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया २९ तमन्वधावद्गोविंदो यत्र यत्र

स धावति जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः ३० अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः जहा

र मुष्टिनैवांग सहचूडामणिं विभुः ३१ शंखचूडं निहत्यैवं मणिमादाय भास्वरं अग्रजायाददात्प्री

त्या पश्यंतीनां च योषितां ३२ इति श्रीभागवते महापुराणे दशमस्कंधे शंखचूडवधो नाम चतुस्त्रिंशोऽध्यायः ३४

मूर्छिताः ततः क्षीणा लीनचित्ताः संस्रस्तं च स्वदुकूलं यस्मात् तमात्मानं देहं स्वस्थाः न विदुः स्रस्ताः केशेभ्यः स्रजो यस्य तं च ततो नाविदन् २४ निरी

क्षतोर्निरीक्षमाणयोः तौ नाथौ यस्य तं कालयामास प्रेरयामास दस्युना ग्रस्ता ग्रस्तास्■■■■ मा भैष्ट इत्यभयं न प्राप्नुते ■■ भयचौरो

असहचूडामणिं जहार स्वर्यः ॥ इति दशमे चतुस्त्रिंश ॥३४॥

श्री ५

३४

२८

३२

॥ भा०द०पू० ॥
॥ १०२ ॥

स्या वरे ख्यपतिति चित्रं ध्वनत इत्याह । अनुचरैर्गोपैः देवादिभिर्वा मुग्धानां वा अखं आदिपुरुष इवेति अचलभूतिर्निश्चलश्रीः वेणुनानंतरं आ
गानेन नतशाखाप्रणताभारेण विटपाः शाखा यासां ता वनगतालतास्तरवश्च आत्मनि विष्णुं प्रकाशमानं सूचयंत्य इव मधुधाराः ववृषुः स्मेति विस्मये
तद्वेव स्वत एव तथा तेषां अतीतानामपि तत्त्वेवानंद इति भावः एतानि विष्णुव्यक्तित्वलक्षणानि किंच सरसिकमलवनेषु विहरंतं पद्मिनीमध्यात् कर्ष

॥ अनुचरैः समनुवर्णितवीर्य्यः आदिपुरुष इवाचलभूतिः । वनचरो गिरितटेषु चरंतीर्वेणुना
ह्वयति गाः स यदा हि ॥ ८ ॥ वनलतास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्पफलाढ्याः प्रणतभार
विटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ दर्शनीयतिलको वनमालादिव्यगंधतुलसीम
धुमत्तैः अलिकुलैरलघुगीतमभीष्टमाद्रियन्यर्हि कूजितवेणुः ॥ सरसि सारसहंसविहंगा
श्चारुगीतहृतचेतस एत्य हरिमुपासत ते यतचित्ता हंत मीलितदृशो धृतमौनाः ॥ ९ ॥ श्री

णं नमीनं किं तु न स्येवामिस्याह । दर्शनीयतिलक इति दर्शनीयतिलको यस्य दर्शनीयानां सुहृद्गणानां मध्ये मुख्य इतिवा वनमा
लेयात् सुपादिव्यगंधा तुलसी तस्याः मधुनामत्तैः अलिकुलैः अलघु उच्चैः अभीष्टं अनुकूलं गीतं आद्रियन् आदरेणाधयंहि अधरे
संधितवेणुर्भवति तर्हि सरसि सारसहंसाश्च अन्ये च विहंगाः ते चारुगीतेन हृतचेतसः एत्य नतः आगत्य हरिमुपासत तत्र

संधीत

॥ श्रीकृष्ण ॥
॥ १०२ ॥

गहूत२

हंत हे अबलाः इदं चित्रं शृणुत हारहासः हारवद्दीप्तिशाली हासो यस्य सः यद्वा वेणुवादने अधोवदनेन स्मितः हारेषु स्फुरन् हासो यस्य तं
रत्नवद्वहासि शोभमानो हासो यस्य सः यद्वा हारतां गतो हास इव शुभ्रो मुक्ताहारो यस्मिन् उरसि उरसि स्थिरा विद्युल्लक्ष्मीर्यस्य सः यर्हि यदा
कूजितवेणुर्नादितवेणुर्भवति तदा व्रजे ये वृषा मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ते आरात् दूरादेव दंतैर्दष्टाः कवला ग्रासा
येषां ते धृता उन्नमिताः कर्णा येषां ते निद्रिता इव लिखितचित्रमिवासन् स्थितवंतो नितरां विस्मिताः स्मेरमतिचित्रमित्यर्थः किंच श्रवणेन नामसार

हंत चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् नंदसूनुरयमार्तजनानां नर्मदो यर्हि
कूजितवेणुः ४ वृंदशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् दंतदष्टकवला धृत
कर्णा निद्रिता लिखितचित्रमिवासन् ५ बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः
कर्हिचित्सबल आलि स गोपैर्गाः समाह्वयति यत्र मुकुंदः ६ तर्हि भग्नगतयः सरितो वै तत्प
दांबुजरजोऽनिलनीतं स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ७ श्रीगो

स्तुनदतीव चित्रमित्याह हे आलि बर्हिणो मयूरस्य स्तबकाः मयूरपिच्छगुच्छा धातवो गैरिकादयः पलाशानि पत्राणि तैः बद्धः
मल्लानां परिबर्हः परिकरः तं विडंबयति अनुकरोतीति तथा स मुकुंदः गोपैः सह वेणुनेति उपरितनमत्रापि कर्तव्यं यत्र यदा गाः समा
ह्वयति तर्हि तदा नद्यः निश्चलत्वात् अनिलेन नीतं तस्य पदांबुजरजः स्पृहयंत्य इव भग्नगतयः सरितः वै निश्चितं वयमिवात्र
अबहुपुण्याः यतो न प्राप्नुवंति केवलं प्रेमणा वेपिताः भुजाः तरंगा यासां ताः स्तिमितानि निश्चलानि जलानि यासां ताः गोप्यो पि
मितिजला भवंति ७ श्रीगोपा

वहासि स्थिरा विरि
छुब्धमाध्वै मुस्क
पाद्य यस्य सः २

६

स्वकलंकमुमेहंकितुं महस्याहुः निजपदाब्जदलैरिति । ध्वजादिभिर्विचित्राणि ललामानि चिह्नानि येषां तैर् निजपदान्येवाब्जदलानि तैः व्रजभु
वः खुरतोदं खुरजन्यव्यथां शमयन् वर्ष्मणा धुर्यो गजः तद्वद्गतिर्यस्य स ईडितो वादितो वेणुः येन सः ॥१६॥ व्रजतीति तेन निमित्तेन सविलासवीक्षणेन अर्पि
तो मनोभवस्य वेगो याभिस्ता वयं कुजा वृक्षास्तेषां गतिं गमिता सत्यः मोहेन न विदामः कवरं वसनं वेति ॥१७॥ मणिधरः मणीन् ग्रथितान्
गोगणनार्थं धरतीति मणिधरः क्वचिद्देशे नैचिकीर्गाः आगणयन् तया दयितगंधया तुलस्या तस्या मालया सह वर्णम्

॥निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगति॥
॥रीडितवेणुः ॥१६॥ व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः कुजगतिं गमिता न विदा॥
॥मः कश्मलेन कबरं वसनं वा ॥१७॥ मणिधरः क्वचिदागणयन् गा मालया दयितगंधतुलस्याः प्र॥
॥णयिनोनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र ॥१८॥ क्वणितवेणुरववंचितचित्ताः कृष्ण॥
॥मन्वसत कृष्णगृहिण्यः गुणगणार्णमनुगम्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥१९॥ श्री॥

१८

नः प्रणयिनः प्रियस्यानुचरस्य अंसे भुजं प्रक्षिपन् यत्र यदा कदाचिदगायत तत्र तदा क्वणितस्य वेणो रवेण वंचितानि
हृतानि चित्तानि यासां ताः कृष्णस्य गृहिण्यः पत्न्यो हरिण्यः गुणगणानामर्णं गुणगणार्णं समुद्रं कृष्णमनुगम्य प्राप्य तं कृष्णमेवान्वसत सेवन्ते
नेत्रैः कुतः यतो विमुक्ता गृहाशा याभिस्ताः गोपिका इव ताः अपि एवमेवान्वसतेति ॥१९॥ श्रीगोपीनां गायनम् ॥ श्रीकृष्णः

शा० २

स्तो० ४ गर्जति २

मेघोपि हरिं सेवत इत्याह सहबल इति नो व्रजदेव्यो गोप्यः सहबलः सहरामः कृष्णः स्रग्भिर्निर्मितामंसः स्रवतंसा मां कर्णभूषणो आसां विलासो यस्य य हासुमनः फलसुगणा पीडेन विलासो यस्येति क्षितिनृतः सानुसृतिरेकरे दुर्वर्तमानाः स्वयं जातहर्षो विमिं हर्षयन् यश्च वेणुरवेण उपरंमति नादयति नादेना पूरयतीत्यर्थः तदा मेघः महतः कृष्णस्या क्रमेणेन शंकितं चेतो यस्य सः नपुरतो याति नचो द्वेगं दद्यतीति किं तु तत्रैव [illegible] स्थितः सन् वेणुर वमनु मंदं मंदं गर्जति किंच सुहृदं विमार्गित हरणा [illegible] सात्सम्यात् सुहृत् कृष्णः तं सुमनोभिः स्तम्बवर्षन् स्वहस्तैर्देवैः क्रियमाणं कुसुमवर्षं मेघे नत्स्वापित्वोत्तं नु खारो वा कुराम न यो कस्मिन्ना सम्बन्धं देवतात्र्यम्बवर्षीदिति प्रतपा [illegible] यद्दृतिश्च न [illegible] यत्र [illegible] यथा कुर्वन्निति अपि

सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः हर्षयन् यर्हि वेणुरवेण जातहर्ष उपरंभति विश्वं ॥ १२ ॥ महदतिक्रमणशंकितचेता मंदमंदमनुगर्जति मेघः सुहृदमभ्यवर्षत्सुमनोभिः छायया च विदधत्प्रतपत्रं ॥ १३ ॥ विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः तव सुतः सति यदाधरबिंबे दत्तवेणुरनयत्स्वरजातीः ॥ १४ ॥ सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः कवय आनतकंधरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः ॥ १५ ॥ श्रीगोपालजी शरणं ॥

किं च महरेतदाश्चर्यमित्याह विविधेति हे सति यशोदे तव सुतो नानागोपक्रीडासु निपुणः वेणुवाद्ये विषये निजैर्वा शिक्षा या सुताः स्वो त्प्रेक्षिताः नत्वन्यतः शिक्षिताः इत्यर्थः स्वरजातीः निषादर्षभषड्जादिस्वरालापनेन तान् स्वनयत उन्नीतवान् [illegible] तेन ताः स्वरजातीः सवनशः मंद्रमध्यतारादिभेदैर्वेणुतो ध्वनिरागतः तं तत्स्थानतानाकं धरां चित्तं च येषां ते उपधार्य सम्यगाकर्ण्य कवयः कोविदा अपि ते न निश्चितं तत्त्वं तद्भेदो येषु ते कश्मलं मोहं ययुरिति ॥ १५ ॥

१ कर्णाभूषणा

श्रमा१

ना. १. म. १०५

मदेन विघूर्णिते लोचने यस्य सः बदरपाण्डुवदनः ईषत्पक्वबदरवत्पाण्डु वदनं यस्य सः श्रमहेतुः केन
मुनिसंघ्रमेण ... सर्वान्पालकयपंति ईषन्मदेन विघूर्णिते लोचने यस्य सः ... कोमलं गंडस्थलं शोभयन् ... यदुपतिर्द्विरद ... स्मरति च भगवंतं वसुदेव
कुकुंडलयोर्लक्ष्म्या कांत्या मृदुगंडो यस्मिन् ... तत्र तत्र कृष्णलीलां ... दुरंतमिति ... गजेन्द्रगतिः चंद्र
वत् ... इत्यादि गर्गवाक्यप्रतिबोधितो ... उपयाति समीपमायातीति एवं विरहदुःखेनापि ... लीलास्तु गायंत्यः ता
व्रजस्य वक्त्रं ... जगवामस्माकं ... दिनतापं ... तासामहानुरागः ... स्वरूपेऽपि रेमिरे २६ इति श्रीभा
स्मिन्न चित्तं चेतना जीवितं यासां ताः तस्मिन्नेव मनो यासां ...

मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली बदरपाण्डुवदनो मृदुगंडं मंडयन्कनककुंडल
लक्ष्म्या २४ यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते मुदितवक्त्र उपयाति दुरन्तं मोचयन्व्र
जगवां दिनतापं २५ श्रीशुक उवाच एवं व्रजस्त्रियो राजन्कृष्णलीलानुगायतीः रेमिरेऽहस्सु तच्चित्ताः
तन्मनस्का महोदयाः २६ इति श्रीभागवते महापुराणे दशमस्कंधे गोपिकागीतं नाम पंचत्रिंशोऽध्यायः ३५

२ कृष्णा

श्रीशुक उवाच अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः महीं महाककुत्कायः कंपयन्खुरविक्षतां १

वृषेण ३५ वद्धिरोतु हतेरिष्टे नारदोऽनावलाच्युतौ वसुदेवस्य नौक्तानां कृशोऽक्रूरं समाहिरान् १ गोपीरास्तं न तपांतं ...
हत्वा सः ... गोपी ... समाहितः २ एवं देवगंधर्वादिगीतं ... श्रीवल्लभप्रभृति ... व्रजस्य परमोत्सवे
... महतो ककुत्कायो यस्य सः ... नीमानो जाते ... स ... रे ... तं महीं कंपयन् १ श्रीवल्लभजी श्री

श्रीलक्ष्मीः १०५

श्रीगोपालजी श्रीगोपीनाथजी श्रीगिरधारिजी श्रीदामोदरजी

तदेवं कृष्णवनं प्रदेशे तु क्रीडितानामनुवादः गोधनान्निवर्त्य यमुनायां क्रीडितवान् सोऽपि मा गया मनुवर्णयंति कुंददामकृतकौतुकवेष इति । गोपीना
मुत्सवाय कुंददाम्नि कृतं कौतुकं [illegible] वेषो लंकारो येन सः । हे अनघे यशोदे तव वत्सपुत्रः नंदसूनुः कृष्णः यद्वा महे [illegible] नर्मदः
नां [illegible] विजहार क्रीडति नर्मदः हर्षदः [illegible] मलयजस्पर्शेन मलयजस्य चंदनस्येव सुख
स्पर्शेन [illegible] मानयन् अनुकूलं यथा तथा उपवाति वीजयति यद्वा मलयजो दक्षिणो वायुरिति यद्वा मलयजैर्यजस्य स्पर्शे ॥ २१
नवांगेन [illegible] स्पर्शेन मानयन्निति किं च वंदिनः इति [illegible] तत गंधर्वादिगणाः वाद्यगीतपुष्पबलिभिः परिवव्रुः परितः उपासते

कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायां । नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां
विजहार ॥ २० मंदवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन । वंदिनस्तमुपदेवगणा ये वाद्य
गीतबलिभिः परिवव्रुः ॥ २१ वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः । कृत्स्नगोधन
मुपोह्य दिनांते गीतवेणुरनुगेडितकीर्तिः ॥ २२ उत्सवं श्रमरुचापि दृशीनामुन्नयन्खुररज
श्छुरितस्रक् । दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २३ श्रीगोपालजी

ग्याहीनत्वेव यवनाविधीयते यो यमग्निः स तव मुखमित्यादिवचनव्यक्ताई पूर्णं चतुः श्रुतिः श्रवणेंद्रियं कं सुरेंद्राः प्राण
श्रवलं च तत्त १३ अस्थ्यः परस्य तेऽस्थिनखानि १४ न केवलमेतावत् किंतु सर्वोऽप्ययं प्रपंचस्त्वय्येव कल्पित एवेति वद

तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे गुणप्रवाहोऽयमविद्यया कृतः प्रवर्तते देव
नृतिर्यगात्मसु १२ अग्निर्मुखं तेऽवनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः द्यौः कं सुरेंद्रास्तव बा
हवोऽर्णवाः कुक्षिर्मरुत्प्राणबलं प्रकल्पितं १३ रोमाणि वृक्षौषधयः शिरोरुहाः मेघाः परस्यास्थिनखा
नि तेऽद्रयः निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते १४ त्वय्यव्ययात्मन्पुरुषे प्रक
ल्पिता लोकाः सपाला बहुजीवसंकुलाः यथा जले संजिहते जलौकसोऽप्युदुंबरे वा मशका मनोमये १५

त्येवं तत्रापि प्रपंचस्य षड्जन्मादयः विकारास्त्वयि न प्रसज्यंते तस्य त्वयि कल्पितत्वादित्याह त्वयीति अव्ययात्म
न् पुरुषे पूर्णे लोकादयः संजिहते प्रचलंति हि अव्ययात्मन्निति वा कथं तर्हि तेऽत्वयि मनोमये मनः प्रधाने मनोवृत्ति
वांगे च रूपते त्वग्ग्रया बुद्ध्या मनसैवानुद्रष्टव्य इत्याद्युक्तेः जले यथा जलौकसः सूक्ष्मप्राणाः उदुंबराशयः यथा
उदुंबरांतः केसरेषु मशकाः परस्परं वार्तानभिज्ञाः एवमनंतानि ब्रह्मांडानि त्वयि संचरंतीत्यर्थः १५ श्रीगोपाल

सष

८३

८

सर्वभूतत्वप्रयहेतुत्वमभिव्यंजनस्तौति नमस्त इति वासुदेवाय चित्ताधिष्ठात्रे सर्वभूतक्षयाय क्षयस्याश्रयः अहंकारस्तत्प्राणिनामाश्रयः तत्तस्माद्धंकाराधिष्ठात्रे संकर्षणाय इत्यर्थः हृषीकेशेतिबुद्धिमनसोधिष्ठात्रोः प्रद्युम्नानिरुद्धयोरेकीकृत्य ग्रहणं शरणाग तं मां पाहीति प्रार्थना ३० ॥ इति दशमे चत्वारिंशः ॥ ४० ॥ एकचत्वारिंशके [illegible] जकं प्रविश[illegible] पुरीं ततो चरतान हरन्तुष्टः सुदाम्नो मा यकस्य च सशंक[illegible] क्रूरमनः प्रमोद[illegible] स्वधा[illegible]मसंदर्शनसत्कृपा तः स्वराजधानीं मथुरामपश्यदल्लेन [illegible] तान [illegible] तम [illegible] होत्स

॥ नमस्ते वासुदेवाय सर्वभूतक्षयाय च हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ३० ॥ इति श्रीभागवते महापुराणे ॥ दशमस्कंधे पूर्वार्धे ॥ चत्वारिंशोऽध्यायः ॥ ४० ॥ श्रीशुक उवाच ॥ स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः भूयः समाहरत्कृष्णो नटो नाट्यमिवात्मनः १ सोपि चांतर्हितं वीक्ष्य जलादुन्मज्य सत्वरः कृत्वा चावश्यकं सर्वं वि स्मितो रथमागमत् २ तमपृच्छद्धृषीकेशः किं ते दृष्टमिवाद्भुतं भूमौ वियति तोये वा तथा त्वां लक्षयाम हे ३ ॥ अक्रूर उवाच ॥ अद्भुतानीह यावंति भूमौ वियति वा जले त्वयि विश्वात्मके तानि किं मेऽदृष्टं वि पश्यतः ४ यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले तं त्वानुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतं ५ ॥ श्रीशुक ॥ उवाच ॥ इत्युक्त्वा चोदयामास स्यंदनं गांदिनीसुतः मथुरामनयद्रामं कृष्णं चैव दिनात्यये ६

वा यानि भूमौ वियति जले वा यावंत्यद्भुतानि तानि त्वय्येव [illegible] संति तं च त्वां पश्यतो मे किमद्भुतमदृष्टं अपि तु सर्वं दृष्टमित्य र्थः [illegible] नुमत्वान्नेः स्वं च एव त्वं विस्मितमद्वोल्लतीतोसि अतो भूमौ वियति जले वा किमद्भुतं दृष्टं वदेति चेत्तत्रा ह यत्राद्भुतानीति यत्र त्वयि सर्वाण्यद्भुतानि तं त्वामिह पश्यतो मे अस्मात्र [illegible] प्यादेः किमद्भुतं दृष्टं त्वां विना न तत्र [illegible]किंचिदद्भुतमित्यर्थः ब्रह्मन्परमेश्वेत्यर्थः ब्रह्मेति वा पाठः ५ गांदिनीसुतः अक्रूरः ६ श्रीकृष्णाय नमः

तदेवं सदृष्टांतमाह यथेति तस्माज्जलात् उद्भवानि तृणादीनि तैः तथा मायया छन्नं त्वामहं हित्वा पराङ्मुखो वर्तइति २४ नन्वेवं जानतः कुतो विषयाभिमुखता तत्राह नोत्सह इति कृपणा विषयवासनायुक्ता धीर्यस्य सः अत एव कामकर्मभ्यां हतं हृतं इंद्रियैर्विलिवैर्विषमसंयुक्तैः इतस्ततश्चाकृष्यमाणं मनः रोद्धुं नियंतुं न शक्नोमीति २५ तदेवमस्वतंत्रोपि सोहं तवांघ्रिमुपगतः शरणं प्राप्तः नन्विदमपरतंत्रस्य तदपि कुतस्तत्राह तच्चापीति हे ईश अयं तव पादोपगमनं चासतां दुरापं यतो भवतो ऽनुग्रह एवेत्यहं मन्ये अनुग्रहे सतीति वा ननु सत्संसेवयैवं भवति किं मदनुग्रहेणेत्यत आह पुंस इति जीवस्य संसारस्यापवर्गः समाप्तिर्यदा तदा त्वयि मतिर्भवे त्संमावना स्यादेवं भवति हे अब्जनाभ नहि सदुपासनया संपद्यते न यैवं तया मतिर्भवेत् न त्वत्कृपां विना न सत्संसेवा नित्तरां त्वय्मातिर्नतु

यथाबुधो जलं हित्वा प्रतिछन्नं तदुद्भवैः अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः २४ नोत्सहेहं कृपणधीः कामकर्महतं मनः रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः २५ सोहं तवांघ्र्युपगतोस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् २६

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे पुरुषेशप्रधानाय ब्रह्मणेनंतशक्तये २८

श्रीमुक्तिरित्यर्थः २८ पादयोः पतन्प्रार्थयति द्वयेन नम इति विज्ञानमेव मात्रा मूर्तिर्यस्य तस्मै अत एव सर्वप्रत्ययहेतवे सम स्तज्ञानकारणाय किंच पुरुषेशप्रधानाय पुरुषस्य ये ईशाः सुखदुःखप्रापकाः कालकर्मस्वभावादयः तेषां प्रधानाय नियंत्रे कुतः ब्रह्मणो परिपूर्णाय किंच अनंतशक्तये अनंताः शक्तयो यस्य यद्वा अनंता मायाख्या शक्तिर्यस्य तस्मै अथवा प्रधानं प्रकृतिः पुरुषस्तत्प्रवर्तकः ईशः कालः एतत्त्रितयात्मने ब्रह्मणो वस्तुतो भगवान् प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः सतोभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहमिति २८ श्रीकृष्ण दामोदर माधवेति श्रीगोपाल जीशाह

श्रीः १

भा०१०पू० १२१

उपसहसा कानीतानिवेति स्वकृतं कर्म निवेद्य समर्पितिः १८ गोपैः परिवारितः प्रविशत् १९ आरब्ध दृशां भू रीमनुवर्णयति च
तुसृतिः ददर्श तां मि नि स्फाटिकानि तुंगानि गोपुराणि पुरद्वाराणि अस्यां निचद्वाराणि यस्यां तां बृहंति हेममयानि कपाटानि तो
रणानि च यस्यां तां ताम्रश्चारः [illegible] कूटं यस्यां तन्मयाः कोष्ठ धान्यागाराणि यस्यां तां लाद्युद्यानोपवनानि तां परिखया आवृतितः दुर्गमां आरामोद्यानानि दुरा
सदां दुर्गमां उद्यानानि फलपुष्पवृक्षाणि निचनानि रम्याणि उपवनानि च निकटानि तैरुपशोभितां २० सौवर्णाः शृंगाटकाश्चतुःपथाः हर्म्या
णि [illegible] धनिनां गृहाणि निष्कुटाः गृहोद्यानानि आरामाश्च तैः श्रेणीनामेकरूपशिल्पोपजीविनां सभा जिहय वेशनस्थानेश्व च

॥श्रीशुक उवाच॥ एवमुक्तो भगवता सोक्रूरो विमना इव पुरीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ १८ अथाप
राह्णे भगवान्कृष्णः संकर्षणान्वितः मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितः १९ ददर्श तां स्फाटिकतुंगगोपु
रद्वारां बृहद्धेमकपाटतोरणां ताम्रारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभितां २० सौवर्णशृंगा
टकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृतां वैडूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु
२१ जुष्टेषु जालामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादितां संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्यां
कुरलाजतंडुलां २२

कबूतर इति ख्यातः

नेरत्नपरगृहेष्वोपस्कृतां अलंकृतां अमलः स्फटिकः हरितो मरकतः वैडूर्यादिरत्नैर्जुष्टेषु वलभ्यादिषु आविष्टैः पारावतैर्बर्हिभि
श्च नादितां तत्र वलभ्यो गृहगोपुरोमागेषु वक्रदारुघटनानि चेदयो वलभीनाम धोदेशे विरचिताः अवष्टंभवेदिका जालामुखरं
ध्राणि कुट्टिमानि मणिबद्धान्भूमयस्तेष्विति रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गाश्चान्ये च चत्वराणि अंगनानि संसि
क्तानि रथ्यादीनि यस्यां तां प्रकीर्णमाल्यादयो यस्यां तां २२ श्रीकृष्णायनमः श्रीगोपालजीसहाय श्रीरामोहरायन्मः

गवाक्षच्छिद्र णि २

श्रीकृस: १२१

रामः

नो

दर्शितानां दुःपस्पंन एव स्थिता इत्यर्थः ७ रामकृष्णागमनं प्रतीक्षमाणाः स्थिताः ८ प्राश्रितं विनीतं ९ स्वगृहं च प्रविशंतां स्व
व मुख्यं उत्तीर्य विश्राम्येत्यर्थः १०-११ साग्रजः सहगोपालैरित्यर्थः १२ पद्भ्यां भेन यस्य पादरजसः क्षालनोदकेन गृहं गंगनस्थि
तेन १३ श्लोकाः पुण्यकीर्तयः १४ कोनाम को नाम यागतिलोकं च लेभे १४ यः पुनन्त यत्रितवमः ख्याता निरध्वस्य स्वर्गप्राप्ताः

मार्गे ग्राम जनाराजं स्तत्र तत्रोप संगताः वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः ७ तावद्व्रजौक सस्तत्र नंद
गोपादयो ग्रतः पुरोपवनमासाद्य प्रतीक्षंतोवतस्थिरे ८ तान् समेत्याह भगवानक्रूरं जगदीश्वरः गृही
त्वापाणिना पाणिं प्रश्रितं प्रहसन्निव ९ भेवान् प्रविशतामग्रे सहयानः पुरीं गृहं वयं त्विहावमुच्याथ
ततो द्रक्ष्यामहे पुरीं १० ॥अक्रूरउवाच॥ नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो त्यक्तुं नार्हसि मां नाथ भक्तं
ते भक्तवत्सल ११ आगच्छ याम गेहान्नः सनाथान् कुर्वधोक्षज सहाग्रजः सगोपालैः सुहृद्भिश्च सु
हृत्तम १२ पुनीहि पादरजसा गृहान्नो गृहमेधिनां यच्छौचेनानुतृप्यंति पितरः साग्नयः सुराः १३
अवनिज्यांघ्रियुगलमासीत् श्लोको बलिर्महान् ऐश्वर्यमतुलं लेभे गतिं चैकांतिनां तु या १४
आपस्तेंघ्र्यवनेजन्य स्त्रींल्लोकान् शुचयो पुनन् शिरसाधत्त याः शर्वः स्वर्याताः सगरात्मजाः १५
देवदेव जगन्नाथ पुण्यश्रवणकीर्तन यदूत्तमोत्तमश्लोक नारायण नमोस्तु ते १६ ॥श्रीभगवानुवाच॥
आयास्ये भवतो गेहमहमार्य समन्वितः यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं १७ श्रीशुक उवाच
१५ अर्घ्यमानो न मस्करोति देव देवेति अतः परं अन्यधेयो नास्तीति मत्वा बहुधा संबोधयति १६ आहो नावत् य
दुचक्राय द्रुह्यतीति यदुचक्र ध्रुक् तं कंसं हत्वा सुहृदां प्रियं वितरिष्ये दास्यामि १७ श्रीशुक उवाच नमः श्री रामो हर

आनंदजित्ता
पुरुषार्थी
जनार्दनम ४

मुहुः श्रुतमनुद्रुतचेतसः सप्रेमं दृष्ट्वा तत्प्रेक्षणं च उत्स्मितं चैतदेव सुधा तया उक्षणं सेचनं तेन लब्धो मानो याभिस्ताः दृशा उद्धारितेन नेत्र
द्वारेणात्मनि मनसि लब्धं प्राप्तं परिष्वज्य तस्मात् हृष्यत्त्वचो जनितमनंतमाधिं यथा जहुः हे अरिंदम निर्जितकामेति संबोधनं शृंगाररसो
तेनिमग्नो माभूदिति २८ सौमनसैः पुष्पैर्नैककुसुमसमूहैः सोदकमन्नोदपात्रैः २९ ३० पौराः पुरस्त्रियः ३१ रजको वस्त्रनिर्णेजकः सर्ववस्त्रा

दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः आनंदमूर्तिमुपगुह्य दृशात्मलब्धं हृष्य
त्त्वचो जहुरनंतमरिंदमाधिं २८ प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखांबुजाः अभ्यवर्षन्सौमनस्यैः प्रमदा बलकेशवौ
२९ दध्यक्षतैः सोदपात्रैः स्रग्गंधैरभ्युपायनैः तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ३० ऊचुः पौरा अहो गोप्यस्तपः
किमचरन्महत् या ह्येतावनुपश्यंति नरलोकमहोत्सवौ ३१ रजकं कंचिदायांतं रंगकारं गदाग्रजः दृष्ट्वायाचत वा
सांसि धौतान्यत्युत्तमानि च ३२ देह्यावयोः समुचितान्यंग वासांसि चार्हतोः भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ३३
स याचितो भगवता परिपूर्णेन सर्वतः साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ३४ ईदृशान्येव वासांसि नित्यं गिरि
वनेचराः परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ३५ यातासु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा बध्नंति
घ्नंति लुंपंति दृप्तं राजकुलानि हि ३६ एवं विकत्थमानस्य कुपितो देवकीसुतः रजकस्य कराग्रेण शिरः काया
दपाहरत् ३७ तस्यानुजीविनः सर्वे वासःकोशान्विसृज्य वै दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेच्युतः ३८ व
सित्वात्मप्रिये वस्त्रे कृष्णः संकर्षणस्तथा शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ३९

लंकारं रंगमपि कुर्वन् रंगकारः ३२ ३३ रुषितः कुपितः ३४ हे उद्वृत्ताः गिरिवने चरथ ये ते यूयं नित्यं ईदृशं परिधत्त इति संभावनायां लो
ट् अभीप्सथ प्रार्थयध्वं राजकुलानि राजकीयाः लुंपंति निःस्वं कुर्वंति ३६ ३७ वासःकोशान्वस्त्रपुटकान् ३८ आत्मप्रियाः

तथा स्वलंकृतानि भ्राणि येषां ते अरहाय स्कंतां कैः स्मपूर्णैः कुंभैः दध्याद्यचंदनेन च उत्तितैः सितैः प्रसूनानां दामानां चावलयो येषु तैः दंडैः
फलगृहैः उपलतितारंभाः कमुकस्तम्भ न तस्सहितैः सकेतुभिः केतवो ध्वजाः तत्सहितैः पट्टिकाः वितस्ति विस्तार पट दुकूलैः वस्त्राणि तत्सहि
तैः तत्र वेयंरीतिः स्वरैषु नयनतलं उल्लानामुपरि कुंभाः तन्मतिः प्र[illegible]वलयैः य कंडेपट्टिकाः मुखे चूतादिपल्लवाः तदुपरि पात्रं तत्रे दीपाव
लयः तत्सन्निधौ रंभाः कमुकाः केतवः लोप्लानि वेति २३ नरदेवः वर्त्मना राजमार्गेण तां पुरीं संप्रविवेश विनिविदितीयांतं २४ सोऽस्य समेवा
हृदयेन कान्त्रिद्विजे विपर्यकृत्विपरीत धनानि वस्त्राणि भूषणानि च यासां ताः युगलेषु कुंडलं कंकणादिषु एकैकं विस्मृत्य समीपुः कन

१ वलिभिः

॥ स्वापूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदीपा[illegible] सपल्लवैः सरंभकामकैः सकेतुभिः स्वलंकृतद्वारगृहां सप
ट्टिकैः २३ तां संप्रविष्टौ वसुदेवनंदनौ वृतौ च यस्यैर्नरदेववर्त्मना दृष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवा
रुरुहुर्नृपोत्सुकाः २४ काश्चिद्विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः कृतैकपत्रश्रवणैक
नूपुरा नांक्त्वा द्वितीयं त्वपराः स्वलोचनं २५ अश्नंत्य एका अपहाय सोत्सवा अभ्यज्यमाना अकृतोपमज्ज
नाः स्वपंत्य उत्थाय निशम्य निःस्वनं प्रपाययंत्योऽर्भमपोह्य मातरः २६ मनांसि तासामरविंदलोचनः प्रग
ल्भलीलाहसितावलोकनैः जहार मत्तद्विरदेंद्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवं २७ श्रीलक्ष्मापन्नः

निपाययंत्योऽर्भमपोह्य मातरः

एकमेव पत्रं यस्योत्तंसे श्रवणे यासां एकमेव नूपुरं चरणे यासां ताः अंक्त्वा ताः एकस्मिन्नेव लोचने कज्जलं विधायैव
२५ तत्र भोजनं हित्वा अभ्यज्यमानाः सतैलाः क्रियमाणा यातैलाभ्यंगाः अकृतस्नानाः अपोह्य निरस्य २६ प्रगल्भा या लीला ता
भिर्हसितानि ईषद्धासानि अवलोकनानि च तैः श्रियं समेयतीति श्रीरमणः तेनात्मना वपुषा तासां दृशो उत्सवं ददन्मनांसि जहार २७ स्वाराम

धात्रेयप

वां·वे·२ ०

श्री·द·पू·
१२३

स्वन्वयवर्द्धनीं वंशो रुक्मिमत्यीमित्यर्थः अप्रार्थितं श्रीप्रमन्तिकं च दत्त्वा ततो निर्जगामेति ॥ स्वे रंचरस्य धुपरे रजकं निरुत्संव्द
स्वः प्रहाय वरान थवा यवा माल्यालंकृतं समगुकं प्यक्कारा कुब्जामध्वनी धनुमससहसा नमयन्वेनेज ५२ इति श्रीमद्भागवते द
शमस्कंधे टीकायां एकचत्वारिंशः ॥ ४१ ॥ द्विचत्वारिंशे कुब्जोन्नमनं धनुषो जिरा च धन्त इति लग्नकं सारिशं गोस्नवाहि वंगविलेपमन्व
इन्नाह यः गृहीतान्यंगविलेपान्नो नाजना नियया तौ वरप्रद हे अंगने हे वरोरु इति सोपहासं संबोध्य पप्रतिल का ए
तदनुलेपनं कस्य वा उरू इति निपातो नृविलेपयुक्तो वितर्के अथ स्मत्सेवा मध्यः फले तस्याह न चिरादिति २ ततसः ग्रीवाद्रः
कदयो वक्राः इति त्रिवक्रेति नाम यस्याः अनुलेपस्य साधनं क्रियायां कंसस्य च हस्यस्मि रूपं च अंगसौष्ठवं च पेश

इति तस्मै वरं दत्त्वा श्रियं चान्वयवर्द्धिनीं वलमायुर्यशः कीर्तिं निर्जगाम सहाग्रजः ५२ इति श्रीभागवते
महापुराणे दशमस्कंधे रजकवधो नाम एकचत्वारिंशोध्यायः ॥ ४१ ॥ श्रीशुक उवाच अथ व्रजन्राजपथे
न माधवः स्त्रियं गृहीतांगविलेपभाजनां विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन्रसप्रदः १ श्रीहल
का त्वं वरोर्वेतदुहानुलेपनं कस्यांगने वा कथयस्व साधु नः देह्यावयोरंगविलेपमुत्तमं श्रेयस्ततस्ते
न चिराद्भविष्यति २ सैरंध्र्युवाच दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि मद्भा
वितं भोजपतेरतिप्रियं विना युवां कोन्यतमस्तदर्हति ३ रूपपेशलमाधुर्यहसितालापवीक्षितैः
धर्षितात्मा ददौ सांद्रमुभयोरनुलेपनं ४ ततस्तावंगरागेण स्ववर्णेतरशोभिना संप्राप्तपरभागेन
शुशुभातेनुरंजितौ ५ श्रीरूपल
लेच सौकुमार्यं माधुर्यं च रसिकता हसितं च आलापाश्च वीक्षितं च तैर्धर्षितात्मा मोहितचित्ता सांद्रं घनं ४ स्ववर्णेतरशोभि
ना रामकृष्णयोर्वर्णाभ्यां इतरः पीतादिवर्णस्तेन शोभितं शीलं यस्य तेन संप्राप्तपरभागेन संप्राप्तः परोनामैरूपरितनो भा
गो येन सः संप्राप्तः परभागः शोभातिशयो येन तेनानुरंजितौ ५

निद्दरसो

दु:४

अंगरागपरिष

अनुलेप

श्रीरुद्र:
१२३

वायकः तन्तुवायविशेषः वेषमलंकारं चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैः ४० पर्वणि उत्सवे ४१ इह लोके परमां श्रियं च बलं च ऐश्वर्यं च स्मृतिं च इन्द्रियं तत्सारवं च प्रादात् ४२ ४५ क्षेमाय पालनाय भवाय उद्भवाय ४६ रजकवधेन वायकानुग्रहेण चानयोर्विषमदृष्टि

ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत् विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ४० नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः स्वलंकृतौ बालगजौ पर्वणीव सितेतरौ ४१ तस्य प्रसन्नो भगवान् प्रादात्सारूप्यमात्मनः श्रियं च परमां लोके बलैश्वर्यस्मृतीन्द्रियं ४२ ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ४३ तयोरासनमानीय पाद्यं चार्घ्यार्हणादिभिः पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ४४ प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वां ४५ भवन्तौ किल विश्वस्य जगतः कारणं परं अवतीर्णाविहांशेन क्षेमाय च भवाय च ४६ न हि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः समयोः सर्वभूतेषु भजन्तं भजतोरपि ४७ तावाज्ञापयतं भृत्यं किमहं करवाणि वां पुंसोत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ४८ इत्यभिप्रेत्य राजेन्द्र सुदामा प्रीतमानसः शस्तैः सुगन्धैः कुसुमैर्माला विरचिता ददौ ४९ ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहानुगौ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ५० सोपि वव्रेचलां भक्तिं तस्मिन्नेवाखिलात्मनि तद्भक्तेषु च सौहार्दं भूतेषु च दयां परां ५१

तया नाम स्तानाशंकनीयेत्याह नहि वामिति अत्र हेतुः समयोरिति अत्रापि हेतुद्वयं सुहृदोरिति जगदात्मनोरिति च

भा॰ द॰ पू॰
१२४

निमिषेणातिशीघ्रं मत्तकरी मत्तहस्ती १७ १९ गहयतां वधतामिति च इंतो जिघृक्षवः प्राचरन् चंचत २० न केवलं कृष्णो किंतु अग्रजस्य धनुर्भ
ङ्गकाले गृहीत्वा जघ्ने घ्नन्तु अग्रे इति २० पतत प्राप्तं गृतत्र्यमिति शाला मुखो देवपुनर्निःक्रम्य २१ तेजः प्रतापं वंशागलभ्य पं ध्वस्तां २२ शाकटे
कटाक्षमोचनस्थानं २३ मुकुंदस्य विगमे व्रजान्निर्गमनसमये पांस्वाशिषः प्राशासताम् उत्सवं प्रजानां जनीयं स्वयं धन्वं तत्र दृश्यो
करेणावामेन सलीलमुद्धृत्य तं सज्यं च कृत्वा निमिषेण पश्यतां नृणां विकृष्य मध्यतो यथेक्षुदण्डं मद
कर्युरुक्रमः १७ धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् १८
तद्रक्षिणः सानुचराः कुपिता आततायिनः गृहीतुकामा आवव्रुर्गृह्यतां वध्यतामिति १९ अथ तान् दुरभि
प्रायान् विलोक्य बलकेशवौ क्रुद्धौ धन्वन आदाय शकले तांश्च जघ्नतुः २० बलं च कंसप्रहितं हत्वा
शालामुखात्ततः निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसंपदः २१ तयोस्तदद्भुतं वीर्यं निशाम्य पुरवासिनः ते
जः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ २२ तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान् कृष्णरामौ वृतौ
गोपैः पुराच्छकटमीयतुः २३ गोप्यो मुकुन्दविगमे विरहातुरा या आशासताशिष ऋता मधुपुर्यभू
वन् संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान् नु भजतश्चकमेऽयनं श्रीः २४ अवनिक्ताङ्घ्रियु
गलौ भुक्त्वा क्षीरोपसेचनं ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितं २५ श्रीगोपालजी शाहय:
न विद्यते इति मथुरास्थितपद्धतिवत्यः ऋता सत्या बभूवुः पुरुषभूषणस्य श्रीकृष्णस्य गात्रस्य देहस्य लक्ष्मी इह शोभां क
र्ण्यं तस्य गात्रस्य न नुश्चहो इतरान् ब्रह्मादीन् हित्वा यदयनं आश्रयं श्रीः कामयामास यां गात्रलक्ष्मीमिति वा २४ अव
निक्ते क्षालिते अंघ्रियुगले ययोस्तौ हीतं मिश्रं भक्तं भुक्त्वा सुखं न्यवसतां २५

मथुरा:२ ६७०

श्रीहरिः
१२४

श्रीध्या २ ज २

सुदर्शनेनेन सुधः फलंदर्शयन्नु ६ नसस्याः प्रपदेषोत्थ्युदयं पर्यो द्याभापीड्य देवं गन्त्यो ऊत्तानेऽन्तनेपस्मिन्या संगेनेन विश्वे
मुखानां सोमांगेध न्यौ लमेरहं ऊन्नमयामास ७ नैवस्यतु समानं भागं यस्याः सा च हस्तौ श्रोणीयपयोधरौ च यस्याः सा मुकुरस्य
र्शनेनाहितिमुख्यं कारणं स्याधिं विकर्षणं मनः पीडाशमनं कं सवधेन साधितोर्थः सुहृदां प्रयोजनं येन सः प्रगल्भेन

प्रसन्नो भगवान् कुब्जां त्रिविक्रमो रुचिराननां कर्तुमनस्के दर्शयन् दर्शने फलं ६ पद्भ्यामाक्रम्य प्र
पदे द्व्यंगुलोत्तानपाणिना प्रगृह्य चिबुके ध्यात्मं मुदनीनमच्युतः ७ सा तदर्जुसमानांगी बृहच्छ्रोणि
पयोधरा मुकुन्दस्पर्शनात्सद्यो बभूव प्रमदोत्तमा ८ ततो रूपगुणौदार्यसंपन्ना प्राह केशवं उत्तरी
यांतमाकृष्य स्मयंती जातहृच्छया ९ एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे त्वयोन्मथितचि
त्तायाः प्रसीद पुरुषर्षभ १० एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः मुखं वीक्ष्यानुगानां च
प्रहसंस्तामुवाच ह ११ एष्यामि ते गृहं सुभ्रु पुंसामाधिविकर्षणं साधितार्थो गृहाणां नः पा
न्थानां त्वं परायणं १२ विसृज्य माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथे नानोपायनतांबूल स्र
ग्गंधैः साग्रजोर्चितः १३ तद्दर्शनस्मरक्षोभादात्मानं नाविदन् स्त्रियः विस्रस्तवासः कवर व
लया लेख्यमूर्तयः १४ ततः पौरान् पृच्छमानो धनुषः स्थानमच्युतः तस्मिन् प्रविष्टो ददृशे धनुरैंद्र
मिवाद्भुतं १५ पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे १६

गृहाणां पांथानां प्रवासिनां परमयनमाश्रयस्त्वं १२ मधुरया गिरा तां प्रस्थाप्य व्रजन् वणिक्पथे वाणिज
जिभिरर्चितः १३ लेख्याः चित्रन्यस्ता इव मूर्तयो यासां ताः १४ धनुर्मखरणस्थानं पृच्छन् प्रसह्य बलात् १५ १६ श्री
वंशमंजर्यां दशमस्कंधे पूर्वार्द्धे हनु: द्विचत्वारिंशोध्यायः ॥ ४२ ॥

२ रव स्वा
२ लौरं धूवा व ४
१२ ...३
१२ ...नलानवर
११ पकवाय
ज १
गतवान् नगलेवे बेला
गौसे: पारितलहर

॥ ना० द० टी० ॥
॥ १२५ ॥

३३ यथोपजोषं यथासुखं ३४ मल्लतालोत्तरेषु परि उत्तरैः सूपनेषु येषु तेषु तूर्येषु उपाध्यायाः मल्लाचार्याः ३६ उपस्थानं मल्लरंगं ३७ समाहूताः समाहूताः
निवेदितान्युपायनानि यैस्ते ३८ ॥ इति श्रीमद्० द्विचत्वारिंशः ॥ ४२ ॥ त्रिचत्वारिंशके हत्वा गजेंद्रं रामकेशवौ । रंगप्रवेशसौ नागं चाणूरेणाथ संगतं
१ द्रष्टुं एवं कृतं शौचं शौचं च त्वं निरपराधत्वं पापामांतो एतदुक्तं भवति धनुर्भंगादिनाम्नाचाभ्यां निर्जैश्च पौर्यैः सह चितेषि पितृतोन मुंचति श्वा वांच पुनर्जिघांसति

आनर्चुः पुरुषा रंगं तूर्यभेर्यश्च जघ्निरे मंचाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः ३३ तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः
यथोपजोषं विविशू राजानश्च कृतासनाः ३४ कंसः परिवृतोऽमात्यै राजमंच उपाविशत् मंडलेश्वरमध्यस्थो हृदयेन विदू-
यता ३५ वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च मल्लाः स्वलंकृता दृप्ताः सोपाध्यायाः समाविशन् ३६ चाणूरो मुष्टिकः कू-
टः शलस्तोशल एव च त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ३७ नंदगोपादयो गोपा भोजराजसमाहूताः निवेदितो-
पायनास्त एकस्मिन्मंच आविशन् ३८ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे धनुर्भंगो नाम द्विचत्वारिंशोऽध्यायः ॥
॥ ४२ ॥ श्रीशुक उवाच ॥ अथ कृष्णश्च रामश्च कृतशौचौ परंतप मल्लदुंदुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः १ रंगद्वारं
समासाद्य तस्मिन्नागमवस्थितं अपश्यत्कुवलयापीडं कृष्णोऽंबष्ठप्रचोदितं २ बध्वा परिकरं शौरिः समूह्य कुटिला-
लकान् उवाच हस्तिपं वाचा मेघनादगभीरया ३ अंबष्ठांबष्ठ मार्गं नौ देह्यपक्रम मा चिरं नो चेत्सकुंजरं त्वाद्य नयामि
यमसादनं ४ अ-

२ श्रीशुक उवाच

अंतः प्रतोली मंचाश्च तथा से परिकल्पिताः अन्येषु वा रमुख्यानां मन्ये तैश्चाततो पोषिता यमसादनं ४ श्री-
अक्रूर वसुदेवौ च तत्र प्राप्तेव्य वस्थितौ नगरी पाविता नव धोरे रक्षा पुत्र यद्भिनी असंत कालेपि त्रसाइ हामीति
स्वनपा २

अतोऽस्य मातुलस्यापि वधे नावयोर्दोष इति वक्तुं तापराध परिहारा इति मल्लानां दुंदुभीनां च निर्घोषं मल्लतालदुंदुभिनिर्घोषं वा १ अंबष्ठ
द्रोहस्तिपकेन चोदितं परिकरं युद्धोचितं परिधानं समूह्य समुह्य जिवद्ध्य ३ ४ । नि १

॥ श्रीभक्तः ॥
॥ १२५ ॥

च रं कैवलं गोविंदरामयोर्विक्रीडितं ततः ननुपराक्रमं कंसश्चित २६ उत्पथास्त्व प्रजागरितानेकेन प्रत्येकं मस्तोर्हत्पकराणि
च नत्यादमंत्रः रुधाङ्गुल्येकृ स्वापपन्नन् हिरण्यागोत्रस्थोमुखः रत्नसांद्रतम्प्रागनइति तथापदेनद्रुतामग्नवाविरूपदैवीवा
चंवदतीमात्रित्रि २७ तानि दर्शयति श्लोकत्रयेण जलादौ प्रतिरूपे दृश्यमाने यत्स्वशिरसस्तत्रादर्शनं प्रसन्नपिद्वितीये
चतुर्थो तथा निखिंगत्वात्सर्वे ज्योतिषां चंद्रादीनां द्वित्वं २८ छायायां प्रतिबिंबे छिद्रप्रतीतिं यद्दिहितकरणं पुष्टस्य योनतः स्व
यमारणो ध्वनिः स प्राणघोषः तत्सर्वाङ्गवर्णं दत्तेषु स्वर्णप्रतीतिः रजः कर्दमादिषु स्वप्ने नाम दर्शनं एता निजागरि

कंसस्तु धनुषो भंगं रक्षिणां च बलस्य च वधं निशम्य गोविंदरामविक्रीडितं पदं २९ दीर्घप्रजागरो
नीतो दुर्निमित्तानि दुर्मतिः चहून्य च दृष्टेन यथा मस्तो हि स्वकराणि च ३० स्वदर्शनं स्वशिरसः प्रतिरूपे
च सत्यपि असत्यपि द्वितीये च द्वे रूपे ज्योतिषां तथा ३१ छिद्रप्रतीतिः छायायां प्राणघोषानुपश्रुतिः स्व
र्णप्रतीतिर्वृक्षेषु स्वपदानाम दर्शनं ३२ स्वप्ने प्रेतपरिष्वंगः खरयानं विषादनं यायान्नलदमाल्येकस्ते
लाभ्यक्तो दिगंबरः ३३ अन्यानि चैवंभूतानि स्वप्नजागरितानि च पश्यन्मरणसंत्रस्तो निद्रां लेभे न चिं
तया ३४ व्युष्टायां निशि कौरव्य सूर्ये चाद्भ्यः समुत्थिते कारयामास वै मंचं सो मल्लक्रीडामहोत्सवं ३५
तानि दुर्निमित्तानि २८ स्वप्ने नाह स्वप्न इति प्रेतैर्मृतैः परिष्वंगः खरमोष्ट्रयानं विषभक्षणं नलदमाला जपाकुसु
ममालायाः यद्वा इति यत्र तस्यैकं दुर्निमित्तमिति ३० कष्टेन कथंचित्प्राप्ता पापुनः सूर्यं चाद्भ्यः समुत्थिते अतियथा चश्रुतिः श्रद्धो वा इति
यप ३२ गान्महतोर्णवाद्विराजमानः सलिलस्य मध्यात् येन समारुरोह लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु इति च ३२ श्रीसूक्तं

दूप:२ भा॰ती॰२ ति२

कृ॰टी॰५

१४ रंगं समाविशत् तदा वीरश्रिया बभौ कथंभूतः अंसे न्यस्तं विषाणं गजदंतो येन सः असृङ्मदो रक्तं मदश्च तयोर्बिंदुभिः परितोंकितः विरूढाउ
द्गताः स्वेदकणिका यस्मिन् तादृशं वदनांबुरुहं यस्य सः १५ न केवलं स एकः समाविशत् किंतु गोपैरिति १६ तत्र रंगस्थानां सर्वरसानां स्वमू
र्तिं निगदन्नस्वनानारसिनां प्रथानुसारेण बभौ न साकल्येन सर्वेषामित्याह मल्लानामिति मल्लानां दृढः अशनिर्वज्रमिव दशधा विदितः सन् सा
ग्रजो रंगं गतः इत्यन्वयः मल्लादिषु सिद्ध्यन्तः क्रमेण श्लोकेन निबध्यते रौद्रोऽद्भुतः शृंगारो हास्यं वीरो दयां तथा भयानकश्च बीभत्सः

पातितं तस्य पदाक्रम्य मृगेंद्र इव लीलया दंतमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः १४ मृतकं द्विपमुत्सृज्य दंतपाणिः
समाविशत् अंसेन्यस्तविषाणोऽसृङ्मदबिंदुभिरंकितः विरूढस्वेदकणिकावदनांबुरुहो बभौ १५ वृतौ गोपैः
कतिपयैर्बलदेवजनार्दनौ रंगं विविशतू राजन् गजदंतवरायुधौ १६ मल्लानामशनिर्नृणां नरवरः स्त्रीणां
स्मरो मूर्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं
योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः १७ हतं कुवलयापीडं दृष्ट्वा ताविति दुर्जयौ कंसो मनस्व्यपि त
दा भृशमुद्विविजे नृप १८ तौ रेजतू रंगगतौ महाभुजौ विचित्रवेषाभरणस्रगंबरौ यथा नटावुत्तमवेष
धारिणौ मनः क्षिपंतौ प्रभया निरीक्षतां १९ निरीक्ष्य तावुत्तमपूरुषौ जना मंचस्थिता नागरराष्ट्रका नृप प्र
हर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननं २०

शांतः सप्रेम नकिकः स्वविदुषां विराट् दुर्विकल्पः पर्यन्तो रजन्ते इति तथा स्वनेन बीभत्स उक्तः विकलत्वं च वज्रसारसर्वांगाविग्रा
दिनावदत्वात् १७ उद्विजे भीतो बभूव १८ यथा नटौ विनीनिर्नयतं दर्शितं १९ प्रहर्षवेगेन उत्कलितानि उज्जृंभितानि ईक्षणान्याननानि
च येषां ते तयोराननं पपुरिव पपुः निराकांक्षा न बभूवुरित्यर्थः २० श्री गोपालजी सहायः श्रीरामो रदायनमः श्रीकृष्णः

वृंतकोमलः कालेनाद्रिमितं तपमलन्तिपंतातैस्पमापतंत ५ विगलितो विच्युतः मुष्टिना निहत्य लीयतस्य दृप्तो वन्यवरीस्त्र वरौ ह्लाणः श्र
पश्चपतन् घ्राणमवघ्राणतेन दृष्टिदर्शनं यस्य सः लोचना गोचरमेयि पशवो हि घ्राणेन जानंतीति प्रसिद्धं परामृशन् धृतवान् पुष्करे
ण शुंडाग्रेण सन्नद्धः प्रसह्य बलेन ७ धनुषां धनुषां पंचविंशतिर्यावत् तावंतं देशं गजं विचकर्ष स्वारुष्य गृहीतवान् कंसवधिे
कर्षयथा नागं सर्पं चकृर्तमानं गजं सुपर्णइव स्वयमिति श्राविरासीत यथा प्राप्यांहिष्ये रुंद्रुविपुष्कलइति यावत् ८ सपर्या
वर्तमानेन इति पृच्छ ग्राहि एवं रुषं गरहीतुं पाहि इति गतः परिवर्तते गजमहिंसयत्ता भ्रामयति यदसौ व्यनः परिवर्तते नह

एवं निर्भर्त्सितो वधः कुपितः कोपितं गजं चोदयामास हस्तायकालांतकरूपमोपमं ५ करी हस्तमभिद्रुत्य करेण
तरसा गृहीत् करतो विगलितः सोमुं निहत्यांघ्रिषु लीयत ६ संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवं परामृ
शत् पुष्करेण सप्रसह्य विनिर्गतः ७ पुच्छे प्रगृह्यातिबलं धनुषः पंचविंशतिं विचकर्ष यथा नागं सुपर्ण इव ली
लया ८ सपर्यावर्तमानेन सव्य इति गतो च्युतः बभ्राम्यमाणेन गोवत्सेनेव बालकः ९ ततोभिमुखमभ्येत्य
पाणिनाहत्य वारणं प्राद्रवत् पातयामास स्पृश्यमानः पदे पदे १० सधावन् क्रीडया भूमौ पतित्वा सहसोत्थि
तः तं मत्वा पतितं क्रुद्धो दंताभ्यां सोहनत् क्षितिं ११ स्वविक्रमे प्रतिहते कुंजरेंद्रो तिमर्षितः चोद्यमानो म
हामात्रैः कृष्णमभ्यद्रवद्रुषा १२ तमापतंतमासाद्य भगवान्मधुसूदनः निगृह्य पाणिना हस्तं पातयामास
भूतले १३

हिणतो भ्रामयंस्तेन सहवभ्राम वगोत्सेनभ्राम्यमाणेन वालकः सस्वकृत्स्नोय यास्त्रम्भो वालकइवेति ९ वारणं गजं प्राद्रवत्
प्रकर्षेण सर्वतो धावन् पातयामास यथा पतति तथा तं च पदस्पृश्यन्नित्यर्थः १० तं सधावन्निति स्वहं नन्न स्वहन्

चाणूर उवाच १ ... १ ...

३५ हे रूस प्रियं करवामे ति राज्ञि प्रीते भूतानि च प्रसीदेयुः ३५ ३७ यथोचितं नियुद्धं बाहुयुद्धं भवेन् मल्लसभासदः मल्लसभामध्ये धिक्कृतान्न स्पृ
धर्मो मल्लसभकेतु न स्पृशेदिसमर्थः हे मल्लेति वा ३८ सहस्रद्विपानां सत्वं बलं बिभर्तीति ३९ न पावलिभिर्मल्लैः सह युद्धं न ययोर्धर्मः विक्रम पराक्रमं

हे नंदसूनो हे राम भवंतौ वीरसंमतौ नियुद्धकुशलौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा ३२ प्रियं राज्ञः प्रकुर्वत्यः श्रेयो विंदंति वै प्रजाः मनसा कर्मणा वाचा विपरीतमतोन्यथा ३३ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटं वनेषु मल्लयुद्धेन क्रीडंतिश्चारयंति गाः ३४ तस्माद्राज्ञः प्रियं यूयं वयं च करवामहे भूतानि नः प्रसीदंति सर्वभूतमयो नृपः ३५ तन्निशम्याब्रवीत्कृष्णो देशकालोचितं वचः नियुद्धमात्मनोभीष्टं मन्यमानोभिनंद्य च ३६ प्रजा भोजपते रस्य वयं चापि वनेचराः करवाम प्रियं नित्यं तन्नः परमनुग्रहः ३७ बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितं भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभासदः ३८ ॥ चाणूर उवाच ॥ न बालो न किशोरस्त्वं बलश्च बलिनां वरः लीलयेभो हतो येन सहस्रद्विपसत्वभृत् ३९ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोत्र वै मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ४० ॥ इति श्री भागवते महापुराणे दशमस्कंधे कुवलयापीडवधो नाम त्रिचत्वारिंशोध्यायः ॥ ४३ ॥ श्रीशुक उवाच ॥ एवं चर्चितसंकल्पो भगवान्मधुसूदनः आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः १ हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया २

कृतमुष्टिविक्रमता इति ४० ॥ इति त्रिचत्वारिंशः ॥ ४३ ॥ चाणूरमुष्टिकादिहिंसा केशिमल्लकंसादिमर्दनं कंसयोषित्स्वामाश्वासस्ताभ्यां पित्रोः स्वदर्शनं १ चर्चितः निश्चितः एवं संकल्पो यस्य सः १ २

नदेवाह पिबंत इवेति श्लिष्यंतः परिष्वंगं कुर्वंत इव लक्षिता इत्यर्थः २१ यथा दृष्टं धनुर्भंगादि यथा श्रुतं गोवर्धनोद्धरणादि तत्र इनक्रम
तदनुरूपमित्यर्थः प्रसन्नं च नयोः रूपं गजदंतादियुक्तं गुणाः शौर्यादयः माधुर्यं हसितालापादि प्रागल्भ्यं धार्ष्ट्यं तैः स्मारिता इव स्मरणं
प्रापिता इव २२ २३ विस्मितानां वाक्यान्याह एष इति एतावित्यादिभिः २४ किलेति सर्वत्रान्वयः २५ गुह्यकः शंखचूडः अन्ये च प्रघासुरादयः २५ २६

प्रति १

पिबंत इव चलन्मौलि लिहंत इव जिह्वया जिघ्रंत इव नासाभ्यां श्लिष्यंत इव बाहुभिः २१ ऊचुः परस्परं ते वै यथा
दृष्टं यथाश्रुतं तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव २२ एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि
अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि २३ एष वै किल देवक्यां जातो नीतश्च गोकुले कालमेतं वसन्
गूढो ववृधे नंदवेश्मनि २४ पूतनानेन नीतांतं चक्रवातश्च दानवः अर्जुनौ धेनुकः केशी गुह्यको ये च तत्
द्विधाः २५ गावः सपाला एतेन दावाग्नेः परिमोचिताः कालियो दमितः सर्प इन्द्रश्च विमदः कृतः २६ सप्ताह
मेकहस्तेन धृतोऽद्रिप्रवरोऽमुना वर्षवाताशनिभ्यश्च परित्रातं च गोकुलं २७ गोप्योऽस्य नित्यमुदितह
सितप्रेक्षणं मुखं पश्यंत्यो विविधांस्तापांस्तरंति स्माश्रमं मुदा २८ वदंत्यनेन वंशोऽयं यदोः सुबहुविश्रुतः
श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः २९ अयं चास्याग्रजः श्रीमान्रामः कमललोचनः प्रलंबो निह
तो येन वत्सको ये बकादयः ३० जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च कृष्णरामौ समासाद्य चाणूरो वाक्य
मब्रवीत् ३१ श्लोकाः

श्लो ७०

लर

कृ ८१

स्वाश्रमं इव तत् ... श्रममयुक्तं स्वं ... श्रमं सुखमिति वा यद्वा श्रमं यथा भवति तथा तरंति स्म २८ अनेन परिरक्षितो यदोर्वंशः सु
बहुविश्रुतः सन् श्रियादिकं लप्स्यतीति वदंतीति इति २९ धेनुकबकचवत्सासुरेषु विपर्ययोक्तिर्जनवाक्यविस्मयात् ३० जनेष्वेवं
ब्रुवाणेषु तत्सुतरां सहमानः चाणूरो ब्रवीदिति ३१

रा-गो॰ २ वनेति २ गु ३

पा॰ १० पू॰
१२९

[illegible]ज्ञानतः शत्रुमानितत्र इति सर्वतो धावतः तस्य स्य अस्मवारितं उ म्बापूर्वरसनां भुजं दरपतां ११ ॥ किं न पश्यति सामर्थ्यं को धुरं सेनसं
रंभः स्युः वे राः तेन तोमितं ११ ॥ पुण्या इति नृलिंगेन मनुष्यदेहेन गूढः वनस्थानि चित्राणि माल्यानि यस्य सः गिरित्रः शिवः र
मा च ताभ्यामर्चितौ अंघ्री यस्य सः अयं भावः येषि मांसं अयं यस्मान पंचपरात्मरूपतेनाः तं व्रजभुवो धन्याः यतो यान् अयं पंकजाः विविध क्रीडया अंच
तिगच्छतीति १२ अहो कथं अस्य पुण्याचयं यतो स्मात् चिरेन वसतेः एषोयं गोप्यस्तु वंद्र पुण्यार्द्र इति सामूहु चित्रं गोप्य इति अस्य श्लोकस्य

यद्ज्ञानतः शत्रुमानितः तत् स्ववरनां भुजं वीक्ष्य तां मवार्युत्तं पश्य कोशभित्तं भुजितः १४ किं च पश्यत राम स्य मुखमाता
न्न लोचनं मुष्टिकं प्रति सामर्थहास संरंभ शोभितं १२ पुण्या बत व्रजभुवो यदयं नृलिंगगूढः पुराणपुरुषो वनचित्र
माल्यः गाः पालयन्सहबलः क्वणयंश्च वेणुं विक्रीडयांचति गिरित्ररमार्चितांघ्रिः १२ गोप्यस्तपः किमचरन्यदमुष्य
रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धं दृग्भिः पिबंत्यनुसवाभिनवं दुरापमेकांतधाम यशसः श्रिय ऐश्वरस्य १४
या दोहनेवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ गायंति चैनमनुरक्तधियोश्रुकंठ्यो धन्या व्र

ने २ ने ३ न्य ३

जस्त्रिय उरुक्रमचित्तयानाः १५ व

रूपं अंगलावण्येन सारं श्रेष्ठं किंच असमोर्ध्वं न विद्यते समऊर्ध्वं अधिकं च यस्य तत् न तु अन्यसिद्धं नाम्नेन आभरणादिना सिद्धं किं तु स्वतः ए
व सिद्धं ऐश्वर्यस्य एकांतधाम अव्यभिचारि स्थानं पाठांतरे अनुसवं प्रतिक्षणं अभिनवं एवं भूतं नित्यनवीनं रूपं याः नेत्रैः पश्यंतीति
१४ किं च याः दोहनादिक्षेनं गायंति ता व्रजस्त्रियो धन्याः प्रेंखं खनं दोलां दोलानां उक्षणं सेचनं कंठे एषान्ता उरुक्रमे चित्तं उरुक्रमवि
त्तं तेनैव यानां विषयप्राप्तिर्यासां ताः पाठांतरे उरुक्रमं चित्तं यंति यत्र इत्यर्थः कुतः अनुरक्तधियः तत्र लिंगं अश्रुकंठ्यः १५ श्रीकृष्ण

श्री

श्री कृष्ण
१२९

बाहुमूलात्कक्षाशिरं(?)लिबपातिरेकेणाकर्तनं मस्तिर्हस्तोऽरत्निः ३ परिभ्रामणं हस्ताद्विगुणीत्वा परिनस्फालनं विक्षेपो नोर्ध्वपरिं
... बाहुभ्यां निःपीडनं भूपातनं नम्रधःक्षेपः ३ उत्सर्पणं ३ उत्सर्पणतो गमनं अपसर्पणं पश्चाद्गमनं स्तैः प्रत्यर्थं तं प्र
त्यावर्तनं तौ ४ उत्थापनं पादेर्जानुनीचपिंडीरूपपतितस्योच्चाटनं ३ उन्नयनं हस्ताभ्यां पृष्ठदेशे पसर्पणं चालनं कंठादि
नामनस्य निःसारणं स्थापनं पाद्यादिपिंडीकरणं ९ वं परस्परमात्मनो देहस्या पचकृतनुःप्रयुक्तांश्च तवंतौ ५ नयुद्धं
बलाबलवत् एकतो बलं अन्यतोऽबलं नयुद्धं विषमम् इत्युक्तं चरित्यर्थः ६ नरैरेवहर्षायति महानिति यद्धा नद्धलाबल

परस्परं तौ हस्तपरान्तिमांसजानुभ्यां चैव जानुनी शिरः शीर्षेणोरसोरस्ताश्च न्योन्यमभिजघ्नतुः ३ परिभ्रामणा
विक्षेपपरिरंभोन्नपातनैः उत्सर्पणापसर्पणैरस्थानस्थानसंप्रसारूधतौ ४ उत्थापनैर्ध्यपनैरस्फालनैः स्था
पनैरपि परस्परं जिगीषंतावपचक्रतुरात्मनः ५ तद्धलाबलवधं सुसमेताः सर्वयोधिताः जनुः परस्परं
राजन्स्वानुकंपावत्त्रणशः ६ महानयं वृत्ताधर्म एषां राजसमाससहर्षये बलाबलवधं हे राज्ञोन्विष्टंति पस्प
तः ७ कवज्रसारसर्वांगो महाद्वशोलेद्रसन्निभौ कृचातिसु कुमारांगौ किशोरौ नाप्रयौवनौ ८ धर्मव्यतिक्र
मोऽयस्य समाजस्य ध्रुवं भवेत् यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ९ न सभां प्रविशेत्प्राज्ञः स
भ्यदोषाननुस्मरन् अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते १०

वतोर्युद्धं दृष्ट्वा महानयं धर्म इत्यूचुरित्यन्वयः बालयोर्बलवतोश्च युद्धं राजावेक्षतीत्ययं वाणी यः एनेतु राज्ञः पश्यतः स्वय
मप्यन्विष्टं तिष्ठतु मन्यंत इति महान धर्म इत्यर्थः ७ बलाबलवधं धृष्टतां प्रपंचयति पंचभिः कोतिवज्रसारेणावज्रवत्कठिना
नि सर्वांगानि यस्योर्नौ ८ समाजस्य सभायाः ९ अपराजनुः न सभामिति अब्रुवन् ज्ञात्वापि तूष्णीं तिष्ठन् विब्रुवन् विपरी

षर्हितः पीडितः उर्गुयस्येम तले २५ २८ वल्गंतौ नृत्यादिं कुर्वतो २९ साधुसाध्विति वदितः ३० ३३ अव्ययः अश्रमः लघिम्ना लाघवेन ३४ दुर्विषहः दुर्वि

प्रवेपितः सरुधिरमुद्वमन्मुखतोर्दितः व्यसुः पपातोर्व्युपस्थे वाताहत इवांघ्रिपः २५ तत कूटमनुप्राप्तं रामः प्रहरतां
वरः स्ववधील्लीलया राजन्सा च तं वाममुष्टिना २६ तर्ह्येव हि शलः कृष्णपदाप्रहतशीर्षकः द्विधाविशीर्णस्तोशल
क उभावपि निपेततुः २७ चाणूरे मुष्टिके कूटे शले तोशलके हते शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः गोपान्व
यस्यानाकृष्य तैः संसृज्य वि[illegible]जह्रतुः वाद्यमानेषु तूर्येषु वल्गंतौ रुतनूपुरौ २९ जनाः प्रजहृषुः सर्वे कर्मणा रामकृ
ष्णयोः ऋते कंसं विप्रमुख्याः साधवः साधुसाध्विति ३० हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् न्यवारयत्स्वतूर्या
णि वाक्यं चेदमुवाच ह ३१ निःसारयत दुर्[illegible]त्तौ वसुदेवात्मजौ पुरात् धनं हरत गोपानां नंदं बध्नीत दुर्मतिं ३२ वसु
देवस्तु दुर्मेधा हन्यतामाश्वसत्तमः उग्रसेनः पिता चापि सानुगः परपक्षगः ३३ एवं विकत्थमाने वै कंसे प्रकुपितो
ऽव्ययः लघिम्नोत्पत्य तरसा मंचमुत्तुंगमारुहत् ३४ तमाविशंतमालोक्य मृत्युमात्मन आसनात् मनस्वी स
हसोत्थाय जगृहे सोसिचर्मणी ३५ तं खड्गपाणिं विचरंतमाशु श्येनं यथा दक्षिणसव्यमंबरे समग्रहीद्
दुर्विषहोग्रतेजा [illegible] यथोरगं तार्क्ष्यसुतः प्रसह्य ३६ प्रगृह्य केशेषु चलत्किरीटं निपात्य रंगोपरि तुंगमं
चात् तस्योपरिष्टात्स्वयमब्जनाभः पपात विश्वाश्रय आत्मतंत्रः ३७

षहमुग्रं तेजो यस्य स्त्रीरसः ३६ गरिष्टत्वाद्विश्वाश्रयत्वमुक्तं तत्र हेतुः अब्जनाभः कृतत्वस्योपर्येव पपात यतः आत्मतंत्रः ३७ स्त्री

भा० १०.पू०
१२९

पा० ४

३१ कंसः

३३ मुक्त...

श्रीरसः
१२९

स: २

श्री २ स्क १

प्रातर्व्रजाद्यास्त्वबलाः ॥ अस्य वेणुं निशम्य गृहात्तूर्णं निर्गम्य पथि तं स्मितं मुखं पश्यन्ति ताः भूरिपुण्या इति ॥ एवं सभयं ब्रुवाणासु स्त्रीषु तासां
भयनिवृत्त्यर्थं स शत्रुं हन्तुं मनश्चक्रे ॥१७॥ सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक्तया आतुरौ विकलौ पुत्रयोर्बलमजानन्तौ पि
तरावन्वतप्येतां पश्चात्तापं प्रापतुः ॥१८॥१९॥ भगवतो गात्राणां प्रत्यङ्गजानां निपातैः प्रहारैः वज्रस्येव निष्पेषः तीव्रः प्रहारः तद्वन्निष्ठुरैर्भज्यमा

॥ श्रीशुक उवाच ॥

प्रातर्व्रजाद्व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वेणुं ॥ निर्गत्य तूर्णमबलाः पथि भूरि
पुण्याः पश्यन्ति सस्मितमुखं सदयावलोकं ॥१६॥ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः ॥ शत्रुं हन्तुं मनश्च
क्रे भगवान्भरतर्षभ ॥१७॥ सभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहशुचातुरौ ॥ पितरावन्वतप्येतां पुत्रयोरबुधौ ब
लं ॥१८॥ तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ ॥ युयुधाते यथान्योन्यं तथैव बलमुष्टिकौ ॥१९॥ भगवद्गा
त्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह ॥२०॥ स श्येनवेग उत्पत्य मुष्टीकृ
त्य करावुभौ ॥ भगवन्तं वासुदेवं क्रुद्धो वक्षस्यबाधत ॥२१॥ नाचलत्तत्प्रहारेण मालाहत इव द्विपः ॥ बाह्वोर्नि
गृह्य चाणूरं बहुशो भ्रामयन्हरिः ॥२२॥ भूपृष्ठे पोथयामास तरसा क्षीणजीवितं ॥ विस्रस्ताकल्पकेशस्र
गिन्द्रध्वज इवापतत् ॥२३॥ तथैव मुष्टिकः पूर्वं स्वमुष्ट्याभिहतेन वै ॥ बलभद्रेण बलिना तलेनाभिहतो भृशं
॥२४॥

नो गात्रं यस्य ॥२०॥ श्येनस्येव वेगो यस्य स चाणूरः ॥ अबाधत अताडयत् ॥२१॥२२॥ भूपृष्ठे भुव उपरि ॥ पोथयामास आस्फालयत् ॥ इन्द्रध्व
जो वज्रं यस्य इन्द्रध्वजो नाम गौडेषु प्रसिद्धः ॥ कश्चिन्महोत्सवे महान्स्तम्भो ध्वजपताकादियुक्तः ॥ पुरुषार्थसिद्धये पतनेऽस यथा पतति ॥
॥२३॥२४॥

पा १ दृ १ वि २

रघ १ लघ्व: ८ ग्राम्भी २ चौ २ ऋष्म ८

४८ स्मारस्य शर्ईर्वत्स्यष्ट ॥ ५० उत्राप्तौ जितिं विहाय जग दीश्वरौ विलिसिंतां किंतो न सत्त्वजाते नालिंगितवंतौ किंतु बद्धांजली तस्थतुरित्यर्थः पुत्रस्यह
ताहलीकेम स्नेहान्मल्ल लीलया वीभत्सव रितिं कंसंवीमत्सम माप्येत् ५१ ॥ इतिरूपेण वसुदेवपरीवर्ण ॥ ५५ ॥ पंच च नातिंशकेषपि
नंनंदा दिसांत्वनं उग्रसेनाभिषेक मंगरी वाला सुरागम: १ उपलब्धार्थो विदितत्वेति ग्रयमर्थः उपसमीपे श्रावृयो: छत्र पुत्रास्तासांतिक परमसुतत्व
जोगमत्वं मेवलब्धार्थो लब्धमावामीश्वरौ इतिशब्द: परमेत्रानेन रूपो योर्या स्मातया नलौकिकास्ता मयि प्रसन्नौ सतन नयोसीनंनाम किं दुर्लभं स्यात् दुर्लभं

न ऽऽ

॥ ॥ राजयो विनम्रा मात्स न गवाल्लो कनाचन: पार्श्वमाहूतौ किंकीसंस्थाह् तानोसमकारयत् ४८ मा
॥ नरं पितरं चैव मोचयित्वाथ बंधनात् कंसरामौ ववंदाते शिरसा स्पृश्य पादयो: ५० देवकी वसुदेवश्च विज्ञाय जग
॥ दीश्वरौ कृतसंवंदनौ पुत्रौ सस्वजाते न शंकितो ५१ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे वसुदेव मोचनं
॥ ५५ ॥ ॥ श्रीशुक उवाच ॥ पितरा वुपलब्धार्थौ विदित्वा पुरुषोत्तम: मा भूदिति निजां मायां
॥ ततान जनमोहिनीं १ उवाच पितरावेत्य सात्वतर्षभ: प्रश्रयावनत: प्रीणन्नंबताते तिसादरं २
॥ नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि बाल्यपौगंडकैशोरा: पुत्राभ्याम भवन् क्वचित् ३ न लब्धो दैवह
॥ तयोर्वासो नौ भवदंतिके यां बाला: पितृगेहस्था विंदंते लालिता मुदं ४

प

नुमपि पुत्र नया प्रेमश्च न इदानीमेवं तत्त्वानं मायमिति निजां स्वाधीनां मायां तयो: प्रसारितवानिति १ तदेव दर्शयति उवाचेत्यादि स्व
ति: प्रीणन् प्रीणयन् सादरं ब्रुवन् २ अस्मत्त: अस्मत्तिमित्तं नित्यमुत्कंठितयोरपि युवयो: पुत्राभ्यामावाभ्यां कर्तृभ्यां बाल्यपौगंडकै
शोरा: तत्सुखस्यास्तत्र नवसुत्वानीत्यर्थ: तेना नवन्निति अस्मत्त: पुत्राभ्यामिति सामान्याधिकरण्यं वा ३ किंच आवामेव दैवहीन
ताविसाह पितृगेहस्था बाला यां मुदं विंदंते सो विन लब्धेति ४ श्रीगोपालजी शरणं: श्रीदामोदराय नम: श्रीकृष्ण: ॥

॥ गा० ६० सू० ॥ १३० ॥ धै २ नौ ८ ॥ श्रीशुक उवाच ॥ उ० उक्षा १ श्रीशुक: ॥ १३० ॥

नलध्वर्दी १

३९ निर्वैरो नितिः कृतिभ्रान्तं एवमिमपि तत्कारिणः संततोऽभ्यधावन् ४० तथा ता दृष्ट्वा अतिरभसो वेगो येषां तान् संयत्तान् उद्यतान् ४१ ४
शोभंते विलापान्सकरुणमाह च ४४ भूर्णि ४४ धर्मज्ञ नारीणि विलापे प्रेमसंबोधनानि ४५ ४६ अनागसामित्यादि परमार्थाभिधानं तेन दशा

तं संपरेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः हाहेति शब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरें
द्र ३८ स नित्यदोद्विग्नधिया तमीश्वरं पिबन्वदन्वा विचरन्स्वपञ्छ्वसन् ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं
दुरवापमाप ३९ तस्यानुजा भ्रातरो नव कंकन्यग्रोधकादयः अभ्यधावन्नतिक्रुद्धा भ्रातुर्निर्वेशकारिणः
४० तथातिरभसांस्तांस्तु संयत्तान्रोहिणीसुतः अहन्परिघमुद्यम्य पशूनिव मृगाधिपः ४१ नेदुर्दुंदुभ
यो व्योम्नि ब्रह्मेशाद्या विभूतयः पुष्पैः किरंतस्तं प्रीताः शशंसुर्ननृतुः स्त्रियः ४२ तेषां स्त्रियो मह
राज सुहृन्मरणदुःखिताः तत्राभीयुर्विनिघ्नंत्यः शीर्षाण्यश्रुविलोचनाः ४३ शयानान्वीरशय्यायां
पतीनालिंग्य शोचतीः विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ४४ हा नाथ प्रिय धर्मज्ञ करुणा
नाथवत्सल त्वया हतेन निहता वयं ते सगृहप्रजाः ४५ त्वया विरहिता पत्या पुरीयं पुरुषर्षभ न
शोभते वयमिव निवृत्तोत्सवमंगला ४६ अनागसां त्वं भूतानां कृतवान्द्रोहमुल्बणं तेनेमां नो दशां
नीतोऽभूतध्रुक्को लभेत शं ४७ सर्वेषामिह भूतानामेष हि प्रभवोऽप्ययः गोप्ता च तदवध्यायी न क्वचि
त्सुखमेधते ४८ श्रीशुकउ:

यावयं त्वया पत्या विरहिता पुरीयं न शोभते इति त्वदद्ध्यासानिध्यानं ४७ १ षष्ठस्य प्रभवं ... इति प्रभवः ... यथियंति अस्मिन्
इति अप्ययः सचसच तदैवध्यानं तदवध्यातेन कं तुं शीलं यस्य सः ४८

॥ला०टी०पू०॥
॥१३१॥

स्वान् ज्ञातीन् संबंधांश्च दिग्भ्य आनाय्येति १५ १६ सिद्धाः पूर्णाः कृष्णरामाभ्यां गतो निरस्तो ज्वरस्तापो येषां ते १७ सदयस्मितं
वीक्षणं यस्मिंस्तत् १८ प्रवयसोऽपि वृद्धा अपि अक्षिभिरेव पिबन्तो बलमोजश्च येषां ते १९ २० आत्मन आत्मनोऽप्यधिकेन पोषितौ नचास्म

॥सर्वान्स्वान्ज्ञातिसंबंधान्दिग्भ्यःकंसभयाकुलान् यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् १५ सभा॥
॥जितान्समाश्वास्यविदेशावासकर्शितान् निवासयत्स्वगेहेषुवित्तैःसंतर्प्यविश्वकृत् १६ कृष्णसंकर्ष॥
॥णभुजैर्गुप्तालब्धमनोरथाः गृहेषुरेमिरेसिद्धाःकृष्णरामगतज्वराः १७ वीक्षंतोऽहरहःप्रीतामुकुं॥
॥दवदनांबुजं नित्यंप्रमुदितंश्रीमत्सदयस्मितवीक्षणं १८ तत्रप्रवयसोऽप्यासन्युवानोतिबलौज॥
॥सःपिबंतोक्षैर्मुकुंदस्यमुखांबुजसुधांमुहुः १९ अथनंदंसमासाद्यभगवान्देवकीसुतःसंकर्षण॥
॥श्चराजेंद्रपरिष्वज्येदमूचतुः २० पितर्युवाभ्यांस्निग्धाभ्यांपोषितौलालितौभृशं पितृोरभ्यधिका॥
॥प्रीतिरात्मजेष्वात्मनोपिहि २१ सपितासाचजननीयौपुष्णीतांस्वपुत्रवत् शिशून्बंधुभिरुत्सृ॥
॥ष्टानकल्पैःपोषरक्षणे २२ यातयूयंव्रजंतातवयंचस्नेहदुःखितान् ज्ञातीन्वोद्रष्टुमेष्यामोवि॥
॥धायसुहृदांसुखं २३ एवंसांत्वय्यभगवान्नंदंसव्रजमच्युतः वासोलंकारकुप्याद्यैरर्हयामाससत्॥
॥कृतं २४ इत्युक्तस्तौपरिष्वज्यनंदःप्रणयविह्वलः पूरयन्नश्रुभिर्नेत्रेसहगोपैर्व्रजंययौ २५ श्री॥

दि १

नर

श्रीकृष्ण

यमेनत्याह पित्रोरिति आत्मनो देहाद्प्यात्मजेष्वभ्यधिका हि प्रीतिरिति २१ देवकीवसुदेवयोः पुत्रौ युवां नास्माकमत्राह सा वित्य
यिनवाच्यमित्याह सपितेति २२ २३ सव्रजं व्रजवासिभिः सहितं कुप्यानि सुवर्णरजताभ्यामतिरिक्तानि कांस्यादियात्राहीनिति तानि भूतिसि

॥श्रीरामः॥
॥१३१॥

एवं तावत् श्लोकद्वयेन युवयोरावयोश्च कामहानिर्जातेत्युक्तं आवयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह सर्वार्थसंभव इति
सर्वेषां पुरुषार्थानां संभवो यस्मिन् देहे । यतः याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्विशमानृण्यं मर्त्यः शतसंवत्सरमात्रेणायुषापि न प्राप्नो-
ति ५ तत्र ध्येयपितृयः पुत्रः कल्पः समर्थः सन्नपि देहेन धनेन च पित्रोर्वृत्तिं जीविकां न संपादयेत् तं प्रेत्य लोकान्तरे यमदूताः स्वदेहमांसं खादयं-
ति हीति ६ किं च मातापित्रादिशुश्रूषामकुर्वन् विफलजीवितश्च भवतीत्याह मातरमिति अबिभ्रत् अपुष्णन् श्वसन्नपि मृततुल्य एवेति ७

॥ सर्वार्थसंभवो देहो जनितः पोषितो यतः । न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ५ यस्तयोरात्मजः कल्प आत्म-
ना च धनेन च । वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयन्ति हि ६ मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुं । गुरुं विप्रं प्र-
पन्नं च कल्पोऽबिभ्रत्श्वसन्मृतः ७ तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः । मोघमेते व्यतिक्रान्ता
दिवसा वामनर्चतोः ८ तत्क्षन्तुमर्हथस्तात मातर्नौ परतन्त्रयोः । अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशं
९ ॥ श्रीशुक उवाच ॥ इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा । मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुदं १० सिं-
चन्तावश्रुधाराभिः स्नेहपाशेन चावृतौ । न किंचिदूचतू राजन् बाष्पकण्ठौ विमोहितौ ११ एवमाश्वास्य पितरौ
भगवान् देवकीसुतः । मातामहं तूग्रसेनं यदूनामकरोन्नृपं १२ आह चास्मान्महाराज प्रजाश्चाज्ञप्तुमर्हसि
। ययातिशापाद्यदुभिर्नासितव्यं नृपासने १३ मयि भृत्य उपासीने भवतो विबुधादयः । बलिं हरन्त्य-
वनताः किमुतान्ये नराधिपाः १४ श्रीकृष्णायनमः

तत्तस्मान्नौ आवयोः मोघं व्यर्थं अनर्चतोः अपूजयतोः ८ दुर्हृदा कंसेन क्लिष्टयोः ९ १० ११ आश्वास्य सान्त्वयित्वा १२ त्वमेवात्रायो-
ग्य इति मा वदेत्याह ययातिशापादिति न तु नृपत्वेऽपि महाराज्यानरोध इति भावः १३ मम तादृशी शक्तिर्नास्तीति चेत्तत्राह

भा॰ द॰ पू॰
१३२

तावतीः चतुःषष्टिकलाः ताश्च शैवतन्त्रोक्ता लिख्यन्ते यथा गीतं १ वाद्यं २ नृत्यं ३ नाट्यं ४ आलेख्यं ५ विशेषकच्छेद्यं ६ तण्डुलकुसुमबलिविका-
राः ७ पुष्पास्तरणं ८ दशनवसनाङ्गरागाः ९ मणिभूमिकाकर्म १० शयनरचनं ११ उदकवाद्यम् १२ उदकघातः १३ चित्रयोगाः १४ माल्यग्रथनविकल्पाः १५
शेखरापीडयोजनं १६ नेपथ्ययोगाः १७ कर्णपत्रभङ्गाः १८ सुगन्धयुक्तिः १९ भूषणयोजनं २० ऐन्द्रजालाः २१ कौचुमारयोगाः २२ हस्तला-
घवं २३ चित्रशाकापूपभक्ष्यविकारक्रियाः २४ पानकरसरागासवयोजनं २५ सूचीवायकर्म २६ सूत्रक्रीडा २७ वीणाडमरुकवाद्यानि २८ प्रहे-
लिका २९ प्रतिमाला ३० दुर्वाचकयोगाः ३१ पुस्तकवाचनं ३२ नाटकाख्यायिकादर्शनं ३३ काव्यसमस्यापूरणं ३४ पट्टिकावेत्रवाणविक-
ल्पाः ३५ तर्ककर्माणि ३६ तक्षणं ३७ वास्तुविद्या ३८ रूप्यरत्नपरीक्षा ३९ धातुवादः ४० मणिरागज्ञानं ४१ आकरज्ञानं ४२ वृक्षायुर्वेदयोगाः ४३ मेषकुक्कु-

१ कृतनेमौ

अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः। गुरुदक्षिणयाचार्यं छन्दयामासतुर्नृप ३६ द्विजस्तयोस्तं म-
हिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिं। संमन्त्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयांबभूव ह
३७ तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरन्तविक्रमौ। वेलामुपव्रज्य निषीदतुः क्षणं सिन्धुर्वि-
दित्वार्हणमाहरत्तयोः ३८ तमाह भगवानाशु गुरुपुत्रः प्रदीयतां। योऽसाविह त्वया ग्रस्तो बालको म-
हतोर्मिणा ३९ श्रीसमुद्र उवाच

टलावकयुद्धविधिः ४४ शुकसारिकाप्रलापनं ४५ उत्सादनं ४६ केशमार्जनकौशलं ४७ अक्षरमुष्टिकाकथनं ४८ म्लेच्छितकविकल्पाः ४९ देशभाषा-
ज्ञानं ५० पुष्पशकटिकानिमित्तज्ञानं ५१ यन्त्रमातृका ५२ धारणमातृका ५३ संवाच्यं ५४ मानसीकाव्यक्रिया ५५ अभिधानकोशः ५६ छन्दोज्ञानं ५७
क्रियाविकल्पाः ५८ वस्त्रगोपनानि ५९ छलितकयोगाः ६० आकर्षक्रीडा ६१ बालक्रीडनकानि ६२ वैनयिकानां वैजयिकानां व्यायामिकानां
च विद्यानां ज्ञानानि ६४ इति चतुःषष्टिः कलाः छन्दयामासतुः उपलोभितवन्तौ ३६ प्रभासे तेऽते मृतं महार्णवे मृतं बालं वरया-
मास ईप्सितवानिति विदित्वा समुद्रः तयोरर्हणमाजहारेति ३८

श्री हलः
१३२

पुरोधसा गर्गाचार्येण द्विजसंस्कृतिमुपनयनं २६ गावो गाः रुक्ममालाविभूषिताः स्वलंकृताः क्षौमवस्त्रमालावतीः २७ याः स्वमनोदत्ता आसन् ताश्चाद
दात् न तु ताः कंसेन हृताः स्मृत्वा तेजो गोष्ठिर्ददाविदस्माह कंसेनेति २८ गायत्रं व्रतं ब्रह्मचर्यं २९ प्रभवौ कर्षेण सर्वस्यामिति प्रभवौ अत एव सर्वज्ञौ स्वतः
सिद्धममलं ज्ञानं प्रच्छादयन्तौ नरचेष्टितैः ३०-३१ यथा यथावत् उपसाद्य प्राप्य गुरौ वृत्तिमनिंद्यां ग्राहयंतौ शिक्षयंतौ गुरुसमीपे तौ उपगतौ सेवि
तवंतौ वा विपर्ययः ३२ शुद्धभावो यासु अनुवृत्तिषु ताभिः सांगोपनिषदः अंगानि शिक्षादीनि तैः उपनिषद्भिश्च सहितान् ३३ सरहस्यं मंत्रदेवताको

अथ शूरसुतो राजन् पुत्रयोः समकारयत् पुरोधसा ब्राह्मणैश्च यथावद् द्विजसंस्कृतिं २६ तेभ्योऽदाद् दक्षिणा गावो रुक्म
माला स्वलंकृताः स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः २७ याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः
ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः २८ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ गर्गाद्यदुकुलाचार्या
द्गायत्रं व्रतमास्थितौ २९ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ नान्यसिद्धामलज्ञानं गूहमानौ नरेहितैः
३० अथो गुरुकुले वासमिच्छंतावुपजग्मतुः काश्यं सांदीपनिं नाम ह्यवंतिपुरवासिनं ३१ यथोपसाद्य तौ
दांतौ गुरौ वृत्तिमनिंदितां ग्राहयंतावुपेतौ स्म भक्त्या देवमिवादृतौ ३२ तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृ
त्तिभिः प्रोवाच वेदानखिलान् सांगोपनिषदो गुरुः ३३ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा तथा चान्वी
क्षिकीं विद्यां राजनीतिं च षड्विधां ३४ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ सकृन्निगदमात्रेण तौ संजगृहतु
र्नृप ३५

न सहितं धर्मान् मन्वादिधर्मशास्त्राणि न्यायपथान् मीमांसादीन् आन्वीक्षिकीं तर्कविद्यां षड्विधां संधिविग्रहयानासनद्वैधाश्र
यः इत्येवं षड्विधां राजनीतिं ३४ सकृन्निगदमात्रेण एकवारं गुरोरुच्चारणमात्रेण ३५ श्रीलक्ष्मायनमः श्रीगोपालजीन्मः

कामचारं द्विजातिः सन्यासिनस्त्यातिसंपुन गृहे स्त्रीन मनुप्राप्य सख्या गोपीरूपां दिशात २ गोपीनां सांत्वनं प्रतिरहस्यं सन मंत्रसाध्य मिति तद्ध्य मुद्धवं विशिनष्टि वृष्णीनामिति बुद्धिसत्तमः बुद्ध्यातिश्रेष्ठः २३ गोपीनां विशेषतः संदेशे कारणमाह ता इति मय्येव संकल्पात्मकं मनो यासां ताः स्व हमेव प्राणो यासां ताः मदर्थे त्यक्ता दैहिका पतिपुत्रादयो याभिस्ताः ततः किमत आह ये इति मन्निमित्तं त्यक्तौ लोकधर्मौ इहामुत्र सुखे तेन तत्साधना नि च यैस्तान्बिभर्मि संवर्धयामि सुखयामि स्पर्थः ४ तासां वियोगाधिं दर्शयति द्वयेन मयि ता इति विरहे औत्कंठ्येन विह्वला परवशाः ५

॥श्रीशुक उवाच॥ वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः १ तमाह भगवान्प्रेष्ठं भक्तमेकांतिनं क्वचित् गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः २ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह गोपीनां मद्वियोगाधिं मत्संदेशैर्विमोचय ३ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ४ ये त्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहं ५ मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः स्मरंत्योंग विमुह्यंति विरहौत्कंठ्यविह्वलाः ६ धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन प्रत्यागमनसंदेशैर्बल्लव्यो मे मदात्मिकाः ७ ॥श्रीशुक उवाच॥ इत्युक्त उद्धवो राजन्संदेशं भर्तुरादृतः आदाय रथमारुह्य प्रययौ नंदगोकुलं ८ श्रीकृष्णाय नमः श्रीदामोदरं

गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामि इति ये प्रत्यागमनसंदेशास्तैर्मे मदात्मिका वल्लव्यो गोप्यः मदात्मिका इति तासा मात्मा स्वदेहे यद्दिशा न हि विरहतापेन दग्धस्तैवमपि वर्तमानत्वात् कथंचिज्जीवंतीति भावः ६ संदेशं नवनीतानां वियोगेनेन हि सर्वात्मना कृष्णविरहितस्याहिकं ७ ८ श्रीहरे राम हरे राम राम राम हरे हरे हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे श्रीकृष्ण

नं०२

प०२
पद्यौ सं०

श्रीशुक उवाच

श्रीकृष्ण
१३३

पंचजनस्य सुरोऽहार्षीदित्येव सच महान् ममासाध्य इत्यर्थः ४०-२ सपर्यां पूजां ४३ सर्वेषां भूतानामाशय आश्रयः स्थानं तत्कारणं नितान्यालयो निवासो यस्य तं ४४ निजं कर्मैव बंधनं यस्य तं यथा भूतमपि मदाज्ञापुरस्कारेणानय तस्मै नहि षष्ठ्यर्थे ४५
४६ वत्सेति प्राधान्येनैकस्य संबोधनं गुरोर्निष्क्रियो गुरुदक्षिणा युष्मद्विधयोर्गुरोः सकामाः नामधेयेको नु कामो विशि

॥ समुद्र उवाच ॥ नैवाहार्षमहं देव दैत्यः पंचजनो महान् अंतर्जलचरः कृष्ण शंखरूपधरोऽसुरः ४० आस्ते तेना-
हृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकं ४१ तदंगप्रभवं शंखमादाय रथ-
मागतं ततः संयमनीं नाम यमस्य दयितां पुरीं गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुधः ४२ शंखनिर्ह्रा-
दमाकर्ण्य प्रजासंयमनो यमः तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहितां ४३ उवाचावनतः कृष्णं सर्व-
भूताशयालयं लीलामनुष्य हे विष्णो युवयोः करवाम किं ४४ ॥ श्रीभगवानुवाच ॥ गुरुपुत्रमिहानीतं नि-
जकर्मनिबंधनं आनयस्व महाराज मच्छासनपुरस्कृतः ४५ तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ द-
त्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ४६ ॥ गुरुरुवाच ॥ सम्यक्संपादितो वत्स भवद्भ्यां गुरुनिष्क्रयः
को नु युष्मद्विधगुरोः कामानामवशिष्यते ४७ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी छंदांस्ययातया-
मानि भवंत्विह परत्र च ४८ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ॥
समनंदन् प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ अपश्यंत्यो बह्वहानि नष्टलब्धधना इव ५० ॥ इति श्रीभागवते महापु-
राणे दशमस्कंधे गुरुपुत्रानयनं नाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ १ ॥

यमेन को याति ४७ हे वीरौ ४८ अनिलवद्रंहो वेगो यस्य तेन पर्जन्यो मेघः तद्वन्निनादो यस्य तेन ४९ नष्टमदृष्टं तत्पुनर्लब्धं धनं यामि-
स्ता इव ५० ॥ इति दशमे पंचचत्वारिंशः ॥ ४५ ॥ षट्चत्वारिंशके घोषमुद्धवं वै वनाद्धरिः प्रशोक्तानंदयोः स्वकेः स्वः शोकापनोदनं १

॥भा॰ द॰ पू॰॥
॥१३८॥

अप्यायास्यति मागमिष्यति किं १९ आत्मोपकारस्मरणादिभिरनुपमानंदेनाभिभूयमानः श्लोकैः दावाग्नेरित्यादिभिर्नाताताद्
श्रीत्वेति रक्षितास्सर्पाच्चेति अन्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः आत्मसेन रहिताः २० किंच स्मरतां मितितिलीलया अपांगेन नि
रीक्षितं अंग हे उद्धव २१ न केवलं शिथिला एव किंतु शनैः तदपरसंतीत्याह सरिदिति सरितः शैलाश्च वनोद्देशाश्च तान्

अप्ययास्यति गोविंदः स्वजनान्सकृदीक्षितुं कर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सस्मितेक्षणं दावाग्नेर्वातवर्षाच्च व
षसर्पाच्च रक्षिताः दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना २० स्मरतां कृष्णवीर्याणि लीलापांगनिरी
क्षितं हसितं भाषितं चांग सर्वा नः शिथिलाः क्रियाः २१ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् आ
क्रीडानीक्षमाणानां मनो याति तदात्मतां २२ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ सुराणां मह
दर्थाय गर्गस्य वचनं यथा २३ कंसं नागायुतप्राणं मल्लौ गजपतिं तथा अवधिष्टां लीलयैव
पशूनिव मृगाधिपः २४ तालत्रयं महासारं धनुर्यष्टिमिवेभराट् बभंजैकेन हस्तेन सप्ता
हमदधाद्गिरिं २५ प्रलंबो धेनुकोरिष्टस्तृणावर्तो बकादयः दैत्याः सुरासुरजितो हता येनेह ली
लया २६ ॥श्रीशुक उवाच॥ इति संस्मृत्य संस्मृत्य नंदः कृष्णानुरक्तधीः अत्युत्कंठोभवत्तूष्णीं प्रेम
प्रसरविह्वलः २७ यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च शृण्वंत्यश्रूण्यवास्राक्षीत्स्नेहस्नुत
पयोधरा २८ तयोरित्थं भगवति कृष्णे नंदयशोदयोः वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा २९
॥उद्धव उवाच॥ युवां श्लाघ्यतमौ नूनं देहिनामिह मानद नारायणेखिलगुरौ यत्कृता मतिरीदृशी ३०

[illegible]डान् क्रीडास्थानानि २२ सुराणामर्थाय महदीति गर्गस्य वचनं यथा २३ न केवलं तद्वचनानुसारेणैव वय

॥श्रीरामः॥
॥१३८॥

नो२

ततो गोपीभिर्ज्ञातत्वेन नंदसंगेन धावनिति तत्र यति ८ व्रजं वर्णयति पंचभिः वासि
तिस्नोचीत सर्वलंगतत्र(नि)सनिष्पन्नं पानं यस्येति ततो गोपीभिर्ज्ञातत्वेन युध्यद्भिः ऋषिभिर्मत्तैर्गोवृषैर्नादितं गा(व)स्त्रासितैर्धेनुभिः स्ववत्सकाम्ब्राति
नाद्यैः इत्यादिभिः वासितं पुष्पवं(सो) गावः तन्निमित्तमभितो युध्यद्भिः ऋषभैर्मत्तैर्गोवृषैर्नादितं नित्यं ... लोकैः नित्यनेनच १० गा
८ विलं घटिभिस्तन्निद्भिः गोदोहशब्दैः सहासितो रवाः मुंचनयग्रानय गृहाण देहीत्यादयो यस्मिं स्तत् वेणूनां निस्वनेन च ११

वासितार्थेभियुध्य
भानोनंदव्रजंश्रीमत् तिस्नोलोबतति विज्ञावसौ ... धानः प्रविशतां पश्यूनां खुररेणुभिः ८ वासितार्थेभियुध्य
द्भिर्नादितं ऋषिभिर्वृषैः धावंतीभिश्च वास्राभिरूधोभारैः स्ववत्सकान् ९ इतस्ततो विलंघद्भिर्गोवत्सै
र्मंडितं सितैः गोदोहशब्दाभिरवैर्वेणूनां निस्वनेनच १० गायंतीभिश्च कमनीयाणि कर्माणि बलकृष्ण
योः स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितं ११ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः धूपदी
पैश्च माल्यैश्च गोपावासैर्मनोरमं १२ सर्वतः पुष्पितवनं द्विजालिकुलनादितं हंसकारंडवाकीर्णैः
पद्मखंडैश्च मंडितं १३ तमागतं समागम्य कृष्णस्यानुचरं प्रियं नंदः प्रीतः परिष्वज्य वासुदेवं धिया र्प
यत् १४ भोजितं परमान्नेन संविष्टं कशिपौ सुखं गतश्रमं पर्यपृच्छत् पादसंवाहनादिभिः १५ कच्चिदं
ग महाभाग सखा नः शूरनंदनः आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः १६ दिष्ट्या कंसो हतः पा
पः सानुगः स्वेन पाप्मना साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा १७ अपि स्मरति नः कृष्णो मा
तरं सुहृदः सखीन् गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिं १८ श्री०

यं तोभिर्गोपालिगोपैश्च सुविराजितं ११ अग्न्यादिपूर्चनान्वितैः गोपगेहैः धूपादिभिश्च मनोरमं १२ षंडः समूहः १३ अर्चयामास
जया मास १४ १५ १६ साधूनामिति कर्मणि षष्ठी १७ गावो गाः गिरिं गोवर्धनं १८ श्री कृष्णायनमः श्री रामो हरायनमः

नंदआन॥

क्रीडार्थो सोपि साधूनां परित्राणाय कल्पते सत्त्वं रजस्तम इति भजते निर्गुणो गुणान् २
ततोपि क्री

ना॰ १॰ पू॰ ॥१३५॥

तस्यात्मारामेत्वं न्नस्य ति हेगमनं स्यास्ति प्रियात्पित्रादीन्विहाय न संगच्छत इति मन्येत त्राह न ह्यस्येति अस्य प्रियादयो न हि सन्ति तत्र हेतुः अमानिनः समानस्येति च ३७।३८ सोपि जन्मकर्मादिरहितोपि क्रीडाप्रयोजनः सन् साधूनां परिपालनाय सदसन्मिश्रयोनिषु सात्त्विकनामस राजस योनिषु पश्वादेवादिमत्स्यादिनृसिंहादियोनिषु आविर्भवतीत्यर्थः ३९ ननु जन्मादिकर्मादिरहितस्य कुत एतत्तत्राह सत्त्वमिति क्रीडार्थमेवेदं तथापि मायागुणैरीर्घ्यत इत्यर्थः ४० अत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टान्तेनाह कुर्वन् तस्याविद्ययैव कर्तृत्वं दृष्टान्तेनाह कुर्वन् तस्याविद्ययैव कर्तृत्वमिति

न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानिनः नोत्तमो नाधमो वापि समानस्यासमोपि वा ३७ न माता न पिता तस्य न भार्या न सुतादयः नात्मीयो न परश्चापि न देहो जन्म एव च ३८ न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु क्रीडन्नतीतोत्र गुणैः सृजत्यवति हन्त्यजः ४० यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ४१ युवयोरेव नैवायमात्मजो भगवान् हरिः सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ४२ दृष्टं श्रुतं भूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकं च विनाच्युताद्वस्तुतरां न वाच्यं स एव सर्वं परमार्थभूतः ४३

माता

सदृष्टान्तमाह यथेति भ्रमरिकापरिभ्रमणं तयोपलक्षितया दृष्ट्या भूरपि भ्राम्यतीति यथा प्रतीयते एवं चित्ते कर्तरि सति तत्र चित्ते अहंधिया आत्माध्यासेन आत्मा कर्ता स्मृतो यथा तद्वदिति ४१ किंच युवयोरेव नायमात्मजः किंतु सर्वेषामपि तत्रापि नात्मजः एव किंतु शत्रुमित्रादिरूपोपीति ४२ सर्वात्मत्वं निरूपयन् नमोहनिरत्नयेसंबंधमनेकांतिकीति करोति युवयोरेवेति द्वाभ्यां अच्युतादिनातराणि तरां तत्त्वतो वाच्यं निर्वचनार्हं वस्तु नास्तीति ४३

श्रीकृष्ण ॥१३५॥

विलक्षणत्वमेव जगत्कारणत्वेनानिर्दिष्टं तेन चाह एताविति रामो मुकुन्दश्च एतौ विश्वस्य बीजयोनी निमित्तोपादाने न नु पुरुषप्रधा-
नयोरधीनकारणे निर्दिष्टे इत्यत आह पुरुषः प्रधानमिति पुरुषांशः प्रधानं शक्तिः अतः प्रधानपुरुषावप्येतावित्यर्थः एवं जगत्कार-
णत्वं किं च अन्वीय भूतेषु भूतेष्वनुप्रविश्य भूतानां चानुप्रविष्टस्य विलक्षणस्य नानाविधस्य ज्ञानस्य जीवस्य ईशाते ईश्वरौ
भवतः कुतः पुराणौ अनादी अनादित्वात् कारणत्वं तत्तत्र नियन्तृत्वमित्यर्थः ३१ ननु स्वस्यादिकर्मानेकजन्मानुष्ठिताद्दिजन्मदर्शनात्
तस्याप्येभ्यः को विशेषः इत्याशंक्याह यस्मिन्निति ... कर्माशयं कर्मवासनां निर्हृत्य ... ब्रह्ममयः स्वरूपज्ञानवान् अर्क-
वर्णः शुद्धसत्वमूर्तिः सन् परां गतिं तत्स्वरूपं याति ३२ अखिलस्यात्मा चाहेतुश्च तस्मिन् कारणेन मर्त्य... तनौ महात्मन् परिपूर्णौ

दूरेन ४

एतौ हि विश्वस्य च बीजयोनी रामो मुकुन्दः पुरुषः प्रधानं अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ
३१ यस्मिन् जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धं निर्हृत्य कर्माशयमाशु याति परां गतिं ब्र-
ह्ममयोऽर्कवर्णः ३२ तस्मिन् भवन्तावखिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ भावं विधत्तां नितरां महा-
त्मन् किं वावशिष्टं युवयोः सुकृत्यं ३३ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः प्रियं विधास्यते पि-
त्रोर्भगवान् सात्वतां पतिः ३४ हत्वा कंसं रंगमध्ये प्रतीपं सर्वसात्वतां यदाह वः समागत्य कृष्णः सत्यं
करोति तत् ३५ मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमन्तिके अन्तर्हृदि स भूतानामास्ते ज्योतिरिवैधसि
३६

भवन्तौ किं कुरुतः अतः कृतकृत्यावित्यर्थः ३३ प्रस्तुतमाह आगमिष्यतीति पित्रोर्युवयोः ... प्रियं व्रजे नागत्य च स्नेहदुः-
खितान् ज्ञातीन् ... मोक्ष्यामो विधाय ... सुखमिति ... सत्यं करिष्यतीति ३४ ३५ कालविलंबन-
मसहमानौ प्रत्याह मा खिद्यतामिति हे महाभागौ अन्तिके इदानीमेव समीपे वा कृष्णं ... इत्यत आह अन्तर्हृदीति
न हि सर्वं किमिति न दृश्यते नत्राह ज्योतिरिवेति तद्यथा मथनं विना न दृश्यते ... भक्तिं विना ... ३६

त्यामा वि　　　　　　　　　　　　　　　　　　प्रस्थापित

षपीच्यं सुंदरं दर्शनं यस्य सः अच्युतस्येव वेषो भूषणानि च यस्य सः कोयं कुतो वा कस्य चेति विवदंतः सत्यं परिवव्रुः २।३ पार्षदं से-
वकं ४ पित्रोः प्रियचिकीर्षयेत्यत्र हेतुः स्नेहानुबंध इति ५ अन्यथा गोव्रजे तस्येत्यत्र हेतुः अर्थकृता कार्यनिमित्ता विडंबन-
मनुकरणमात्रं न तु वास्तवी मैत्री पुंभिरिति दृष्टांतो ६ अस्यैवान्यार्थदर्शनेन प्रपंचः निःस्वमिति हीनादक्षिणायेन तं यागं ७
पतितपत्रविगतफलं रत्नं अत्र स्नामनुरक्तामित्यर्थः ८ त्यक्तलौकिका त्यक्तलोकव्यवहाराः ९ प्रियस्य कर्माणि गायंत्यः तस्य
बाल्यकैशोरयोर्यानि कर्माणि तानि संस्मृत्य संस्मृत्य गतह्रियः सत्यो रुदंत्यश्च तमेव ध्यायंतीति सर्वक्रियायेवसंबंधः १० प्रियेण

सुविस्मिताः कोयमपीच्यदर्शनः कुतश्च कस्याच्युतवेषभूषणः इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदां-
बुजाश्रयं २ तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः रहस्यपृच्छन्नुपविष्टमासने विज्ञाय
संदेशहरं रमापतेः ३ जानीमस्त्वां यदुपतेः पार्षदं समुपागतं भर्त्रेह प्रेषितः पित्रोर्भवान्प्रियचिकीर्षया ४ अ-
न्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे स्नेहानुबंधो बंधूनां मुनेरपि सुदुस्त्यजः ५ अन्येष्वर्थकृता मैत्री यावदर्थ-
विडंबनं पुंभिः स्त्रीषु कृता यद्वत्सुमनःस्विव षट्पदैः ६ निःस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः अधी-
तविद्या आचार्यमृत्विजो दत्तदक्षिणं ७ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहं दग्धं मृगास्तथारण्यं जारो भु-
क्त्वा रतां स्त्रियं ८ इति गोप्यो हि गोविंदे गतवाक्कायमानसाः कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः ९ गा-
यंत्यः प्रियकर्माणि रुदंत्यश्च गतह्रियः तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः १० काचिन्मधुकरं दृष्ट्वा
ध्यायंती कृष्णसंगमं प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ११ श्रीकृष्णः

श्रीकृष्णेन मां प्रसादयितुं प्रस्थापितोयं दूत इति कल्पयित्वाऽब्रवीत् यद्वा तस्मिन्नप्युद्धवे प्रियप्रस्थापितो दूत इति दृष्टिं कृत्वा
मधुकरायदेशेनोद्धवमेवाब्रवीत् ११ श्रीहरे राम हरे राम राम राम हरे हरे हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे श्रीकृष्णः

श्रीगोपालकृष्ण　जयमतं २　श्रीकृष्णः १३९

शयान्विरूप्य प्रजल्पवाल्लून्रेहस्याहीन् ४४ मणिभिः कोप्याद्दिषुस्थितैः रत्नैर्विकर्षत्सु भुजे कंकणानां स्रजो यासां ताः
चलंतो नितंबाः लनाहाराश्च यासां कुंडलैस्त्विषंतः स्फुरंतः कपोला यासां अरुणनिकुंकुमानि येषु तान्याननानि यासां ता
एवंताश्च ताश्च ४८ सखभ्रजौकसो गोप्यः अक्रोधमाहुः अक्रूर इति पूर्वं साधितवानि स्वार्थसाधनः महाहुः येन नीत इति
४४ कंसं घातयित्वा पुनः किमर्थमागत इत्याशंक्य कार्यं संभावयंति किमिति न हासाधितेः कार्येणा प्रातस्य भर्तुः पा
लुनरेप्रेतस्य मृतस्य कंसस्य निःकृतिमौर्ध्वदेहिकमस्माभिः साधयिष्यते किं अस्मन्मांसैः पिंडान्कृत्वा हा स्यमी
एवं निशासा ब्रुवतोर्व्रतीतानंदस्य कृष्णानुचरस्य राजन् गोप्यः समुत्थाय निरूप्य हयान्वाल्लूत्तमभ्यर्च्य ह धीन्य

श्रीशुक उवाच

मंपन् ४४ ताहीयुद्दाय्वैर्मणिभिर्विरिंजुरज्जुविकर्षद्भुजकंकणास्रजः चलन्नितंबलनहारकुंडलत्विषा क
पोलारुणकुंकुमाननाः ४५ उद्गायतीनामरविंदलोचनं व्रजांगनानां दिवमस्पृशद्ध्वनिः दधमश्रनिर्म
थनशब्दमिश्रितो निरस्यते येन दिशाममंगलं ४६ भगवत्युदिते सूर्ये नंदद्वारि व्रजौकसः दृष्ट्वा रथं शा
तकौंभं कस्यायमितिचाब्रुवन् ४७ अक्रूर आगतः किं वायः कंसस्यार्थसाधकः येन नीतो मधुपुरीं रु
ल्मः कमललोचनः ४८ किं साधयिष्यत्यस्माभिर्भर्तुः प्रेतस्य निःकृतिं इति स्त्रीणां वदंतीनां उद्धवोगा
त्कृताह्निकः ४९ इति श्रीभागवते महापुराणे दशमस्कंधे उद्धवागमनं नाम षट्चत्वारिंशोध्यायः ४६

श्रीशुक उवाच

तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनं पीतांबरं पुष्करमालिनं ल
सन्मुखारविंदं मणिमृष्टकुंडलं १

स्वार्थः एवं वदंतीनां स्त्रीणां तत्र स निर्मिन्न वसतेतन स्नानादि नियम उद्धवः आगत इति ४९ इति दशमे षट्चत्वारिंशः ४६

॥ भा॰ द॰ प्र॰ ॥
॥ २३७ ॥

नुस्मरन्त्याः १ च १

नौ मातर्मेवं चोच्यमनुस्मरन्त्यां गविद्भ्यः वयमपि नो वसीदतीत्याह दिवीति दिवि भुवि रसातले च याः स्त्रियः स्युस्ताः का नाम दुरापा अन्तरं ता न तादृश्यः यत्तस्य सर्वथा कपटेन रुचिरेण हासेन भ्रूविजृम्भो यस्य तस्य हे कपटेतिवा किंच यस्य चरणरजः श्रीः सेवते तत्र वयं काः स्म अपिच यद्यप्येवं तथापि कृपणपक्षे कृपणानुकंपिनि पुरुषे उत्तमश्लोकशब्दो भवतीति तथा कथनीयं त्वयेति भावः १५ पादमूले प्रविशन्तं तं तत्समापयितुं ध्यात्मिव मत्वाह शिरसि न्यस्तं पादं विसृज तथाप्यमुं च न त्यजामि वेद्मीति मुकुंदात्सकाशात् आगतस्त्वं ततः शिक्षितः सर्वथा हे सखे दूत कर्मभिः चाटुकारैः प्रियोक्तिरच

दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृंभस्य याः स्युः चरणरज उपास्ते यस्य भूति
र्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः १५ विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्ते
भ्येत्य दौत्यैर्मुकुंदात् स्वकृत इह विसृष्टापत्यपत्यन्यलोका व्यसृजदकृतचेताः किं नु संधेयमस्मिन् १६ श्रीशुकः

पत्यान्य १

नात्मिः अनुनयविदुषः प्रार्थनाचतुरस्य ते सर्वमहं वेद्मि मुकुंदस्य तत्त्वमपि अविश्वसनीय इति भावः ननु तेन किमपराधं तत्राह स्वकृते तदर्थ
मेव विसृष्टाः अपत्यपत्यन्यलोकाः अपत्यानि पतयश्चेति इहलोकः अन्यलोको धर्मसाध्यः याभिस्ताः नः अकृतचेताः अकृतचेताः
असंस्थितचित्तो योऽत्यजत् अस्मिन् किंनु संधानं कर्तव्यमिति १६ श्री

॥ श्रीशुक ॥
॥ २३७ ॥

ति २ ५४

हेमधुप कितवस्य धूर्तस्य बंधो नोस्माकं अंघ्रिं मा स्पृश मा मां नमस्कारेण प्रार्थय प्रस्तेस्वार्थः तत्किमित्यपेक्षायां कृष्णवर्णस्य त
स्य श्मश्रूणां लोहितत्वे कारणमुत्प्रेक्षते मानाह सपत्न्याः कुचाभ्यां विलुलिता संमर्दिता या श्रीकृष्णस्य वनमाला स्रग्तत् एव नसाः
कुंकुमं येषु तैः श्मश्रुभिरुपलक्षितः किंतु तासामेव मानिनीनां प्रसादं मधुपतिर्वहतु किमस्मत्प्रसादेनेन तस्य यदुसदसि विडं
बंउपहासास्पदं कृतः यस्य दूतस्त्वमीदृक् ईदृशः १२ ननु किमित्येवमकृजानीये किं वल्लेनापि कृतमत आह सकृदिति
नवादृक् त्वादृशो दुर्मनाः सुमनसः कुसुमानि यथा त्यजति तद्वत् स्वहेयतां विज्ञस्य तस्य पादपद्मं श्रीः कथं सेवते नो विदितं

॥ गोप्य ऊचुः ॥ मधुप कितवबंधो मा स्पृशांघ्रिं सपत्न्याः कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः ॥ वहतु
॥ मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडंब्यं यस्य दूतस्त्वमीदृक् १२ सकृदधरसुधां स्वां मोहिनीं पायपि
॥ त्वा सुमनस इव सद्यस्तत्यजेस्मान्भवादृक् परिचरति कथं तत्पादपद्मं तु पद्मा ह्यपि बत हृतचेता उत्त
॥ मश्लोकजल्पैः १३ किमिह बहु षडंघ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणं विजय
सखसखीनां गीयतां तत्प्रसंगः क्षपितकुचरुजस्ते कल्पयंतीष्टमिष्टाः १४

मयेत्याह अपि बत हे उत्तमश्लोकजल्पैर्मिथ्याकथाभिः प्रायो हृतचेताः वयं तु न लक्ष्मीवद्विवत्रा इतिभावः
१३ भृंगकाटन्वर्तृधाकुर्वंस्तत्प्रसादलाभाय कृष्णं गायतीति मत्वाह किमिहेति पुराणं पुरातनं बहु शोभनं विजयसखा
स्य कृष्णस्य सांप्रतं याः सख्यस्तासामग्रे तत्प्रसंगो गीयतां इष्टाः कृष्णस्य प्रियास्ते तत्कृजिता इति वा तेनालिंगितेन तत्त
ापिताः कुचरुजः यासां ताः नैवेष्टमपेक्षितं ददास्यंतीति १४ श्रीकृष्णायनमः श्रीदामोदरायनमः श्रीगोपालजीसहाय

अपि च जानीम एव तत्कथयापि त्रिवर्गस्तु नश्यतीति तथापि न त्यक्तुं शक्नुमः किं कुर्म इत्याह यदनुचरितेति यस्यानुचरितमेव लीलानदे
कर्णपीयूषं तस्य विप्रुट् कणिका तस्याः सकृददनं सेवनं तेन विधूतानि त्यक्तानि द्वन्द्वधर्मा रागादयो येषां ते अत एव विनष्टाः अत एव त्यक्त्वा दीनं कु
टुम्बं गृहकुटुम्बं विहाय दीना भोगहीना विहंगा अपि भिक्षुचर्यां प्राणवृत्तिमात्रं चरंति अतस्त्यक्तुं तथापि त्यक्तुं न शक्नुम इति निःस्पृहत्वे यन्ता
वधूतो नार्थः दुस्त्यजत्वे पारमार्थिको पमर्षः विधूतद्वन्द्वधर्मा इत्यत्र नः समासः पूर्ववत् तत एव विनष्टा अविनष्टाश्चेति समासः इत एवेन द्वन्द्वधर्मा
णो विनष्टा एव सपदि तत्क्षणमेव दीनान् तु गृहसहितं कुटुम्बं विहाय दीनाः इवाकिंचनाः धीरा इति वा पाठः बहवो विहंगा हंसा इव सारासारवि
वेकचतुराः भिक्षुचर्यां पारमहंस्यं चरंति तस्मादेवं परमपुरुषार्थरूपत्वाद्दुस्त्यज एव तत्कथार्थ इति १८ ननु किं एवं ब्रूषे पूर्ववत्तथैव साकं रह

॥ यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वन्द्वधर्मा विनष्टाः। सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इह विहंगा भिक्षुचर्यां चरंति ॥१८॥ वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कृ
ष्णवध्वो हरिण्यः। ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुज उपमंत्रिन्भण्यतामन्यवार्ता ॥१९॥ प्रि
यसख पुनरागाः प्रेयसा प्रेषितः किं वरय किमनुरुंधे माननीयोऽसि मेंऽग नयसि कथमिहा
स्मान्दुस्त्यजद्वन्द्वपार्श्वं सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥२०॥ श्री

लि किं मे वंना वो चरित्रं तस्माह[illegible]यमिति हे उपमंत्रिन् [illegible]त्र स्माकमियं वार्ता यतः कुलिकस्य मृगयोः रुतं गीतं अज्ञा यथाश्र
तं सत्यमिति श्रद्दधानाः कृष्णस्य हरिणस्य वध्वः भार्याः हरिण्यः शरैः हताः सत्यो रुजो ददृशुः एवं जिह्मस्य कुटिलस्य व्याहृतं
अनृतमिव श्रद्दधानाः स्मरहृयं त्यो वयं असकृदेतद्ददर्शिम किं तत् तस्य नखैः स्पर्शः तेन तीव्रः स्मरः तेन रुजः पीडाः अस्माकमन्यावार्तामे
एव तां कथयतामिति १९ परावृत्य गत्वा पुनरागतं प्रत्याह प्रियसखेति हे प्रियस्य सखे प्रेयसा श्रीकृष्णेन पुनः प्रेषितः किं त्वमाग
तोसि अंग हे हृतमे माननीयः पूज्योसि अतो नवा किमनुरुंधे प्राप्तुमिच्छसीत्यर्थः ननु वरयत्वीश्च समानितं प्रत्याह नयसीति हे स
नीस्मान्दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वं समीपं कथं नयसि तत्रापि हि हे सौम्य श्रीर्नाम वधूः साकं सहैव सततमास्ते तत्रापि

किंच तस्य पूर्वाणि कर्माण्यनुसंदधाना बिभेम्यहमस्मादित्याह मृगयुरिवेति मृगयुर्लुब्धक इव यः कपींद्रं वालिनं विव्यधे अविध्य
त् लुब्धधर्मा क्रौर्यवान् अलमुग्रधर्मेति वा लुब्धको हि तन्मांसमनुकामो विध्यति स्वयं तु न पाप्तो रक्षां करिष्य इत्यर्थः तथा स्त्रियं
च सूर्पणखां स्त्रीजितः सीतापरतंत्रः कामयानां स्वयमेव प्राप्तां ... धनं ... यस्मात्तां विरूपां छिन्नकर्णनासिकामकरोद्दाशरथिरूपेण तथा

॥ मृगयुरिव कपींद्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानां ॥
॥ वलिमपि बलिमत्त्वावेष्टयद्ध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः १७ ॥

वलिमपि न केवलं तं वलिं स्वयं बलिमत्त्वा ध्वांक्षवत् काकवत् अवेष्टयत् बबंध वामनरूपेण वलिमपि बलिमत्त्वाधो हि पदिति पाठे वलिं पूजां गृ
हीत्वा विष्टपात्स्वर्गादधो हि तिपरिस्पर्धः तत्तस्मादसितसख्यैरलमस्य सख्यैरलं एवं चेत्किमिति नित्यं गाथ्यते तत्राह दुस्त्यजस्तस्य कथारूपो
॥ र्थ इति १७ ॥

भा० ए० स्कं०
१३९

हि२

ननु कारणत्वेन सर्वानुगतत्वेच कार्यकारणाभेदः स्यादितत्राह आत्मन्येवेति ननु नित्यसिद्धस्य कुतः सत्त्वादिरूपता तत्राह भूतेंद्रियगुणात्मना बुद्धीदि
येति वा पाठः तद्रूपेणेति ननु निर्विकारस्य कुतस्तद्रूपतेति तत्राह आत्ममायानुभावेनेति ३० ननु आत्मनो भूतादिरूपत्वे च तद्दोषप्रसंगस्तत्राह आ
त्मेति आत्मा तु शुद्धः कुतः अगुणत्वात् नगुणो यद्वेतीति तथा तत् कुतः व्यतिरिक्तः तदपि कुतः ज्ञानमयः ज्ञानस्वरूपः न त्वहं प्रत्यये संवेद्यमेवा
त्मनोनानावस्थत्वमिति कुतः सुषुप्तेति तत्राह सुषुप्तेति मायाकार्यमनोवृत्तिभिर्विश्वतैजसप्राज्ञरूपेण प्रतीयते न स्वत इत्यर्थः ३१ कुतः मनोनि
रोधेन तन्निवृत्तिरिति व्यतिरेकं दर्शयितुं मनोनिरोधं विधत्ते येनेति उस्थितः पुमान् यथा मिथ्याभूतजन्मैव स्वप्नं ध्यायति एवं बाधितान्यपींद्रियार्थान् श
ब्दादीन् येन मनसा ध्यायेति ध्यायंश्च येनेंद्रियाणि प्रसमयन्त प्रायतन्मनः विनिरुद्ध्य नलसः सन्निरुद्धधातृनियच्छेदिति ३२ नावताव्यवस्थार्थोभव

आत्मन्येवात्मनात्मानं स्रक्षे हन्त्यनुपालये आत्ममायानुभावेन भूतेंद्रियगुणात्मना ३० आत्माज्ञानमयः शुद्धो व्यतिरि
क्तो गुणान्वयः सुषुप्तस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ३१ येनेंद्रियार्थान् ध्यायेत मृषास्वप्नवदुत्थितः तन्निरुद्ध्या
दिंद्रियाणि विनिद्रः प्रत्यपद्यत ३२ एतदंतः समाम्नायो योगः सांख्यं मनीषिणां त्यागस्तपो दमः सत्यं समुद्रांता
इवापगाः ३३ यत्त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशां मनसः सन्निकर्षार्थं तदनुध्यानकाम्यया ३४ श्रीरामजी

पौ२

रा२

श्रीकृष्णः
१३९

नीत्याह एतदंत इति एष मनोनिरोधः अंतः समाप्तिः फलं यस्य सः समाम्नायो वेदः स तत्र पर्यवस्यतीत्यर्थः योगोष्टांगः सांख्यमात्मा
नात्मविवेकः त्यागः संन्यासः तपः स्वधर्मः दम इंद्रियदमनं मार्गभेदेप्येकत्र पर्यवसाने दृष्टांतः समुद्रांता आपगा नद्य इवेति ३३ ननु किम
त्यानि वास्मान्नात्मविद्यया प्रलोभयसि वयं तु सर्वकुटुंबकलत्रगुणगुणालंकृतेन न त्वया विरहेनैव सहाम इति चेदत आह यत्त्वहमि
ति दृशां दूरे यद्वर्तेन तत्स्वध्यानार्थं तच्च ध्यानं मनसः सन्निकर्षार्थमिति ३४ श्रीकृष्णायनमः श्रीरामोदरायनमः श्रीकृष्ण

तेन संमंत्रिता सती ब्रूते अपीति वन हर्षे हि सौम्य गुरुकुलादागत्य आर्यपुत्रः कृष्णः अधुना किं मधुपुर्यां वर्तते कदाचित्स्मरति नो अस्माकं वार्ताः किं ब्रूते अगुरुवत्सुगंधं भुजं नो मूर्ध्नि कदानु धास्यतीति २१।२२ आलक्ष्य दर्शनोत्सुका गोपीः प्रियस्य संदेशैः सांत्वयन् अथ मंत्रा वदिदमभाषत तत हर्षबुद्धिः अहो इति विस्मये नूनं यूयं पूर्णार्थाः २३ श्रेयोभिः श्रेयःसाधनैः २४ अनुत्तमा अतिश्रेष्ठा २५ अवृणीत वव्र नवत्यः २६ सर्वात्मभावः एकांतभक्तिः अधिकृतः प्राप्तः भगवतो मम सुखप्रदर्शनेन ममैव महाननुग्रहः कृत इति २७ भर्तुः कृष्णस्य रहस्करः रहस्यकार्यकर्ता २८ भवतीनां मे मया सह वियोगो नास्ति कुतः सार्वात्म्येन सर्वस्योपादानकारणेन अत एव सर्वेषु म

अपि वत मधुपुर्यामार्यपुत्रोऽधुनास्ते स्मरति स पितृगेहान्सौम्य बंधूंश्च गोपान् क्वचिदपि स कथा नः किंकरीणां गृणीते भुजमगुरुसुगंधं मूर्ध्न्यधास्यत्कदा नः २१ ॥ श्रीशुक उवाच ॥ अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत २२ ॥ उद्धव उवाच ॥ अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः वासुदेवे भगवति यासामित्यर्पितं मनः २३ दानव्रततपोहोमजपस्वाध्यायसंयमैः श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते २४ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा २५ दिष्ट्या पुत्रान्पतीन्देहान्स्वजनान्भवनानि च हित्वावृणीत यूयं यत्कृष्णाख्यं पुरुषं परं २६ सर्वात्मभावोऽधिकृतो भवतीनामधोक्षजे विरहेण महाभागा महान्मेऽनुग्रहः कृतः २७ श्रूयतां प्रियसंदेशो भवतीनां सुखावहः यमादायागतो भद्रा अहं भर्तू रहस्करः २८ ॥ श्रीभगवानुवाच ॥ भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही २९ तथाहं च मनःप्राणबुद्धींद्रियगुणाश्रयः २९

न चाहं कार्येष्वहमनुगतत्वेन स्थित इति सदृष्टांतमाह यथेति भूतेषु चराचरेषु महांति भूतानि यथा वाय्वग्निः वायुसहितोऽग्निः वायुसहितोऽग्निः वायुश्चाग्निश्चेत्यर्थः तथाहं मनआदीनि कार्याणि गुणाः कारणं तेषामाश्रयत्वेनानुगत इत्यर्थः २९ आत्म

स्वनिमित्तेन शोकेन तप्ताः नः अस्मान् गात्रैः करस्पर्शादिभिः संजीवयन् किंनु इहैष्यतीति ४४ अन्या ऊचुः कस्मादिहेति अनन्यगतित्वेन पूर्वं मथुरावस्त्वं संप्रति महदैश्वर्यप्राप्तः कस्मादिहागमिष्यतीति ४५ अन्यास्तु परस्परार्थमूचुः किमस्माभिरिति वनचरीभिरस्माभिः अन्याभिर्वा राजकन्याभिर्महात्मनो धीरस्य किंच श्रीपतेः तथाप्याप्तकामस्य अतएव कृतात्मनः पूर्णस्य किं कोप्यर्थः क्रियेत न कश्चिदिति ४६ यतो[illegible]माना यावत्संगतिः सैवास्मानाकुलयति अतो नैराश्यमेव परं सुखं तत्रापि दुःकरमित्याहुः परं सौख्यमिति

अप्याशास्वति दिः

अप्येष्यतीह दाशार्हस्तप्ताः स्वकृतया शुचा संजीवयन्नु नो गात्रैर्यथेंद्रो वनमंबुदैः ४४ कस्मात्कृष्ण इहायाति प्राप्तराज्यो हताहितः नरेंद्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः ४५ किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः श्रीपतेराप्तकामस्य क्रियेतार्थः कृतात्मनः ४६ परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिंगला तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ४७ क उत्सहेत संत्यक्तुमुत्तमश्लोकसंविदं अनिच्छतोपि यस्य श्रीरंगान्न च्यवते क्वचित् ४८ सरिच्छैलवनोद्देशा गावो वेणुरवा इमे संकर्षणसहायेन कृष्णेनाचरिताः प्रभो ४९ पुनःपुनः स्मारयंति नंदगोपसुतं बत श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ५० गत्या ललितयोदारहासलीलावलोकनैः माध्व्या गिरा हृतधियः कथं तं विस्मरामहे ५१ हे नाथ हे रमानाथ व्रजनाथार्तिनाशन मग्नमुद्धर गोविंद गोकुलं वृजिनार्णवात् ५२ श्रीशुक उवाच ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वराः उद्धवं पूजयांचक्रुर्ज्ञात्वात्मानमधोक्षजं ५३ उवास कतिचिन्मासान् गोपीनां विनुदन् शुचः कृष्णलीलाकथां गायन् रमयामास गोकुलं ५४ श्रीशुकः

आशा हि परमं दुःखं नैराश्यं परमं सुखं यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला ३

स्वैरिणी कामचारिणी ४७ संविदं एकांतवार्तां किंच न विस्मृतौ न तावद्दुःखम्[illegible]लिसापि नोस्माकं संभवतीत्याहुः सरिच्छैलेति त्रिभिः कृष्णेनाचरिताः सेविताः ४८ ५० हे उद्धव तं कथं विस्मरामेति ५१ ५२ श्रीकृष्णमधोक्षजं ज्ञात्वा तं च आत्मानं ज्ञात्वा ५३ विनुदन् अपनयन् ५४

एतदुपपादयति त्रयेण यथेति ३५ ३६ उपैष्यथेति मां उपैष्यथेति माधुर्यमात्रमितिचेदत आह यामिति क्रीडता एषः स्वमत्र प्रतिब
न्धायाः वने क्रीडता मया सह अलब्धक्रीडा देवमामीमापुः प्रापुः ३७ तस्य संदेशेनागता स्मृतिर्यासां प्रत्यमापेक्षितीया ३८ यदूनामहितः
शत्रुः अघकृद्दुःखदः दिष्ट्या इत्यानंदे आप्तैः प्राप्तैः हितैर्वा ३९ अन्या ऊचुः कच्चिदिति नोस्माकं करणीयां प्रीतिं कच्चित्पुरयोषितां करोति
स्निग्धं च तत्सव्रीडहासेनोदारमीक्षणं तेनार्चितः तासिरस्माभिर्वा ४१ पुनरन्या ऊचुः किमनया चिंतया अस्मान् क्वचित्प्रस्तुते स्मरति

यथा दूरचरे प्रेष्ठे मन आविश्य वर्त्तते स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ३५ मय्यावेश्य मनः कृ
त्स्नं विमुक्ताशेषवृत्ति यत् अनुस्मरंत्यो मां नित्यमचिरान्मामुपैष्यथ ३६ या मया क्रीडता रात्र्यां वनेऽस्मिन्व्र
ज आस्थिताः अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिंतया ३७ श्रीशुक उवाच एवं प्रियतमादिष्टमा
कर्ण्य व्रजयोषितः ता ऊचुरुद्धवं प्रीतास्तत्संदेशागतस्मृतीः ३८ गोप्य ऊचुः दिष्ट्याहितो हतः कंसो
यदूनां सानुगोऽघकृत् दि[ष्ट्या]प्तैर्लब्धसर्वार्थैः कुशलास्तेऽच्युतोऽधुना ३९ कथं रतिविशेषज्ञः प्रि
यः पुरयोषितां नानुबध्येत तद्वाक्यैर्विभ्रमैश्चानुपूजितः ४० कच्चिद्गदाग्रजः सौम्य करोति पुर
योषितां प्रीतिं नः स्निग्धसव्रीडहासोदारेक्षणार्चितः ४१ अपि स्मरति नः साधो गोविंदः प्रस्तुते क्वचि
त् गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः स्वैरकथांतरे ४२ ताः किं निशाः स्मरति यासु तदा प्रियाभिर्वृंदावने
कुमुदकुंदशशांकरम्ये रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ४३

किं ग्राम्याः अविदग्धाः ४२ अन्या ऊचुः ताः इति कुमुदैः कुंदैः शशांकेन च रम्ये वृंदावने क्वणंति चरणनूपुराणि यस्यां तस्यां रासगो
ष्ठ्यां अस्माभिः प्रियाभिरीडिता मनोज्ञाः कथा यस्य सः तदा यासु निशासु रेमे ताः कदाचित्किं नु स्मरति वा न वेति ४३ श्रीकृष्णाप्तः

किंच आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् ... आसां गोपीनां चरणरेणुभाजां गुल्मादीनां मध्ये यत्किमप्यहं स्यां ... भावितात्मनां याऽप्यस्ति आर्यपथं स्वमार्गं धर्मं च हित्वा ६१ पुनस्ता एव विशिनष्टि या वा इति योगेश्वरैरप्यात्मन्येवार्चितं स्तनेषु न्यस्तं परिरभ्य तापं जहुरिति एवं महत्त्वं प्रतिपाद्य नमस्करोति वन्द इति ६२ अनुज्ञाप्य अनुज्ञां याचित्वा आमंत्र्य पृष्ट्वा ६४ नोऽस्माकं मनसो वृत्तयः कृष्णपादाम्बुजाश्रयाः स्युः अभिधायिन्यः अभिधायिन्यः ६६ कृष्णे रतिः स्यादिति ६७ ६८ कृ

आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनां या दुस्त्यजं स्वजनमार्यपथं च हित्वा ।। भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्यां ६१ या वै श्रियार्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रा- सगोष्ठ्यां कृष्णस्य तद्भगवतश्चरणारविन्दं न्यस्तं स्तनेषु विजहुः परिरभ्य तापं ६२ वन्दे नन्दव्रजस्त्री- णां पादरेणुमभीक्ष्णशः यासां हरिकथोद्गीतं पुनाति भुवनत्रयं ६३ श्रीशुक उवाच अथ गोपीर- नुज्ञाप्य यशोदां नन्दमेव च गोपानामन्त्र्य दाशार्हो यास्यन्नारुरुहे रथं ६४ तं निर्गतं समासाद्य नानोपा- यनपाणयः नन्दादयोऽनुरागेण प्रावोचन्नश्रुलोचनाः ६५ मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजा- श्रयाः वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ६६ कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरे- च्छया मंगलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ६७ एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप उद्ध- वः पुनरागच्छन्मथुरां कृष्णपालितां ६८ कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसां वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ६९ इति श्रीभागवते महापुराणे दशमस्कन्धे गोपीकासन्देशो नाम ।। सप्तचत्वारिंशोऽध्यायः ।। ४७ ।।

... ह्युद्धवो भक्त्युद्रेकमाह उपायनानि चाहरदिति ६९ इति दशमे सप्तचत्वारिंशः ।। ४७ ।। अष्टचत्वारिंशे कथ्यते कृष्णः कुब्जामरीरमत् अक्रूरस्य गृहं गत्वा तं गजाह्वयमादिशत् १ सैरंध्र्याः कामसंतप्ताः पूर्वं प्रार्थितत्वान्मनोरथान् अक्रूरस्य ... कृष्ण तत ...

सरिद्वनगिरिद्रोणीर्वीक्षन्कुसुमितान्द्रुमान् । कृष्णं संस्मारयन्रेमे हरिदासो व्रजौकसां ॥ ५४ ॥ कृष्णावेशेनात्मनो मनसो विक्लव्यं तासां गोपीनां यस्मात् तमस्मारि ॥५५॥ सरिद्वनगिरिद्रोणीर्वीक्षन्कुसुमितान्द्रुमान् रेमे कृष्णसंस्मारयन्हरिदासोव्रजौकसां व्रजौकसामित्यर्थः ॥ ५७ ॥ एता इति एताः परं केवलं तनुभृतः सम्यक् जन्मसफलमित्यर्थः यस्मात् गोविन्द एव निखिलात्मनि रूढभावाः तदेतत् कथं ... उक्तं भवति ... मुमुक्षवः ... मुनयो मुक्ता अपि वयं च ... ब्रह्मजन्मादिभिः किं ... फलजन्मानन्तं रूढभावाः परमप्रेमवत्यः ... ब्रह्मजन्मभिः विप्रत्वं ... सावित्र्यादिजन्मभिः किं ... यत्र ... ज्ञानं ... गुरोलोगो यस्य ... ब्रह्मजन्मभिः ... किं च ईश्वरप्रसादे महत्त्वे कारणं तस्य च न जाति ... कथासु रतो यस्य ... अनंतकथासुरतो यस्य ... केमा इति ... पुंसः ननु ... उपयुक्तः सेवितः अगदराजः अमृतं यथा ... कारणं किंतु केवलं भजनमेवेत्याह

यावंत्यहानि नंदस्य व्रजेऽवात्सीत्स उद्धवः । व्रजौकसां क्षणप्रायाण्यासन्कृष्णस्य वार्तया ॥ ५५ ॥ सरिद्वनगिरिद्रोणी-
र्वीक्षन्कुसुमितान्द्रुमान् । कृष्णं संस्मारयन्रेमे हरिदासो व्रजौकसां ॥ ५६ ॥ दृष्ट्वैवमादि गोपीनां कृष्णावेशात्मवि-
क्लवं । उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ ॥ ५७ ॥ एताः परं तनुभृतो भुवि गोपवध्वो गोविंद एव निखि-
लात्मनि रूढभावाः । वांछंति यद्भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनंतकथारसस्य ॥ ५८ ॥ क्वेमाः स्त्रि-
यो वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः । नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षा-
च्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥ ५९ ॥ नायं श्रियोंऽग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंध-
रुचां कुतोऽन्याः । रासोत्सवेऽस्य भुजदंडगृहीतकंठलब्धाशिषां य उदगाद्व्रजवल्लवीनां ॥ ६० ॥

॥ ५९ ॥ अस्त्वेतासामेवं श्लाघ्यं गोपीषु भगवतः प्रसाद इत्याह नायमिति श्रियोंऽगे वक्षसि उ अहो नितांतरतेरेकांतरतेरपि मत्याः श्रियोऽपि नायं प्रसादः अनुग्रहो नलिनस्येव गंधो रुक् कांतिश्च यासां तासां स्वर्योषितामप्सरसामपि नास्ति अन्याः पुनः कुतो नि... रासोत्सवेऽस्य भुजदंडाभ्यां गृहीतः आलिंगितः कंठो येन लब्धा आशिषो याभिस्तासां गोपीनां य उद्गात् आविर्बभूव ॥ ६० ॥

ना० द० ४०
२४२

मनोग्राह्यं विषयसत्वं प्रसत्वान्नतु घत्वात् ११ किं चिकीर्षयन् हस्तिनापुरस्थानं कारयितुमिच्छन्निति अर्थः अक्रूरप्रियकाम्यया च
१२ अरात् दूरत एव १३ १४ अयं प्रवृत्तिभेदः आसर्वतो धारयन्निप्यनयः १५ १६ वां युवयोरिदं कुलं उद्धृतं समेधितं च १७ वामिदं
कुलमित्याहित्य वहारदृष्ट्योक्तं परमार्थमाह युवामिति जगन्मयौ युवां कुतः जगद्धेतू न हाधिकृतः प्रधानपुरुषौ न हानको
अन्तोन वक्ष्यो विना परं कारणं अपरं कार्यं च नास्तीति १८ तनु प्रमत्ता हि सिद्धं कथं नानात्वमुच्यते अत आह आत्मसृष्टमि
ति हे ब्रह्मन् परमेश्वर ब्रह्मलेति वा पाठः रजआदिशक्तिभिरात्मनैवनैव स्वसृष्टमिदं विश्वं अन्वाविश्य कारणत्वाहन्नु प्रविष्टः

दुराराध्यं समाराध्य विष्णुं सर्ववरेश्वरं यो वृणीते मनोग्राह्यं असत्वात्कुमनीष्यसौ ११ अक्रूरभवनं कृष्णः
सहरामोद्धवः प्रभुः किंचिच्चिकीर्षयन्प्रागादक्रूरप्रियकाम्यया १२ स तान्नरवरश्रेष्ठानाराद्वीक्ष्य स्वबां-
धवान् प्रत्युत्थाय प्रमुदितः परिष्वज्याभ्यनंदत १३ ननाम कृष्णं रामं च स तैरप्यभिवादितः पूजयामा-
स विधिवत्कृतासनपरिग्रहान् १४ पादावनेजनीरापो धारयन् शिरसा नृप अर्हणेनांबरैर्दिव्यैर्गंध-
स्रग्भूषणोत्तमैः १५ अर्चित्वा शिरसानम्य पादावंकगतौ मृजन् प्रश्रयावनतोऽक्रूरः कृष्णरामाव-
भाषत १६ दिष्ट्या पापो हतः कंसः सानुगो वामिदं कुलं भवद्भ्यामुद्धृतं कृच्छ्राद्दुरंताच्च समेधितं १७ यु-
वां प्रधानपुरुषौ जगद्धेतू जगन्मयौ भवद्भ्यां न विना किंचित्परमस्ति न चापरं १८ आत्मसृष्टमि-
दं विश्वमन्वाविश्य स्वशक्तिभिः ईयते बहुधा ब्रह्मन् श्रुतिप्रत्यक्षगोचरं १९ यथा हि भूतेषु चरा-
चरेषु मह्यादयो योनिषु भांति नाना एवं भवान्केवल आत्मयोनिष्वात्मात्मतंत्रो बहुधा विभाति २०

अन्तःप्रविश्येव स्थितः श्रुतिप्रत्यक्षगोचरं यथा भवति तथा बहुधा नानेव प्रतीयते १९ एकस्यैव बहुधा प्रतीतिं सदृष्टां-
तमाह यथा हीति योनिषु स्वस्वकार्यरूपान्तरेणाभिव्यक्तिस्थानेषु चराचरेषु भूतेषु यथा महीप्रमुखानि कारणानि नानाभांति

श्रीकृष्ण०
२४२

घेः नः स्मिर ही सुरतबंधादिलेख्यैः

महार्हैरनर्घैः उपस्करैर्गृहोपकरणैरचितं कामो यापैः ... सुरतेसंबंधादिलेख्यैरुपबृंहितं २ यथा तयोचितं ३ ४ प्रसाधितो योग्यमा
यादृत... सव्रीडयहस्लीलयोज्ज्वलं स्थितं तदंशुकविन्यस्तमेवतया रीतितैरुपलक्षिता ५ अनुलेपार्पणादन्यत्र ... नालीनि
दर्शयितं पुण्यलेशयेत्युक्तेन पुण्यस्याल्पत्वविवक्षया ६ कुचादीनां रुजो मृजंतीति जिघ्रंतीचरणं ७ काममेव ... यावत तनचगोप्य

अथ विज्ञाय भगवान्सर्वात्मा सर्वदर्शनः । सैरंध्र्याः कामतप्तायाः प्रियमिच्छन्गृहं ययौ १ महार्हो-
पस्कराढ्यं वै कामोपायोपबृंहितं मुक्तादामपताकाभिर्वितानशयनासनैः धूपैः सुरभिदीपैः स्रग्गंधैरपि
मंडितं २ गृहं तमायांतमवेक्ष्य सासनात्सद्यः समुत्थाय हि जातसंभ्रमा यथोपसंगम्य सखीभिरच्युतं सभाज
यामास सदासनादिभिः ३ तथोद्धवः साधु तयाभिपूजितो न्यषीदद्वुर्व्यामभिमृश्य चासनं कृष्णोपि तूर्णं शय
नं महाधनं विवेश लोकाचरितान्यनुव्रतः ४ सा मज्जनालेपदुकूलभूषणस्रग्गंधतांबूलसुधासवादि-
भिः प्रसाधितात्मोपससार माधवं सव्रीडलीलोत्स्मितविभ्रमेक्षितैः आहूय कांतां नवसंगमह्रिया विशं-
कितां कंकणभूषिते करे प्रगृह्य शय्यामधिवेश्य रामया रेमेनुलेपार्पणपुण्यलेशया ६ सानंगतप्तकु-
चयोरुरसस्तथाक्ष्णोर्जिघ्रंत्यनंतचरणेन रुजो मृजंती दोर्भ्यां स्तनांतरगतं परिरभ्य कांतमानंदमूर्तिम
जहादतिदीर्घतापं ७ सैवं कैवल्यनाथं तं प्राप्य दुष्प्राप्यमीश्वरं अंगरागार्पणेनाहो दुर्भगेदमयाचत ८
सहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया रमस्व नोत्सहे त्यक्तुं संगं तेंबुरुहेक्षण ९ तस्यै कामवरं दत्वा
मानयित्वा च मानदः सहोद्धवेन सर्वेशः स्वधामागमदर्चितं १० श्रीगोपालजी सहाय श्री दामोदराय

इव सा तन्निवेदितं दुर्भगेत्युक्तं कृतार्थत्वेनुजत्वानं संदेह ८ ९ काम एव वरस्तं दत्वा मानयित्वा चालंकारदर्शनैः १० श्री गोपीनाथ

पं

जा

२४

नमि द ५

भा॰ १॰ स्क॰
१४३

भूत एवंभूतस्य तवागमनेन कृतार्थास्मीत्याह अद्येति हे ईश अद्य नो वसतयो गृहाः तयो वनाः(?) भूरिभागाः कुतः याः वसतीस्त्वं
साक्षात्प्रविष्टः कथंभूतः यस्य तव यादशौचसलिलमेव गंगा त्रिजगत्पुनाति यश्च त्वं पंचयज्ञदेवतामूर्तिः तत्वं जगद्गुरुरसीति २५ त्वम
नोऽपेक्षयापि भूतिरित्याह कः पंडित इति ऋतगिरः सत्यवाचः त्वत्तोऽपरं शरणं कः समीयात् हि यतः त्वं भ
जतः सर्वान् अभिकामान् ददाति आत्मानमपीति २६ नः अविवेकिनां तत्रापि दुरुपगम्य एव २७ २८ वः युष्माकं प्रजाः पुत्रा हि
वपनेति २९ ननु [illegible] देवाः सेव्याः इति प्रसिद्धं तत्राह देवा इति स्वार्थाः स्वकार्यसाधनपराः साधवस्तु केवलं परार्थग्रह

अद्येशनो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः यत्पादशौचसलिलं त्रिजगत्पुनाति स त्वं
जगद्गुरुरधोक्षज याः प्रविष्टः २५ कः पंडितस्त्वदपरं शरणं समीयाद्भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् सर्वा
न्ददाति सुहृदो भजतोऽभिकामानात्मानमप्युपचयापचयौ न यस्य २६ दिष्ट्या जनार्दन भवानिह नः प्रतीतो यो
गेश्वरैरपि दुरापगतिः सुरेशैः छिंध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायां २७ इ
त्यर्चितः संस्तुतश्च भक्तेन भगवान्हरिः अक्रूरं सस्मितं प्राह गीर्भिः संमोहयन्निव २८ श्रीभगवानुवाच
त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बंधुश्च नित्यदा वयं तु रक्ष्याः पोष्याश्च अनुकंप्याः प्रजा हि वः २९ भव
द्विधा महाभागा निषेव्या अर्हसत्तमाः श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ३० न ह्यम्मयानि
तीर्थानि न देवा मृच्छिलामयाः ते पुनंत्युरुकालेन दर्शनादेव साधवः ३१ श्रीगोपालजी सहाय ॥

श्रीशुक उवाच

पराः परमोऽर्थस्तु साधव एव देवा इति ऐते न एव सेव्या इत्यर्थः ३० तर्हि मृच्छिलादिमया किं देवा इत्यो नेवैत्याह नहीति
अम्मयानि तीर्थानि मृन्मयाः शिलामया अन्ये देवा न भवन्तीति न अपि तु भवन्त्येव तथापि साधूनां तेषां च महदंतरमित्याह

श्रीकृष्णः
१४३

ननु सृष्ट्यादिकर्तृत्वेन सगुणत्वेन मम कथं [illegible] जीववद्बंध उक्तः नहि नहीत्याह सृजसीति तद्गुणकर्मभिर्वा तैर्गुणैः कर्मभिर्वा न
स्वार्थः यतः क्व च कदापि बंधहेतुरविद्या तव नैवास्ति कुत इत्यत आह ज्ञानात्मन इति मायया आश्रयानावृतत्वात् इति भा
वः २१ किंच अस्माकं तावत्तव बंधशंका यतोऽविद्योपाधिर्जीवात्मनोपि न च तस्य तावद्बंधोस्तीत्याह देहाद्युपाधेरिति नवोज
[illegible] तन्मूलाभिदा च साक्षादात्मस्वरूपतो न स्यादिति ननु मम बंधाभावं वर्णयता त्वया मोक्षोपि [illegible] तः अपि तु चेन्नहि बंधाभा
वे मोक्षः संभवति अतः प्राप्तो बंधो यः प्राप्तः स्यादित्याह अत इति यतो नाविद्यात्मनो न बंधो मोक्षः एवमुभौ न स्यातामित्यर्थः

सृजस्यथो लुंपसि पासि विश्वं रजस्तमःसत्वगुणैः स्वशक्तिभिः नवध्यसे तद्गुणकर्मभिर्वा ज्ञानात्मन
स्ते क्व च बंधहेतुः २१ देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदात्मनः स्यात् अतो न बंधस्तव नैव
मोक्षः स्यातां निकामस्त्वयि नो विवेकः २२ त्वयोदितोयं जगतो हिताय यदा यदा वेदपथः पुराणः बाध्येत पा
षंडपथैरसद्भिस्तदा भवान्सत्वगुणं बिभर्ति २३ स त्वं प्रभोद्य वसुदेवगृहेवतीर्णः स्वांशेन भारम
पनेतुमिहासि भूमेः अक्षौहिणीशतवधेन सुरेतरांशराज्ञाममुष्य च कुलस्य यशो वितन्वन् २४

यदाद

ननु सर्वकाले वर्तमानस्य नवावतारमनाहरेतु मुक्तं इत्थं वानसिम्मतः कथमुभयं नास्तीत्यत आह निकाम इति स्वाभिप्रायानुरूप
स्तत्त्वविनोस्माकमेव परमेच्छ[illegible] इति यत्र [illegible] अविवेके एव न वो मोक्षस्याता मिति २२ ननु तर्हि मम अवतारस्य चरित्राणि च
शक्तिरजनवत्[illegible]ल्पितानान्येव किं नहि नहीत्याह त्वयेति [illegible]त्वयोदित इति २३ सुरेतरांशा ये राजान

इति विषादः १

सत्यमिति

ना॰ १॰ भ॰ २४४

तेजओजइत्यादि स्वैः कथयामास ६ तत्कथना स्फूर्त्तंतद्रूपं एषा याच्ञ्या माह एषात्वितिश्च
गरस्य विषस्य दानादि अपेशलं अन्याय्यं सा ७ अपि विकिं जामयः कुलस्त्रियः ८ येन स्वस्रेयान् मत्पुत्रान् ९ सांत्वयिष्यति किं
भूरणं कलालेशाः ययोरीश्वर ईदृशो यस्य सा ७ अपि विकिं जामयः कुलस्त्रियः ८ येन स्वसेयान् मत्पुत्रान् सर्वात्मन् सर्वांतर्यामिन् हे विश्वभावन विश्वस्य पालक प्रपन्नां शृ
हे महायोगिन् महान् योगः उपायो माया यस्य सोऽस्यास्तीति हे विश्वात्मन् सर्वात्मन् हे विश्वभावन विश्वस्य पालक प्रपन्नां शृ
रणागतानां अवसीदंतीति विषीदंती ११ अपवर्गिकात् मोक्षप्रदात् १२ शुद्धयै धर्मात्मने ब्रह्मणेऽपरिच्छिन्नाय परमात्मने जीव

इत्यादि पूर्ववत् तदेव बालैः एषा विदुरे एकवा ६ एषा नु भ्रातरं प्राप्य मक्रूरमुपस
दानाय कुंतं च धार्त्तराष्ट्रैः प्रदत्तान् अपेशलं अन्यायं अवावदत्तोऽसर्वमेवालसैः एषा विदुरएकवा ६ एषानुभ्रातरंप्राप्य मक्रूरमुपस
इत्याउवाच ७ एतं उवाच जन्मनिलये स्मरंतस्मकुलेहृणो अपि स्मरंति नः सौम्य पितरौ भ्रातरश्च मे भगिन्यो भ्रातृपुत्राश्च जा
मयः सख्य एव च ८ भ्रात्रेयो भगवान् कृष्णः शरण्यो भक्तवत्सलः पैतृष्वस्रेयान् स्मरति रामश्चांबुरुहेक्षणः ९
सपत्नमध्ये शोचंतीं वृकाणां हरिणीमिव सांत्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् १० कृष्ण कृष्ण
महायोगिन् विश्वात्मन् विश्वभावन प्रपन्नां पाहि गोविंद शिशुभिश्चावसीदतीं ११ नान्यत्तव पदांभोजात्
पश्यामि शरणं नृणां बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् १२ नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने
योगेश्वराय योगाय त्वामहं शरणं गता १३ [illegible] इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरं प्राह
दुःखिता राजन् भवतां प्रपितामही १४ समदुःखसुखोऽक्रूरो विदुरश्च महायशाः सांत्वयामासतुः कुंतीं तत्पुत्रो
त्पत्तिहेतुभिः १५ अ

स्वीकृत्य॰ २४४

सर्वात्मा यो गोविंद सर्वदेवात्मा योगाय परमात्मने योगेश्वराय योगाय त्वामहं १३ प्रपितामहः पांडुः तस्य भार्या प्रोह १४ एषा माता सहसम दुः
खं सुखं च यस्य सः तत्पुत्राणां रामा मुत्पत्तिहेतुभिः जनकैर्धर्मादिभिर्लिंगादिभिः तत्कथनैरित्यर्थः १५ श्रीगोपालजी शाह

५

किं चिच्चिकीर्षितुमुद्यता इति यदुक्तं तत्कार्यमाह शिशूनिति द्वाभ्यां सुहृदां मध्ये भगवान् श्रेष्ठः अतः पाण्डवानां श्रेयश्चिकीर्षया गजाह्व-
यं गजाह्वयं गच्छेति यदुक्तं तेन पृथक्कार्यं हे त्वमाप्नोषीत्यर्थः ॥३२॥ राजा धृतराष्ट्रेण वसंते निवसंति शुश्रूषमाणा नवं तोयं ॥३३॥
दुष्टाशयेत्वपुत्राद् दुर्योधनादयस्तत्कृतेन गच्छतानि तथा यतः संधत्ते कुरुवंशधने ॥३४॥३६॥ इति श्रीमद्भागवते अष्टचत्वारिंशो ॥४८॥ ऊनः पञ्चाशतं मेने
गत्वाक्रूरो गजाह्वये तासः तस्मात्पुत्रेषु वधाद्वैषम्यमागमत् पौरवेन्द्राणां यशोभिरंकितं तद्देवत्वात्तत्पौरेति राजकं तं ॥१॥ बाह्लीकपुत्रः

स्तनवान्सुहृदां वै नः श्रेयः श्रेयश्चिकीर्षया जिज्ञासार्थं पाण्डवानां गच्छस्व गजसाह्वयं ॥३४॥ पितर्युपरते बालाः सह मात्रा
सुदुःखिताः आनीताः स्वपुरं राज्ञा वसंत इति शुश्रुम ॥३३॥ तेषु राजाम्बिकापुत्रो भ्रातृपुत्रेषु दीनधीः समो न वर्तते नूनं दुःपुत्र-
वशगोंधदृक् ॥३४॥ गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा विज्ञाय तद्विधास्यामो यथा शं सुहृदां भवेत् ॥३५॥ इत्यक्रूरं समा-
दिश्य भगवान्हरिरीश्वरः संकर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥३६॥ इति श्रीभागवते महापुराणे दशमस्कंधे [illegible]
[illegible] ॥ अष्टचत्वारिंशोऽध्यायः ॥४८॥ [illegible] स गत्वा हास्तिनपुरं पौरवेंद्रयशोंकितं ददर्श तत्रांबिके-
यं सभीष्मं विदुरं पृथां ॥१॥ सहपुत्रं च बाह्लीकं भारद्वाजं सगौतमं कर्णं दुर्योधनं द्रौणिं पांडवान्सुहृदोऽपरान् ॥२॥ यथावदु-
पसंगम्य बंधुभिर्गांदिनीसुतः संपृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययं ॥३॥ उवास कतिचिन्मासान् राज्ञो वृत्तविवित्सया
दुःप्रजस्याल्पसारस्य खलछंदानुवर्तिनः ॥४॥ तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् प्रजानुरागं पार्थेषु न
सहद्भिश्चिकीर्षितं ॥५॥ कृतं च

सोमदत्तः भारद्वाजो द्रोणः गौतमः कृपः ॥२॥ अव्ययं कुशलं ॥३॥ दुःप्रजस्य असत्पुत्रस्य अल्पसारस्य मंदधियः खलानां छंदो ऽभिप्रा-
यमनुवर्तितुं शीलं यस्येति तथा तस्य ॥४॥ तेजः प्रागल्भ्यं ओजः [illegible] ऐन्द्रियपाटवं वीर्यं शौर्यं न सहद्भिः सहमानैश्चिकीर्षितं इत्युपाकृतिर्नुमितं ॥५॥

भा॰ पु॰
१४५

स्वप्नस्य मायायां मनोरथस्य नर्तेन तुल्यं ... प्रशांतः सन्नसमो नवेति २५ हे हा न पैयते ... तत्प्यामि स्थलमिजिनमन्ते
२६ सन्नतामप्रियाचापि ... रेहा ... तीपते नतिष्ठतीमर्थः सुतमापर्वतः तच्चमवा ... स्मिन्स्फ स्फटिकशिलामये
सहसैवानिसुरिता ... पालीपतेनइदस्तिस्पर्थः ... सुतमम ... लानस्याद्रयं सो हामिनी २७ नत्वेवं जानतो पिकथमयं मोह
इति चेत्तत्राह ईश्वरस्येति विधिर्विधानं मायामितियावत् २८ स्वप्नतल्पमेव नमस्यतियइति दुर्विमर्शपथया स्ववितर्कमार्गया

तस्मात्त्रिलोकमिदं ... स्वप्नमायामनोरथं ... नात्मानं ... शांतो नव प्रश्नो २५ ॥ ... ॥ यथा
वदतिकल्याणीयाचं ... पतेनवान् तथानियाने ... प्याप्यपथा ... २६ तथापितान्तासोम्यहरि
नस्वीयतेचले ... रागविषमे विघ्नसोहामिनीयथा २७ ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान्
नूमेर्मोरावतारायोवतीसो ... कुले २८ यो दुर्विमर्शपथया निजमायये दंस ... गुणान्विभजते तदृ
नुप्रविष्टः तस्मै नमो दुरवबोधविहारतंत्र संसारचक्रगतये परमेश्वराय २९ ॥ ... ॥ इत्यभि
प्रेत्य नपतेरभिप्रायं स याचव... सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीमगात् ३० शशंस ... समस्तमन्धकरता
प्रुवि चेष्टितं ... कौरव्य परार्थप्रेषितः स्वयं ३१ ॥ इति श्रीभागवते महापुराणे ... ॥ ४९ ॥

... एकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥

गुणान्कर्माणि तत्फलानि च विभजते विविच्य ददाति दुरवबोधो यो विहारस्तत्स्यस्य ... तंत्रं प्रधानं मुख्यं कारणं यस्य तं
संसारचक्रस्य गतिर्यस्मात्तस्मै नमः ... २९ अभिप्रेत्य ज्ञात्वा ३० ३१ ॥ इति ... ॥ ४९ ॥

श्री भा॰
१४५

वंधुभिः रामरूसा हिभिः सौहृदेन अदित मुक्तं यत्तत्सर्वं हरतीति २६ भ्रातृपुत्रेषु परलेट इति पांडवेषु सत्सु राजासनं त्वमास्थितोऽइ
ति कयाह २७ नवतत तोपाप्येवं वर्त्तमानः श्रेयोवाप्स्यसीत्याह धर्मेणेति १८ नमे न केइहैव महदुःखमिति माव
२ दोनन्वात्मजानात्मजादिभिः कथं समत्वं स्यात्तत्राह नेहेति अत्यंतं नित्यं संवासः सम्यक् स्थितिः २० नन्वनात्कत्पजिम
रण यो सुखदुःख योस्त्रके नापि सा हितं नास्तीत्याह एक इति २१ किंच परा च सह संवसं ति नि हायिल्केशो पार्जित
वित्ता पहारिणः प्राप्तज्ञानामपरान्त एव भू येयाह इत्याह अधर्मेति संभोजनीया यो ध्याः पुत्रादयः इति व्यपदेशे अल्प

यास्य .. ज्ञानमास्थेत्य विषमं पुत्रलालसं अवरन्तु हतं मध्ये वंधुभिः सौहृदेति १६ अक्रूरउवाच सो
भो वै चित्रवीर्यत्वं कुरूणां कीर्तिवर्द्धन भ्रातृपुत्रेषु पांडवेषु नासनमास्थितः १७ धर्मेण पालयन्नुर्वीं
प्रजाः शीलेन रंजयन् वर्त्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि १८ अन्यथा त्वाचरंल्लोके गर्हितो यास्य
से तमः तस्मात्समत्वे वर्त्तस्व पांडवेष्वात्मजेषु च १९ नेह चात्यंतसंवासः कर्हिचित्केनचित्सह राजन्स्वे
नापि देहेन किमु जायात्मजादिभिः २० एकः प्रसूयते जंतुरेक एव प्रलीयते एकोनुभुंक्ते सुकृतमेक
एव च दुःकृतं २१ अधर्मोपचितं वित्तं हरंत्यन्येल्पमेधसः संभोजनीयापदेशैर्जलानीव जलौकसः
२२ पुष्णाति यानधर्मेण स्वबुद्ध्या तमपंडितं तेकृतार्थं प्रहिण्वंति प्राणा रायः सुतादयः २३ स्वयं कि
ल्बिषमादाय तैस्त्यक्तो नार्थकोविदः अस्सिद्धार्थो विशत्यंधं स्वधर्मविमुखस्तमः २४ अत्री रुस्मायन्म॥

मेधसो मूढस्य वित्तं हरंति जलौकसो मत्स्यास्य जीवन्भूतानि जलानि यथा तत्पुत्रा हरंति तद्वदिति २१ किंच यान
वं पुष्णाति ते धनमहाय मनाजीवं नो यि वानं परित्यजंतीत्याह पुष्णातीति सैव स्वबुद्ध्या स्वीया इत्यभिमानेन रायः
अर्थाः अकृतार्थं अप्राप्तभोगं ३४ स्वपुन पापैकपाथेयो नरकं विशतीत्याह स्वयमिति अस्सिद्धार्थः अप्राप्तमनोरथः २५

पांडवेभ्यो राजेकुः
२५
प्र